उत्सर्गपद्धतिः / शान्तिमयूखः

ग्रंथकारः नीलकंठभट्ट

॥श्रीकाशीविश्वनाथपुरी  मेंढुंढिराजगणेशकेपास
लाऊ अग्निहोत्रीकेयहा सिद्धविनायकयंत्रमेंउ
लगंमयूषछापागयाभूलो छापनेवालेसेति० विशे
शरउपाध्या ॥ संवत १९२५ श्वरनामा० हरहु० ॥ सकु०

उत्स०

श्रीगणेशायनमः उक्तादानविधिन्नामंनाथमाणिक्यभास्करं उत्सर्गविषयेभ्रूः नीलकंठोवदत्यथ तत्रजला
शयोत्सर्गप्रशंसाविष्णुधर्मोत्तरे उदकेनविनानास्तिलोकद्वयेसदा तस्माज्जलाशयाःकार्याःपुरुषेणावि
पश्चिता यमः कूपारामप्रपाकारीतथावृक्षावरोपकः कन्याप्रदःसेतुकारीस्वर्गमाप्नोत्यसंशयं तथा तडागेय
स्यपानीयंसततंखलुतिष्ठति स्वर्गलोकेगतिस्तस्यनात्रकार्याविचारणा नंदिपुराणे योवापीमथवाकूपंदे
शेतोयविवर्जिते खानयेत्सनरोयातिस्वर्गमेत्यशतंसमाः विष्णुः कूपारामतडागेषुदेवतायतनेषुच पुनःसं
स्कारकर्ताचलभतेमौलिकंफलं तथा सेतुबंधरतायेचतीर्थशौचरताश्चये तडागकूपकर्तारोमुच्यंतेतेतृषाभ
यात् तीर्थशौचमतास्थिपकाद्युपतारणं भविष्योत्तरे सर्वस्वेनापिकौंतेयभूमिष्ठमुदकंकुरु कुलानिता राम०
रयेत्कर्तापत्रगौर्वित्तपाभवेत् अतःशुभागतंद्रव्यंतडागादिषुयोजयेत् धन्यःसपंथाद्विजेयस्तडागंह्रस १
मंडितं पीत्वातोयंयथागस्त्याविभ्रमंतिरमंतिच पानीयशोधनंकृत्वाहृदेदेवविनिर्मिते महाजलकरणातत्र

तृप्तिमाप्नोत्यनुत्तमां गृहाद्दौकूपेविशेषफलं देवीपुराणे पूर्वमाश्रित्यकर्तव्यंतस्योत्तरपथेपिवा न
सम्यंकुर्यात्प्रगाहेवालयाद्गृहात् कृतंभयप्रदंलोकेतथाचाग्निजंभयं वायव्यंवापिदेवस्यभयदंजायतेकृतं
वराहमिहिरः पुष्टिंभूर्जिपुत्रहानिंपुरंध्रीनाशंमृत्युसंपदंशस्त्रबाधां किंचित्सौख्यंदिक्षुपूर्वादिकुर्यात् ॥
कूपोमध्येगृहमर्थक्षयचेत्यादि जलारंभकालोविष्णुधर्मोत्तरे स्थिरेलग्नेस्थिरांशेचकर्तुश्चोपचयान्विते न
श्य सूर्य सौम्यग्रहाः केंद्रेत्रिकोणेवापिभार्गवः पापश्चोपचयस्थानेतस्मिन्कार्यंनिवेशनं प्रासादेचैवमेवस्या
त्कूपवापीषुचैवहीति केंद्रंनामप्रथमचतुर्थसप्तदशमाख्यं त्रिकोणंनवमपंचमंच उपचयस्थानंत्रिषडे का
दशदशमाख्यं हस्तोप्राणोपिवराहसंहितायां ध्रुवमृदुमूलविशाखागुरु[illegible]णांतयाश्विनहस्ते शत
निरिचिहृद्भिः पादपसंरोपणोभानि गुरुभंपुष्यः जलाशयोत्सर्गकालोभ[illegible]तरे तस्मिन्सलिलसंपूर्णे
कार्तिकेचविशेषतः तडागस्यविधिःकार्यःस्थिरनक्षत्रयोगतः सुनयःवे[illegible]छंतितिथीनीतेचोत्तरायणे ॥

उत्स०
२

नक्षत्रनियमस्तत्रसलिलंतत्रकारणं दीपिकायां मार्त्तंडेंदूडुशुद्धौसुरजिदयनेमाघषट्कस्यशुक्लेमूला
षाढोत्तराश्विश्रवणागुरुकरेपौष्णशक्रा चांद्रे मैत्रब्राह्मेचपूर्णामदनरवितिथौसद्द्वितीयाः तृतीयाकार्यातो
यस्थितिश्चाज्ञगुरुसितदिनेकालशुद्धौसुलग्ने मार्त्तंडः सूर्यः इंदुश्चंद्रः उडुनक्षत्रं एतेषांशुद्धिर्बलंसुरजिद्वि
ष्णुः तस्यायनेप्रबोधे गुरुःपुष्यः करोहस्तः पौष्णंरेवती शाक्रंज्येष्ठा चांद्रंमृगः मैत्रमनुराधा ब्राह्मंरोहि
णी पूर्णापंचमीदशम्यमापूर्णिमाः मदनरवितिथी त्रयोदशीसप्तम्यौ ज्ञोबुधः सितः शुक्रः वह्निपुराणे
संक्रांतिभेदेन फलविशेषउक्तः वापीकूपतडागानांतस्मिन्कालेविधिःस्मृतः सुदिनेशुभनक्षत्रेप्रतिष्ठा।
शुभदास्मृता कर्कटेपुत्रलाभश्चसौख्यंतुमकरेभवेत् मीनेयशोर्थलाभश्चकुंभेचसुबहूदकं वृषेचमिथुनेन राम
हिवृश्चिकेचजलंभवेत् पित्तनाशिककन्यायांतुलायांशाश्वतीगतिः सिंहेमेषेधनुर्नीशं [illegible] न २
ष्ठतीति अत्रायंसंग्रहोवर्ज्यावर्ज्ययोः अधिकलुप्तसंवत्सरसिंहमकरस्थबृहस्पतावस्त[illegible]

दृष्टेवागुरौ शुक्रेवचकेतिचारिणिवक्रगेगुर्वादित्येमलमासेक्षयमासेलुप्तदिनहृयवतिपक्षेवमहिनादौ भूक
पाशशुक्लांशदुर्नदोषेचवर्ज्यः उत्तरायणेमाघफाल्गुनचैत्रवैशाखज्येष्ठाषाढान्यतममासेषुरविशुद्धा
वयनद्वयविषुवद्वयकन्यामीनधनुरन्यतमसंक्रांतौशुक्लपक्षेद्वितीयानवमीसप्तमीदशमीपौर्णमासीना
मन्यतमतिथौशनिमंगलान्यवारेषुभरणीकृत्तिकार्द्रापुनर्वस्वाश्लेषापूर्वाफाल्गुनीविशाखाव्यतिरिक्त
नक्षत्रेषुविष्कुंभातिगंडव्याघातवज्रव्यतीपातपरिघवैधृतिव्यतिरिक्तयोगेषुकर्तृचंद्रताराविशुद्धौबुध
शुक्रगुरुस्थितपक्षचंद्र निरीक्षितेलग्नेजलाशयोत्सर्गःकार्य इति बह्वृचगृह्यपरिशिष्टे अथातोवारुणावि
धिंवापीकूपतडागकर्मव्याख्यास्यामः पुण्येतिथिकरणे शुभेनक्षत्रेम[illegible]स्थापमाकुम्भवर्णउद
कुम्भवर्णोवारकसमीपेग्निमुपसमाधायवारुणंचरुंश्रपयित्वाज्यभागौ[illegible]न्याहुतीर्जुहुयात् समु
द्रज्येष्ठेतिमध्यात्तंततोहविषोद्दाभिर्जुहुयात्त्वायामिब्रह्मणावंदमान[illegible]तंनोः अग्नेवरुणस्य।

उत्स० ३ विह्यानितिचहेदिमं मेवरुणाश्रुधीतिचस्विष्टकृतंचनमंनववैमाणाः प्राणावा आपस्तस्माद्दापोनवभिः
जुहुयाभिरर्जनानेधेनुंतारयेत् अवतीर्यमाणामनुमंत्रयेत् इदंपविंत्रंसलिलंकुरुघसुहाः पूतास्मतता
सं तुनिस्तं तारयंतोंकुरुतीर्थाभिषेकंलोकाह्वोकंतरंतेतीर्यंनेचेतिपुछ्वाग्नेस्वपलग्नोन्वारभ्यतुतीर्थ्या
पो अस्माः नरः सुधयंत्विस्याध्यायजितायांदिशयुत्स्यापयेत्स्यूपवसाम्दगवतोहिभूयाइतिहिंकरोचे।
हिंकृत्य वसुपत्नीवस्त्रामितिसवैलांकंठंकांचनम्टंगीं वृषभजाएपस्तुएंकांस्योपदोहनांविमायद
द्यादितरंभाशक्याद्दक्षिणांततउत्सर्गंकुर्यात् देवपितृमनुष्याःप्रीयंतामितिपठित्वोत्सृजेनदस्याहं शे
नकोब्राह्मणानभोजयित्वास्वस्त्ययनंवाचयीत ॥ इतिसंक्षिप्तोजलाशयोत्सर्गविधिः ॥ विस्तरस्तु ॥ राम० ३
मात्स्ये ॥ शृणुराजन्महाबाहोतडागादिषुयोविधिः ॥ पुराणेष्वितिहासोयंपठ्यतेवनथान्य माप्यसु
क्तेशुभंपक्षे अतीतेचोत्तरायणे पुण्येह्नि विप्रकथितेकृत्वाब्राह्मणवाचनं प्रागुदक्प्रवणोदेशेत

स्यसमीपतः चतुर्हस्तांतथावेदीचतुरस्रांचतुर्मुखांचतुर्हस्तेस्तिमंडपविभागव्याहृतिः सिद्धांतशेखरेतु तस्मा
नादिमतिसर्पापद्मिनीपद्मसन्निभेइत्युक्तंपद्मिनीतिवेदिनाम तदुक्ततानुत्रिचतुः पंचसप्तनवमेकादश।
न्यतमभागेनपूर्वमेवोक्तांमंडपनिर्णयेदानमयूखे तथाषोडशहस्तःस्यान्मंडपश्चतुर्मुखःयद्यपितडागस्यस
मीपइत्यविशेषेणोक्तं तथापिमंडपादितडागाद्याच्यामुदीच्यामीशान्यामतीच्यांवाकार्यं तडागात्पश्चिमेपू
र्वेदैशान्यामुत्तरेपिवा आदौतुमंडपःकार्यःसर्वलक्षणसंयुत इतिवचनादिति सामदीपिकाः अत्रविशे
षोनविष्ये० तडागपालीशीर्षेतुमंडपंकारयेच्छुभमिति वेद्याश्चपरितोगर्तारत्निमात्रास्त्रिमेखलाः नवस
प्तायथापंचयोनिवक्त्रान्तथामज गर्ताःकुंडानियेनिरेववक्रंयेषांतेयोनिवक्त्राः तत्रसप्रपक्षेईशानकोणस्थ
मण्डलंतनकार्यं उपसंतातविरोधनपानहाधस्येवन्याय्यत्वात् वितस्तिमात्रायोनिःस्यात्षट्सप्तांगुलवि
स्तृता गर्ताश्चतत्रशस्तास्युस्त्रिपर्वोच्छ्रितमेखलाः त्रिपर्वोच्छ्रितास्त्र्यंगुलोच्छ्रिताः सर्वतस्तुसवर्णास्युःपता

उत्स० काध्वजसंयुताः सवर्णा इंद्रादिलोकपालैः अश्वत्थोदुंबरप्लक्षवटशाखाभ-णानितु मंडपस्यप्रतिदिशंद्वा
४ राण्येतानिकारयेत् द्वाराणितोरणानीतिकेचित् यथाश्रुतमेवतुयुक्तं तदावतोरणान्यद्वारकाष्ठमयान्येते
षांद्वारणत्वात् शुभास्तत्राष्टहोतारोद्वारपालास्तथाष्टवै अष्टौतुजापकाःकार्याब्राह्मणावेदपारगाः॥
सर्वलक्षणसंपूर्णामंत्रवंतोजितेंद्रियाः कुलशीलसमायुक्तःस्थापकःस्याद्द्विजोत्तमः स्थापकोगुरुः
प्रतिगर्तंतुकलशान्यज्ञोपकरणानिच॥व्यजनंचासनंशुभ्रंताम्रपात्रेसुविस्तरे प्रतिगर्तमेकैकक
लशादिनिर्देशाद्दिग्॥बहुवचनात्प्रतिगर्तंपदाच्चप्रतिकुंडंचपत्रपदमितितुसम्यक् ततस्त्वनेकवर्णास्तु
वेतस्यःप्रतिदैवतं आचार्यःप्रक्षिपेद्भूमौ अनुमंत्र्यविचक्षणः अरत्निमात्रोयूपःस्यात्क्षीरवृक्षवि राम०
निर्मितः यजमानप्रमाणोवासंस्थाप्यभूतिमिच्छता संचाद्यास्वश्वपालयुतः कार्यः चषालचूडापि ५
एतत्परिमाणमध्यएवयूपेविशेषोभविष्य० कदंबाश्वत्थपालाशवैकंकतमयःशुभः शूद्रस्य॥

यूपोनिर्दिष्टःसारदारुमयोथवेति त्रैवर्णिकानांकदंबादिनियमएवशूद्रस्यानियमइत्यर्थः तत्रैवन
नस्थानं नारदीये तडागोत्तरतश्चैवयूपस्थानंप्रकीर्तितमिति पूर्वकुंडात्प्राच्यापदगात्रान्तरितेदेशइ
ति रूपनारायणः जलाशयमंडपांतरालइतिकेचित् ईशानेतुनिपानस्यन्यसेद्यूपंयथोदितमिति
परे एतत्पक्षत्रयमूलविमृश्यकार्यं हेमालंकारिणःकार्याः पंचविंशतिऋत्विजः कुंडलानिचहैमा
निकेयूरकटकानिच तथांगुलीपवित्राणिवासांसिविविधानिच दद्यादेवसमंसर्वान् आचार्येद्विगुणंपु
नः दद्याच्छयनसंयुक्तमात्मनश्चापियत्प्रियं सौवर्णौकूर्ममकरौराजतौमत्स्यडुंडुभौ ताम्रौकुलीरमंडूकौ
आयसःशिशुमारकः डुंडुभोराजिलः निर्विषसर्पः कुलीरःकर्कटःकूर्मोदयः एतद्वैवारुणमंडलआ
साद्याः एवमासाद्यतान्सर्वान् आदावेवविशेषतः शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः सर्वौषध्युद
कस्नानस्नापितोवेदपुंगवैः यजमानःसपत्नीकःपुत्रपौत्रसमन्वितः पश्चिमद्वारमाश्रित्यप्रविशे

मा॰ मंडपं ततोमंगलशब्देनभेरीणांनिःस्वनेनच रजसामंडलंकुर्यात्संचवर्णैनतत्त्ववित् षोडशारंततः
५ श्वकंपद्मगर्भंचतुर्मुखं चतुरस्रंचपरितोवृत्तंमध्येसुशोभनं वेद्याश्चोपरितत्कुर्यात् स्नहानलोकपतीन्तथा
विन्यसेन्मंत्रतःसर्वान्प्रतिदिक्षुविचक्षणः रुपादीन्स्थापयेन्मध्येवारुणंमंत्रमाश्रितः ब्राह्मणंचशिवं
विष्णुंतत्रैवस्थापयेद्बुधः विनायकंचविन्यस्यकमलामंबिकांतथा शांत्यर्थंसर्वलोकानांभूतमन्त्रान्न्यसे
त्ततः पुष्पभक्ष्यफलैर्युक्तं एवंकृत्वाधिवासयेत् कुंभान्सरत्नगर्भांस्तान्वासोभिरभिवेष्ट्यच गंधपुष्पैर
लंकृत्य द्वारपालान्प्रमंततः पठध्वमितितान्ब्रूयादाचार्यस्त्वभिपूजयन् बह्वृचौपूर्वतःस्थाप्यौदक्षिणेन
यजुर्विदौ सामगौपश्चिमेस्थाप्यावुत्तरेणत्वथर्वणौ उदङ्मुखोदक्षिणतोयजमानउपाविशेत् यजध्व राम
मितितान्सर्वान्होतृकान्सुनरेवतु उत्कृष्टमंत्रजाप्येनतिष्ठध्वमितिजापकान् एवमादिश्यतान्स ५
र्वान्प्रयुज्याग्निंचमंत्रवित् जुहुयाद्वारुणैर्मंत्रैराज्यंचसमिधस्तथा ऋत्विग्भिश्चैवहोतव्यावारुणैरवैस

वेशः स्नहेभ्योविधिवद्दुत्वातयेंद्रायेश्वरायच मरुद्भ्योलोकपालेभ्योविधिवद्विश्वकर्मणे रात्रिसूक्तंचरौद्रं
चपावमानंसुमंगलं जपेरन्पौरुषंसूक्तंपूर्वतोबह्वृचाः पृथक् शाक्रंरौद्रंचसौम्यंचकौष्मांडंजातवेदसं॥
सौरसूक्तंजपेरंस्तेदक्षिणेनयजुर्विदः वैराजंपौरुषंसूक्तंसौवर्णंरुद्रसंहिता शैशवंपंचनिधनंगायत्रं
ज्येष्ठसामचवामदेव्यंबृहत्सौम्यंरौरवंसरथंतरं गवांव्रतंविकर्णंचरक्षोघ्नंचयथाक्रमं गायंतिसामगा
राजन्पश्चिमद्वारमाश्रिताः आथर्वणाश्चोत्तरतस्तथाशांतिकपौष्टिकं माणादिजपान्विशेषतः प्र
योगंदर्शयिष्यामः जपेरन्मनसादेवमाश्रितावरुणंसदा पूर्वेद्युरभितोरात्रावेवंकृत्वाधिवासनं गजा
श्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् मृदमानीयकुंभेषुप्रक्षिपेच्चत्वरात्तथा रोचनांचैवसिद्धार्थान्गं
धान्गुग्गुलुमेवच स्नपनंतस्यकर्तव्यंपंचभंगसमन्वितैः भंगापल्लवाः पूतंकर्तुंमहामंत्रैरेवंकृत्वावि
धानतः स्नपनंवस्त्रयोरस्यतन्त्राकार्यं परदिनकृत्यमाह एवंक्षपामतीवाद्यविधिदृष्टेनकर्मणा ततः

उत्स०
६

प्रभाते विमले संजाते अथवा शतं ब्राह्मणेभ्यः प्रदातव्यमष्टषष्टमथवापुनः पंचाशद्वाथषट्त्रिंशत्पंच
विंशतिवापुनरिति ततः सांवत्सरैः प्रोक्ते मुहूर्त्तेस्मिन् शोभने वेदशास्त्रैःसगांधर्वैर्वाद्यैश्च विविधैः शुभैः॥
कनकालंकृतांकृत्वा लवगामवतारयेत् सांवत्सरादैवज्ञाः सामगाद्यादेपासा ब्राह्मणायविशांपते सामगः
मकृतएवाग्नियांन्यांसात् जलाशयंचत्रिवृत्तासूत्रेणपरिवेष्टयेत् पात्रीमादायसौवर्णी पंचरत्नसमन्वितां
ततोनिक्षिप्यमकरंमत्स्यादींश्चसर्वतः धृतांचतुर्भिर्विप्रैस्तुवेदवेदांगपारगैः महानदीजलोपेतांद
ध्मस्तविभूषितैः उत्तराभिमुखीन्युब्जं जलमध्येतुकारयेत् अथर्ववेदोनसा स्नात्वा पुनर्मामित्येतिवा
आपोहिष्ठेति मंत्रेण क्षिप्त्वागत्य च मंडपे आथर्वणं शान्तोदेवीत्याद्यामुच्चिरीतं अत्रविशेषो भविष्ये
सामान्यं सर्वभूतेभ्योमयादत्तमिदं जलं रमंतुसर्वभूतानिस्नानपानावगाहनैः एवंजलंजलेक्षिप्त्वा पूजयेज्जल
लमातरः तोष्याकर्मकराः सर्वे कुद्दालानि च पूजयेदिति पूजयित्वासदस्यांश्च बलिं दद्यात्समंततः सदस्या

ऋत्विजः समंतत्रोमंडपस्य पुनर्दिनानिहोतव्यं चत्वारिमुनिसत्तमाः होमस्तुपूर्वोक्तएवप्रत्यहंसमावर्तनीयः
चतुर्थिकर्मकर्तव्यं देयात्तत्रापिशक्तितः दक्षिणा राजशार्दूलवरुणंसंस्मरंस्ततः कृत्वातुयज्ञपात्राणियज्ञो
पकरणानि च ऋत्विग्भ्यस्तु समं दत्वा मंडपं विभजेत्पुनः भोजयेत्तु यथाशक्ति पंचाशद्वाथविंशतिं हेमपा
त्रींचशय्यां चस्थापकाय निवेदयेत् ततः सहस्रं विप्राणां अथवाष्टशतं तथा एवमेव पुराणेषु तडागविधि
रुच्यते कूपवापीषु सर्वासु तथा पुष्करिणीषु च एषएवविधिर्दृष्टः प्रतिष्ठासु तथैव च सर्वासु वर्तुलचतुरस्रा
दिषु मंत्रतस्तुविशेषःस्यात्प्रासादोद्यानभूमिषु प्रासादे वास्तुपुरुषः उद्यानेवनस्पतिर्देवताः तन्मंत्रतोवि
शेषतो इत्यर्थः एवं त्वेकाहेन विधिर्दृष्टः स्वयंभुवा अहम्त्रिकं च विंशतेः तत्र होतृजापकद्वारपाला
नां चतुष्टयं चतुष्टयं गुरुश्चैतित्रयोदशेत्यर्थः होमादिदक्षिणानामप्यर्द्धमितिकेचित् स्वल्पेपक्षेकाग्निवत्का
र्यं वित्तशाठ्यादृतेनरैः ग्राहस्कालस्थितं तोयं अग्निष्टोमसमंस्मृतं शरत्कालेस्थितं पत्स्यात्तदुक्थ्यफलदा

उत्स॰ ७

यकं वाजपेयातिरात्राभ्यां हे मंत्रे शिशिरे स्थितं अश्वमेधसमं प्राहुर्वसंतसमये स्थितं ग्रीष्मेपि यत्स्थितं तो
यं राजसूयाद्विशिष्यते एतान्महाराज विशेषधर्मान् करोति यो यान घशुद्धबुद्धिः सयाति रुद्रालयमां
शुपूतः कल्पाननेकान् दिवि मोदते च अनेकलोकान्समहत्तपादीन् भुक्ता परार्द्धद्वयमंगनाभिः सहैव वि
ष्णोः परमं पदं यत्प्राप्नोति तद्योगबलेन भूयः ॥ इति जलाशयोत्सर्गविधिः ॥ अथ जलाशयोत्सर्गप्र
योगः ॥ ॥ अधिवासनदिनपूर्वदिने कृतहविष्यभोजनो धिवासनदिने पूर्वाह्ने कालादि संकीर्त्य सकल
पापक्षयपूर्वकरुद्रलोकगमनानंतरबहुकल्पकालावधिकरुद्रलोकभोगपूर्वकपरार्द्धकालावच्छिन्नमहत्त
पः प्रभृतिलोकांगनासहितत्तल्लोकगतभोगानंतरवैष्णवपरमपदप्राप्तिकामः श्रीमुकजलाशयोत्सर्गं करि एम॰ ७
ष्य इति संकल्पः गणेशपूजा स्वस्तिवाचन मातृवसोर्द्धारापूजा नांदीश्राद्धमृत्विग्वरणमिति सामान्यप्रयो
गान् कृत्वा कुर्यात् तत्रर्त्विजश्चतुर्विंशतिः अष्टौ होतारः अष्टौ जापकाः अष्टौ द्वारपाला इति ॥ चत्वार स्व

त्वारो वा यत्ने गुरुश्चैति षोडश वा अशक्तावेको गुरुरेव वा ततस्तान्मधुपर्ककटककुंडलमालावस्त्रादिना
र्चयेत् द्विगुणं मूल्यं कटककुंडलादि गुरवे देयं ततो मंडपप्रवेश वास्तुपूजा मंडपपूजा अग्निस्थापनोत्तरं गुरु
वेदिलिखितवारुणमंडलमध्यस्थपद्मे ग्रहान् पूजयेत् तत्र कर्णिकायां रवेर्मंडले तथ्ये आग्नेयपत्रे चतु
रस्रे सोमं दक्षिणे पत्रे त्र्यस्रे भौमं ईशानपत्रे बाणाकारे बुधं उत्तरे दीर्घचतुरस्रे गुरुं पूर्वे पंचकोणे शुक्रं प
श्चिमे धनुषि शनिं नैर्ऋत्ये शूर्पाकारे राहुं वायव्ये ध्वजाकारे केतुमिति ततश्चैवाग्नि देवतामत्यधिदेवता
विनायकादीन् पंचावाहयेत् तन्मंत्रास्तु सामान्यप्रयोगेनुसंधेयाः ततो मंडलपूर्वादिदिक्षु इंद्रादीनावा
हयेत् तथाहि त्रातारमिंद्रं एह्येहि सर्वामरसिद्धसंघैरभिष्टुतो वज्रधरामरेश संवीज्यमानोप्सरसां गणेन
रक्षाध्वरं नो भगवन्नमस्ते इंद्रेहागच्छेति चावाह्य गजस्कंधमारूढं वज्रहस्तं महाबलं आवाह
यामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति पूजयेत् एवमाग्नेयकलशे अग्निं दूतं एह्येहि सर्वामर हव्यवाह

उत्त॰ मुनिप्रवीरैरभितोभिजुष्टस्तेजोवतां लोकगणेन सार्द्धं॥ गृहाण पूजां भगवन्नमस्ते अग्न इहागच्छेह तिष्ठेति अग्निमा
८ वाह्य शक्तिहस्तं ज्वलद्रूपं छागारूढं द्विभुजं आवा॰ तामिति पूजयेत् याम्यकुंभे यमाय सोमं एह्येहि वैवस्व
त धर्मराज सर्वामरैरर्चित धर्ममूर्ते शुभाशुभानंद सुवामधीश शिवाय नः पाहि मखं नमस्ते ॐ यमेहा
गच्छेह तिष्ठेत्यावाह्य महामहिषमारूढं दंडहस्तं महाबलं आवाहयामीति पूजयेत् नैर्ऋत्यकुंभे मो पुनः प
एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः ममाध्वरं पाहि शुभाधिनाथ लोकेश्वरस्त्वं
भगवन्नमस्ते निर्ऋत इहागच्छेह तिष्ठेति आवाह्य नीलाक्षं दंष्ट्रं शवारूढं खड्गहस्तं महाबलं आवा॰ ता
मिति पूजयेत् पश्चिमकलशे मत्त्वयामि एह्येहि यादोगणवारिधीश गणेन पर्जन्यसहाप्सरोभिः विद्याध
रेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते वरुणेहागच्छेह तिष्ठेत्यावाह्य मकरस्थं महाबाहुं देवदेव
मपांपतिं आवा॰ तामिति पूजयेत् वायव्यकलशे तववायवृतस्यते एह्येहि यज्ञे मम रक्षणाय मृगाधि

रूढः सह सिद्धसंघैः प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते वायो इहागच्छेह तिष्ठेत्यावा
ह्य मृगस्कंधसमारूढं ध्वजहस्तं महाबलं आवा॰ तामिति पूजयेत् उत्तरकुंभे आप्यायस्व एह्येहि यक्षेश्व
र यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धं सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते सोमेहागच्छे
ह तिष्ठेत्यावाह्य दशाश्वरथमारूढं वरदहस्तं महाबलं आवा॰ तामिति पूजयेत् ऐशान्यकुंभे तमीशानं
एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगगणेन सार्द्धं लोकेश भूतेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नम
स्ते ईशानेहागच्छेह तिष्ठेत्यावाह्य वृषस्कंधसमारूढं शूलहस्तं त्रिलोचनं आवाह॰ तामिति पूजयेत् ॥
निर्ऋतिवरुणयोर्मध्यकुंभे आपंगोः पृथ्वि एह्येहि पातालधरामरेंद्र नागांगनाकिंनरगीयमान रक्षोरगेंद्रा
मरलोकसंघैरनंत रक्षाध्वरमस्मदीयं अनंतेहागच्छेह तिष्ठेत्यावाह्य निःशेषजगदाधारं शेषं सुरगणार्चि
तं आवा॰ तामिति पूजयेत् इंद्रेशानमध्यकुंभे ब्रह्मजज्ञानं एह्येहि सर्वाधिपते सुरेंद्रलोकेन सार्द्धं पितृदे

ग्रह०
८

वताभिः सर्वस्य धातास्यभितम भावोस्मा ध्वरं नः समतं मम मह्ये अह्मन्निदागच्छेह तिष्ठेत्यावाह्य ध्येत्स्वस्वमं
रूढं पद्मयोनिं जगद्गुरुं अभ्यासनमिति पूजयेत् अनंतवत्सलो कलशमावपस्ये अग्रे ध्व दे ब्रमो वरदो वेलाशुः
ततो मंडलम ध्ये पंचवस्तुले वर्ण कूर्म मकारा जतमत्स्य इड भता मकु नीरमंडूक लोरशिं स्युमार पुनो सुवर्ण
पात्रे निर्मम वरुसमि वे वास्या पुष्पित्वा आमाण शिष्य सिद्धं गणपतिं श्रियं अंबिका सुगवामि सनामि
मावाह्य पूजयेत् अथेंद्रादि पूजा समये पौराणिका मंत्राः इन्द्रः सुरपतिः श्रेष्ठो वज्र हस्तो महाबलः श
कोहस्ताप हावीर्येन तस्मै नित्यं नमो नमः सर्वतेजाधिपो देवो एकवर्णो महाबलः शक्तिहस्तो महावीर्ये वि
नरनमोस्तुते दंडहस्तः कृष्णवर्णाधिपो श्व मोमहाबलः मेनाधिपतये तुभ्यं धर्मराजाय वेनमः सर्वदेवाधि
पो देवो निर्ऋतिर्नीलविग्रहः महासकृष्णध्वरे वसतस्मै नित्यं नमो नमः नागपाशधरो नित्यं मकरस्योपरि सा
नि मग्नः शुक्लवर्णाय नमोस्तु वरुणायते सर्वगणाधिपो नित्यं सर्वजंतुषु संस्थितः ध्वजहस्तो महावीर

स्मै नित्यं नमो नमः सर्वेनस्तन्नमध्येयः सोमो राजाव्यवस्थितः शुक्लवर्णो गदाहस्तस्तस्मै नित्यं नमो नमः सर्वदेवा
धिपो देवं ईशानः शुक्लविग्रहः शूलपाणिर्वृषारूढो रुद्राधिपतयेनमः पन्नगाधिपतिर्देवो योनंतो नीलविग्र
हः पातालवसतिर्नित्यं अनंतायनमोनमः पातालकुसुमाकारो ब्रह्मा सर्वार्थसाधकः सर्वलोकपतिर्ब्रह्म तस्मै
नित्यं नमो नमः ॥ १० ॥ इति ततः सूर्यादिभूतनामांतं पंचाशद्देवताभ्यो स्वस्वमंत्रांते सूर्याय गुडौदनो बलिर्नम
इत्यादि प्रयोगतो बलीन् दद्यात् तत्र सोमाय घृतपायसं भौमाय मसूरान्नं बुधाय क्षीरौदनं बृहस्पतये दध्योदनं
शुक्राय घृतान्नं शनैश्चराय कृशरान्नं राहवे मांसौदनं केतवे चित्रौदनं अधिदेवता प्रत्यधिदेवता विनायकादि पं
चभ्यः पायसबलिः इंद्रादीनां दशानां माषौदनबलिः ततः आचार्यः पूर्वकुंडात्पूर्वतः पदत्रयं स्थलं त्यक्त्वा हरि
द्रातैलाभ्यां यूपमभ्यज्य तीर्थोदकेन स्नापयित्वा गौरसर्षपगोरोचनागुग्गुलुदूर्वानिंबपत्रगर्भां पाटलिकं पटा
वभं दासापणाइति मंत्रेण वध्वायुवा सुवासा इति वस्त्रेणा वेष्टयेत् जीर्यां शेषां वदं स्वर्वित्वा तत्रावसतादिकं म

क्षिप्य तत्र भुवीत्यादीति मंत्रेण पूर्णं निखनेत् ततः प्रतिकुंडसमीपे ईशान्यां कलशस्थापनं कृत्वा तत्र सर्वे संगृह्य इति नी
यां निम्नसवरुणं पूजयेयुः तत आचार्यक्रत्विजश्च स्वे स्वे कुंडे स्वगृह्योक्तमार्गेणाग्निप्रणयनानंतरं पात्रादिकर्म
कुर्युः तत्र कुंडप्रभृतिकुंडदक्षिणतो यजमान उपविश्य जलमादाय अस्मिन् कर्मणीदं हविः सूर्यसोमभौमबु
ध गुरु शुक्र शनि राहु केतुभ्यो ग्रहेभ्य ईश्वरोमास्कंदविष्णुब्रह्मेंद्र यमकालचित्रगुप्ताधिदेवताभ्यो अग्न्यप्भू
मिविष्णुइंद्राणीसर्पः प्रजापतिः ब्रह्मप्रत्यधिदेवताभ्यो विनायकः दुर्गा वायु आकाश अश्विपंचलोकपाले
भ्य इंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानानंतरब्रह्मादिक्पालेभ्यो ब्रह्मशिवविष्णु गणपति श्री
अंबिकाभूतग्राम विश्वकर्म वरुणाग्निवायुस्कंदप्रजापतिस्विष्टकृदादिपूर्वोत्तरांगदेवताभ्यो न ममेति
त्यजेत् जापकैर्द्वारपालैश्च शांतिजपादि क्रियमाणे होमः कार्यः ॥ अथ द्वारपालजप्यमंत्रा वक्ष्यंते ॥ श्री
सूक्तं पवमानं च सोमसूक्तं सुमंगलं शांत्याध्यायं चेंद्रसूक्तं रक्षोघ्नं चेति बह्वृचो श्रीसूक्तं हिरण्यवर्णां हरि
णीमित्यादि पंचदशर्चं पावमानं स्वादिष्ठयेत्यादि सोमसूक्तं त्वं सोम प्रचिकित इत्यादि गविष्ठावित्यंतं वयो बिं
शत्सूक्तं सुमंगलं कनिक्रदमित्यादि शांतिकाध्यायः ॥ शन्न इंद्राग्नी इत्यादिकः इंद्रसूक्तं यो जात एवेत्यादिकं
रक्षोघ्नं कृणुष्व पाजः इत्यादि दक्षिणे द्वारपालौ तु रुद्रान् पुरुषसूक्तं श्लोकाध्यायं सूक्तिपंचमंडलाध्यायमेव
च रुद्रान् नमस्त इत्यादिकं मंडलाध्यायमादित्यो वा एष यन्मंडलमिति तैत्तिरीयप्रसिद्धं वामदेवं बृहत्साम
ज्येष्ठसाम रथंतरं तथा पुरुषसूक्तं च रुद्रसूक्तं मनः परं आज्यदोहादि सामानि शांतिकाध्यायमेव च भारुंडानि
च सामानि पश्चिमे द्वारपालकौ वामदेव्यं कयानश्चित्र इत्यस्यां विगीतं बृहत्साम त्वामिद्धि हवामह इत्यस्यां
ज्येष्ठसाम मूर्द्धानं दिव इत्यस्यां रथंतरमभि त्वा शूरनोनुम इत्यस्यां पुरुषसूक्तं सहस्रशीर्षेत्यादिकास्तु रुद्रसूक्त
मा वो राजानमिति बर्गद्वयं आज्यदोहानि देवव्रतानित्यादि शांतिकाध्यायः अबोध्यग्निरित्यादि भारुंडसामा
नि इमं स्तोममित्यादि ऋक्गीतानि अथर्वांगिरसं नीलरुद्रं चैवापराजितं देवीं च मधुसूक्तं च रोधसं शांतिकाध्यायं

गन॰
१०

उत्त॰ ११ अथर्वणोद्गारपालोपठेतानुत्तरश्रिती आथर्वणस्तकंछुदेगायद्भद्वायेत्यादि अंगिरसमंगिरसोजन्मानी
त्यादि नीलरुद्रंयारुद्रपत्न्याविन्यादि अपराजितादेवीपरिवर्जनीन्यादि मधुसूक्तं मधुवाताऋतायतइत्यादि
रोधसंअभयंद्यावाद्वथवीत्यादि शांतिकाध्यायः शन्नइंद्राग्नीभवतामवोभिरित्यादि जापकोनुगनिसूक्तंच॰
ऐंद्रंचपावमानंसुमंगलं पोहषंतुमेपदानाज्ञपेत्तावह्रचोरथक्रु गनिसूक्तंगणीअर्व्वर्वदायनीन्यष्टचं ऐंद्र
मियरुद्रायत्तवसेकपर्दिनइत्यादि शाक्तंऐंद्रंचसौम्यंचकौभांडजातवेदसं सौरंचेतिजपेत्ताहोदक्षिणेन
यजुर्विदो शाक्तमिंद्रंवोविश्वतस्परीत्यादिमनुवाकं ऐंद्रमिमारुद्रायस्थिरधन्वनेगिरइत्यादिषड्चं सौ
म्यंसोमोधेनुमित्यादिषड्चं कौभांडंयद्देवादेवहेलनमित्याद्यनुवाकचतुष्टयं जातवेदसंयस्त्वाहृदाकीरि राम॰
णेत्यादिमनुवाकं सौरंसौर्यौदेवीमुसरोचमानेत्यादिकंषड्चं वैराजंपौरुषंसूक्तंसौपर्णंरुद्रसंहिता॥शै ११
शवंपंचनिधनंगायत्रंज्येष्ठसामच वामदेव्यं बृहत्सौम्यरौरवंसरथंतरं गवांव्रतंविकर्णंचरक्षोघ्नंचयशस्तथा॰

गोयेयुःसामगाएजन्पश्चिमद्वारमाश्रिताः वैराजंपिबासोममदनुत्वेत्यादि सौपर्णमुदग्नेदभिस्नुतामघमित्यत्रचो
णिसामानि रुद्रसंहिता आवोराजानमित्यादि शैशवंसुचानेजातंमधसइत्यस्यांगीतं पंचनिधनं रहस्यांगीतं गा
यत्रंतत्सवितुरित्यस्यांगीतं ज्येष्ठसामनूर्ध्वानंदिवइतिप्रसिद्धं वामदेव्यंकयानश्चित्रेत्यस्यांगीतं बृहत्सामत्वामि
द्धिहवामहइत्यादिप्रसिद्धं सौम्यसामवृत्तसंततेपयांसीतिरौरवंपुनर्मामैत्विन्द्रप्रसिद्धं रथंतरं अभित्वाशूरनोनुमइत्य
स्यांगीतं गवांव्रतांतेमन्वंतरप्रथमं अग्निमीळेइत्यस्यांगीतं विकर्णंविभ्राडित्यस्यांगीतं रक्षोघ्नं अग्नेरक्षाणः॥
अग्नेयुक्ष्वाहीत्येतयोर्गीतं यशः बृहदिंद्रायेत्यत्रगीतं अपेत्याममप्यथर्वणो शांतिकंपौष्टिकंतथा अंतेवरुण
सूक्तंचजपेयुःसर्वएवहि॥ शांतिकौपौष्टिकौप्रसिद्धावाथर्वणानां वारुणसूक्तंस्वस्त्यात्रेयं तत्रऋग्वेदिनां
मोषुवरुणइतिपंचानांवसिष्ठोवरुणोगायत्री अंत्याजगतीवरुणप्रीतयेजपेविनियोगः मोषुवरुणाःशौरयः
यजुर्वेदिनां इमम्मेवरुणेतिद्वयोः शुनःशेपोवरुणोगायत्रीत्रिष्टुभौवरुणप्रीतयेजपेविनियोगः सामगानां

उग्र० इमंमेशुनःशेपोगायत्रीवरुणः आथर्वणानां उदुत्तमंब्रह्मावरुणस्त्रिष्टुप्वरुणप्रीतये प्राच्यादिकुंडेषुवरु
१२ णदिग्भ्रमणयोहोतारः प्रधानहोमात्प्राचीनंकर्मस्वस्वगृह्यानुसारिकृत्वाप्रधानहोमंकुर्युः तत्रऋग्वेदिनावरु
आज्यभागांतं वारुणैर्मंत्रैरष्टोत्तरशतमाज्याहुतीस्तावतीरौदुंबरसमिदाहुतीश्चजुहुयात् मंत्रास्तु तत्त्वा
यामिब्रह्मणा तदिन्नक्तंतद्दिवा शुनःशेपोह्यह्वत् अवतेहेडः उदुत्तमंवरुण त्वन्नोअग्नेवरुणस्य सत्वन्नो
अग्नेवमोभवोतीति इमंमेवरुणइति अग्न्याद्यानांचतुर्णां चतुर्दशवारमंत्राणां त्रयोदशवारमाहत्याष्टोत्तरशत
संख्यासंपत्तिरितिसंप्रदायविदः नह अधिदेवताप्रत्यधिदेवताविनायकपंचकेंद्रशिवमरुदिंद्रादिग्रहांत उग्र०
दशलोकपालविश्वकर्मभ्यः प्रत्येकमष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्ययाहोमइतिसांप्र
दायः॥ नवग्रहेभ्यस्तत्तत्समिधोन्येषां पालाशैः आज्यंचसर्वेभ्यः पृथक् एतन्मंत्रास्तु सामान्यप्रयोगोक्ता १२
क्रमेणइंद्रशिवमरुतांतुत्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप् कद्रुद्रायघोरः काण्वःशिवोगायत्री मरुतोयस्यहिगर्गो

महागीगायत्रीतिमंत्राः केचित्तु ब्रह्मशिवविष्णुगणपतिश्रीअंबिकाभूतग्रामाणामपितन्मंत्रैर्होममाहुः तत्र
श्रियोमंत्रः गंधद्वारां अंबिकायाः अंबेअंबाल्यंबिके इतियाजुषः भूतग्रामस्यतुनाममंत्रएव ततःस्विष्टकृदा
द्युत्तरांगाहुतयः अयंतुसर्वोपिवरुणांतग्रहादिहोमोदिनचतुष्टयं प्रत्यहमावर्तनीयः स्विष्टकृदाद्युत्तरांगहो
मस्तुचतुर्थदिनएवकार्यः इतिकेचित् पूर्णाहुतिस्तुचतुर्थदिनएव असंभवेतद्दिनएववा यजुःसामाथर्ववि
दांमप्ययमेवहोमक्रमः मंत्रास्तुतेषामपिसामान्यप्रयोगएवोक्ताः वारुणमंत्रास्तु यजुर्वेदिनांतावत् इमंमे
त्यस्यशुनःशेपोगायत्रीवरुणः वरुणप्रीतये आज्यहोमे उदुंबरसमिद्धोमेचविनियोगः एवंतत्त्वायामीतिशु
नस्त्रिष्टुब्वरुणः २ त्वंनः सत्वंन इत्यनयोर्वामदेवस्त्रिष्टुप् ३ अग्नीवरुणौदेवते ४ अयाश्चाग्नेसीतिप्रजाप
तिःपंक्तिरग्निः ५ येतेशतमितिशुनःशेपस्त्रिष्टुप्वरुणः ६ अदीपास्त्वकृष्णसाजिनस्त्रिष्टुप्वरुणः ७॥
वंपुवीतिकृष्णसाजिनस्त्रिष्टुप्वरुणः ८ उदुत्तमंशुनःशेपस्त्रिष्टुब्वरुणः ९ वरुणस्योत्तंभनमसितयनोव

ग्र०
१३

ऋषीवरुणः १० निषसादेति प्रजापतिर्गायत्रीवरुणः ११ घृतवतीभरद्वाजोजगतीवरुणः १२ एतेषांद्वादशमंत्रा
णांनववारंहुत्याष्टोत्तरशतसंख्यासंपत्तिः ग्रहादिहोममंत्रास्तुसामान्यप्रयोगएवोक्ताः ततोव्याहृतिहोमादींस्तु
तंत्रांगानि सामगोपिव्याहृतिहोमांतानिपूर्वांगानिकृत्वावारुणंहोमंकुर्यात् इमंमेशुनःशेपोगायत्रीवरुणः वरुण
प्रीतये आज्यहोमेउदुंबरसमिद्धोमेचविनियोगः एवमुत्तरयोःशतपाणी उदुत्तमंगोतमस्त्रिष्टुप्वरुणः घृतव
तीभरद्वाजोजगतीवरुणः॥एतेषांत्रयाणांमंत्राणांषट्त्रिंशद्वारमाहुत्याष्टोत्तरशतसंख्यासंपत्तिः ग्रहादिहोमम
त्रास्तुसामान्यप्रयोगएवोक्ताः ततउत्तरतंत्रंबर्हिर्होमांतं आथर्वणोपिसमंत्रकंतावद्ग्रहणप्रभृत्यभ्यातानहो
मांतंकृत्वावारुणंहोमंकुर्यात् अप्सुतेराजन्नित्यथर्वात्रिष्टुप्वरुणः धाम्नोधाम्नोराजन्नित्यथर्वापंक्तिर्वरुणः
उदुत्तममथर्वात्रिष्टुप्वरुणः मासत्याश्मानथर्वात्रिष्टुप्वरुणः एतेषांचतुर्णांमंत्राणांसप्तविंशतिवारमाहु
त्याष्टोत्तरशतसंख्यासंपत्तिः ग्रहादिहोममंत्रास्तुसामान्यप्रयोगएवोक्ताः ततःपुनरभ्यातानहोमाद्युत्तरतंत्रं।

कुर्यात् आचार्योपिस्वकुंडेस्वशाखोक्तविधिनाएवमेवैताभ्योदेवताभ्योजुहुयात् एवंग्रहाधिवासनं॥ ततआचा
र्यः कुंडाभ्यांप्रस्थापितकलशेषुगजस्थानाश्वस्थानरथ्यात् वल्मीकसरित्संगमह्रदगोकुलचत्वरसंबंधिनीःषण्मृ
दोश्वत्थादिवृक्षोद्भवान्नवपल्लवान्कुंकुमकर्पूरकस्तूरिकासर्षपांश्चप्रक्षिपेत् तैश्चोदकैर्यजमानंप्राङ्मुखंसर्वौष
ध्यनुलिप्तंपुत्रपत्नीसहितंमृत्विजउदङ्मुखाः स्वर्णोदपात्राणयःसपल्लवैरभिषिंचेयुः स्नापयेयुश्च ॥ मंत्रास्तत्तं।
ज्ञातव्याः योगाभ्रुवएत्वामभिषिंचत्वित्याद्यासामान्यप्रयोगउक्ताः ततोयजमानः शुक्लवेषःप्राङ्मुखउदङ्मुखे
भ्योगुर्वृत्विग्भ्योयथाशक्तिदक्षिणांदद्यात् मंडपाद्बहिरीशान्यांदद्यादितिरूपनारायणः मंडपमध्येएवेति ॥
॥ मदनरत्नादयः ॥ अथप्रयोगः॥ कुशतिलयवजलान्यादायपादोत्पादिकर्तव्यासुकजलाशयोत्सर्गांगभूतकृतेनग्रहा
धिवासनप्रतिष्ठार्थंरुद्रदेवताः शतंवा अष्टषष्टिंवा पंचाशतंवाअष्टाविंशतिंवा पंचविंशतिंवा शुभ्रान्संप्रददेनममेति
दद्यात् हलास्तुवरणक्रमेणगुरुहस्तंप्रथमंकृत्वातदधोधःस्थापनीयाः तेचसप्तीत्युक्ताकामस्तुतिपर्यंतेषु ॥

ग्र०
१३

उत्स० ततः कर्माङ्गदेवताः प्रीयंतामिति यजमानेनोक्ते सुप्रीता भवंत्विति वदेयुः ततो यजमानः सुलग्ने जलाशयजले कनक
१४. शृंगादिभूषितां गां यथाशक्ति संपूज्य एवेति धेनुमती हि भूतं सूयवसिनी मनवे दशस्या व्यस्कभ्नारोदसी विष्णवेते
दाधर्थ पृथिवीमभितो मयूखैरिति मंत्रेणावतारयेत् तरंतीं तामनुमंत्रयेत तत्र मंत्रः इदं सलिलं पवित्रं कुरुष्व शुद्धाः
पूता अमृताः संतु नित्यं मां तारयंती सततं तीर्थाभिषेकं लोकाल्लोकं तरते तीर्यते च इति वापीकूपोत्सर्गे तु गां विरूप
ह्वामये दितिरूपनारायणीयादौ ततो यजमानो गुरुणान्वारब्धस्तत्पुच्छे लग्नो जले गच्छेन्नेवमंत्रद्वयं पठेत् तत्र
समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः येवा
मोरोचने दिवो ये वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृतं तेभ्यः सर्वेभ्यो नम इति ततो जल एवेशान्यां पुनरभिमुखा उत्स०
गोः पुच्छं गृहीत्वा जले स्थित्वा यजमानो गुरुणान्वितो यवकुशादिभिर्देवमनुष्यपितृतर्पणं स्वशाखोक्तं कुर्यात् ॥ अ १४
त्रानातपितृतर्पणं श्लोकान्केचित्पठंति तेन तु निर्मूलत्वान्न लिखिताः ततः पुच्छलग्न एवेशान्यां पुनरेतन्मंत्रः ॥८

आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतपुनः पुनंतु विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरापूत एवेमीति सूय
वसाद्भगवती हि भूया अथो वयं भगवंतः स्याम अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरंतीति तामुत्थापये
त् यदि हिंकुर्यात् तदा हिंकृण्वती वसुपती वसूनां वत्समिच्छंती मनसाभ्यागात् दुहामश्विभ्यां पयो अघ्न्येयं सा व
र्धतां महते सौभगायेत्यनुमंत्रयेत् ततः कृतवस्त्रपरिधानो यजमानस्तां संपूज्य तामग्राय प्रतिपादयेत् प्रतिपत्तित्वा
देवनाद्दक्षिणा ततः कुंकुमाक्तेन विवृतास्त्रेण जलाशयं वेष्टयित्वा तत्समीपे उपविशेत् गुरुः क्रमात् मासादिनक्र
र्ममकरादियुतां हेमपात्रीं पंचरत्नयुतां दध्यक्षतमहानदीजलयुतां मादायोद्गुरुश्चतुर्भिर्ऋग्भिः सहस्रशीर्षा
पुरुषः स्थित्वा गाधजले सौवर्णौ कूर्ममकरौ आग्नेयभागयोः मत्स्यद्गुरुतो राजतौ मत्स्यडुंडुभौ दक्षिणनैर्ऋत्य
भागयोः रुद्रगुरुतो ताम्रौ कुलीरमंडूकौ पश्चिमवायव्ययोः मद्गुरुतो आयसं शिशुमारं उत्तरतो दक्षिणाभिमुखं वा
रुणमंत्रैः प्रक्षिपेत् ततः शन्नो देवीरित्यस्यां गोनेनाथर्वणसाम्ना पुनर्मामैत्विंद्रियं पुनरायुः पुनर्भगः पुनर्द्रवि

उत्स० १५

णामेतुभ्यं ॥ पुनर्ब्राह्मणा मैतु मे त्वरण्यगानसाम्ना पोहिष्ठेति तृचेन चोदङ्मुख स्तंपाद्रीन्युक्षीकुर्यात् ततः सवि
शुकुरापरोत् ततो यजमानः प्राङ्मुखो जलोत्सर्गं कुर्यात् तत्र कुशजलयवतिलानादाय देशकालसंकीर्त्य नां
तेपापक्षयपूर्वकरुद्रालयगमनानंतरबहुकल्पकालावधिकरुद्रलोकभोगानुभवपूर्वकपराहृद्भयकालावच्छि
न्नमहत्तपः प्रभृतिलोकगमनादि तत्तल्लोकभोगोत्तरकालसद्योगबलप्राप्यवैस्लव परमपदप्राप्तिकामो हमि
मं तडागादिजलाशयं वरुणदेवताकं स्नानपानावगाहनाद्यर्थं सर्वेभ्यो भूतेभ्य उत्सृजे इत्युक्त्वा जलाशयं नि
रीक्ष्य जलं भूमौ निक्षिपेत् ततो मंत्रद्वयं जपेत् सर्वभूतेभ्य उत्सृष्टं मायैतज्जलमूर्जितं रमंतु सर्वभूतानि स्नानपा
नावगाहनैः सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलं रमंतु सर्वभूतानि स्नानपानावगाहनैः सामान्यं सर्वभूतेभ्यो उत्स० १५
मया दत्तमिदं जलं रमंतु सर्वभूतानि स्नानपानावगाहनैरिति ततो गुरुर्मंडपस्य प्रागादिषु विप्रादिभ्यः पूर्ववन्माष
भक्तबलिं दद्यात् अथाचारप्राप्तं नागयष्ट्यारोपणं तत्र गुरुरष्टसु चूतपत्रेषु अनंत वासुकि तक्षक कर्कोटक पद्म

शंखमहापद्मकुलिकानां नामानि प्रत्येकं लिखित्वा प्राक्स्थापितसजलकलशे प्रक्षिप्यालोक्य तत्र वरुणं पूज
यित्वा एकं चूतपत्रमाकृष्य तत्र लिखितनाम्नानेनागं तीर्थजलाप्लुतायां यज्ञियवृक्षोद्भवायां जलाशयाल्पत्वाद्यनु
सारतो द्वादश पंचदश विंशत्यन्यतमारत्निमितायां यष्ट्यां अमुकनागेहागच्छेह तिष्ठेत्यावाह्य स्थापयित्वानेन नागेना
स्य जलाशयस्य रक्षा कार्येति जनेभ्यः श्रावयित्वा तं नागं यष्टौ अमुकनागाय नमः इति नाममंत्रेण यथाशक्ति पूजयेत्
यष्टिसंबंधिवर्तुलमस्तकोपरि मूले लोहमयं चक्रमारोपयंति ततो जलमध्ये प्रागेव यष्ट्यर्थं कृतखातसमीपे न्वितां
यष्टिं नयेत् ततः खाते दधिमधुघृतकुशतीर्थजलपंचरत्नानि प्रक्षिप्य ध्रुवा द्यौरिति मंत्रेण यष्टिं समारोपयेत् इदं
च यष्ट्यारोपणं कूपवाप्यादिर्न कार्यमिति रूपनारायणीये ततो यजमानो गंगादितीर्थजलं जलाशये प्रक्षिप्य प्रा
ङ्मुख उपविश्य पठेत् कुरुक्षेत्रं गया गंगा प्रभासः पुष्कराणि च एतानि पंचतीर्थानि तडागे निवसंतु मे वितस्ता कौ
शिकी सिंधुः सरयूश्च सरस्वती एतानि पंच तीर्थानि० दशार्णा सुरसा सिंधु रथावर्ता हयहृती एतानि पंचतीर्थानि ० यमुना

नर्मदा रेवा चंद्रभागा च वेदिका एतानि० गोमती वा ऽऽत्रेयी शोणो गंडकी सागरस्तथा एतानि पंच तीर्थानि इति पठित्वा
जलं स्पृष्ट्वा आपो हि ष्ठेति तृचं जपन्नविच्छिन्नदुग्धधारया जलाशयं त्रिः प्रदक्षिणीकुर्यात् तत एकवारं स्रवणाय धेनुं
दुग्धं पाययेत् गुरुर्द्विजैः स्थापितदेवतानां पूजनं कृत्वा ऋत्विग्भिः सह स्वे स्वे कुंडे वारुणप्रभृति विश्वकर्मांतं होमं
कुर्यात् तदंते उत्तरांगं निवर्त्य स्वस्वकुंडे सर्वे पूर्णाहुतिहोमं कुर्युः असंभवे त्वधिवासनदिवस एव पूर्णाहुतिरि
ति वदंति ॥ ततो बहुपूजनद्यावुपकरणादिकर्मशेषं यथायथं कुर्युः दरिद्रो यजमान एकाग्निविधानेन गुरुणैव
सर्वं कारयेदिति मदनादयः अथ चतुर्थीकर्म तत्र गुरुः स्थंडिलं यद्देवा देवहेडनमिति दर्भैः परिसमूह्य मानस्तो
क इत्युपलिप्य त्वां ष्ठेवेशिं इस सत्पतिं नरं त्वां काष्ठास्वर्वत इत्युल्लिख्य सदसस्पतिमित्यंगुष्ठानामिकाभ्यां रेखाभ्यां

उद्धृत्य त्वामिद्धि हवामहे साता वाजस्य कारव इत्यभ्युक्ष्याग्निं मूर्द्धेति वारुणमग्निं प्रतिष्ठापयेत् हिरण्यगर्भ इ
ति दक्षिणे ब्रह्मासनमास्तीर्य ब्रह्म जज्ञानमिति तत्र ब्रह्माणमुपवेश्य आपो हि ष्ठेति कुशोपरि प्रणीतापात्रं संस्थाप्य

स्थापयित्वा आप्यायस्व इति ईशान्यां कलशं निधाय तत्र जले वरुणं संपूज्य कया नश्चित्र इत्यग्निं परिस्तीर्य गाथपते
नाच्छिद्रं त्वा सादयामीति पात्राणि यथोपयोगमासाद्य पवित्रे स्थो वैष्णव्यावसीति पवित्रे छित्वा प्रोक्षणी पात्र सादये निप्रोक्षण्यां
प्रणीतोदकं कृत्वोत्पूय वामहस्ते कृत्वा दक्षिणेनोदिंगनं कृत्वा अर्थवत्प्रोक्षणं संचरेप्रोक्षणीपात्रं निधाय स्थाल्यामा
ज्यमासिच्य धेनित्यधिश्रित्य अग्नेर्नेत्य वेसु अग्निं दूतं पुरो दध इति पर्यग्निं कृत्वा त्रातारमिंद्रमिति स्रुवं प्रताप्य अग्नि
शितोसीति संमार्गकुशैः संमृज्य मनुष्टु प्रक्षः प्रतुष्टा आरातय इति पुनः प्रताप्य बर्हिषि निधायेति ब्रह्मणा
स इत्याज्यमुद्वास्य सवितुर्ह्यस्तु सूर्यो देवत्पवेस्य प्रोक्षणीरस्तु उत्पूय स्थाले घोर आसमित्युपयमनकुशानादा
देवस्त्वा सवितोद्धीति प्रोक्षणीजलेनाग्निं प्रदक्षिणं पर्युक्ष्य प्रणीतासु पवित्रं धृत्वा दक्षिणं जान्वाच्य जुहुयात् प्रजापतये स्वाहा इं
द्रायस्वाहा अग्नये स्वाहा सोमाय स्वाहा भूः स्वाहा भुवः स्वाहा स्वः स्वाहा त्वंनो अग्ने स त्वंनो अग्ने अयाश्चाग्ने

उत्स॰
१७

येनेशानं उदुत्तमं इति प्रायश्चित्तं हुत्वा प्रजापतये स्वाहेति जुहुयात् ततस्तिसृभिर्व्याहृतिभिर्जलं स्नावं हुत्वा इ
ममेव वरुणेति मंत्रेण कडं तेन तोयमभिमंत्र्य तेनाग्निमभ्युक्ष्य गायत्र्या सवित्रे पंचदशाहुतीर्हुत्वा इमं मे वरुणेति व
रुणाय शतमाज्याहुतीर्जुहुयात् भूयोपि व्याहृतिभिस्त्रयेणाहुत्वाग्नये स्विष्टकृते स्वाहेति जुहुयात् ततः इमं मे वरुणे
ति पूर्णाहुतिहोमः ॥ ततोग्निपूजा त्र्यायुषादिकरणं ततोग्निविसर्जनं ततो गुर्वृत्विग्भ्यो हिरण्यं दद्यात् यजमाना
भिषेकः यजमानकर्तृकं पुनः पूजनं ग्रहादीनां यांतु देवगणा इति देवता विसर्जयेत् ततो यज्ञोपकरणादिकमृत्वि
ग्भ्यो हेमपात्रे च शय्यां च गुरवे मंडपं च सर्वेभ्यो विभज्य दद्यात् ग्रहप्रीत्यर्थं ज्योतिर्विदे पि हिरण्यं दद्यात् ततो ब्रा
ह्मणान् सहस्रमष्टोत्तरं शतं पंचाशतं विंशतिं वा शक्त्यनुरूपं भोजयित्वा भूयसीं दत्वा यस्य स्मृत्या प्रमादात्कुर्वतां क
मेत्युक्त्वा निर्विघ्नसुखी भवेत् ॥ इति तडागोत्सर्गप्रयोगः ॥ ❀ ॥ अथ वापीकूपोत्सर्गो भविष्योत्तरे ॥ वापीकूप
विधानं च कथयामि ततः परं ॥ कुंडमंडपसंभारभूषणाच्छादनादिकं ॥ तडागविधिवत्कुर्याद्यूपगोतारणादिकं १८

राम॰
१७

अकालमूलान्कलशान् वापीमूले निधापयेत् तीर्थोदकसमायुक्तान् सितचंदनचर्चितान् सितवस्त्रयुगच्छन्नान् स्र
माल्यान् रत्नगर्भिणः स्थापयित्वा चरुं तत्र पावमग्नौ यथाविधि यावं यवमयं वा तत्र स्वाहुतीं हुत्वा भूर्भुवः स्वरिति क्रमा
त् आपः समस्ता वेति च ततः ग्रहहोमं प्रकुर्वीत शांतिकं पुष्टिवर्द्धनं वरुणाय बलिं दद्यात् लोकपालेभ्य एव
च वारुणानि च सूक्तानि जपेयुर्द्विजपुंगवाः ॥ वेदीमध्ये मंडलकं पद्मगर्भं प्रकल्पयेत् तन्मध्ये पूजयेच्छंभुं ब्रह्मा
णं केशवं तथा मत्स्यकच्छपमंडूकान् वेदिमध्येधिवासयेत् मित्रं शत्रुभिभूतानां धनदो धनकांक्षिणां वैद्यो
रोगाभिभूतानां शरणं शरणार्थिनां अनेनैव च मंत्रेण वरुणाय विसर्जयेत् आदौ वावाहयेद्देवमनेनैव विशेष
तः नमस्ते विश्वगुप्ताय नमो विष्णो अपांपते सांनिध्यं कुरु देवेश समुद्रादिह गम्यतां ततस्तु दक्षिणां दद्याद्ब्राह्म
णेभ्यो विशेषतः गोः स्नापकाय दातव्या भोजनं चातिवारितं सर्वेषामेव दातव्यमेष पौराणिको विधिः ॥ अत्र वि
शेषः ॥ प्रतिकुंडकलशस्थापनसमये वाप्यादि चतुर्दिक्षु धान्योपरि सितवस्त्रयुगच्छन्नान् फलसहितान् कलशान्

स्थापयित्वा तेषु तीर्थमावाह्य नमस्ते विश्वगुप्तायेति तेषु विष्णुमावाह्य पूजयेत् ततो महावेद्यां षोडशारे नह लोक
पालादिस्थापनानंतरं मध्ये शंभुं ब्रह्माणं केशवं चावाह्य तत्रैव सौवर्णां कूर्मं मकरीं प्यंमत्स्यं च पुमपमंडूकं पंच रत्नतीर्थ
जलादिषु तायान् तावपाद्यामधिवासयति शाप्य संपूज्य तडागवह्रलिदानं यूपनिखननं चकृत्वा पयाशास्त्र
पवमयं चरुं श्रपयित्वाज्यभागांतेव्यस्त समस्तव्याहृतिभिस्तत्र आज्याहुतीर्हुत्वा तडागोत्सर्गवह्रारुणमंत्रे
पंवचरुं द्रंबरसमिदाज्यानां प्रत्येकमष्टोत्तरशतमाज्याहुतीर्हुत्वा ग्रहादिविश्वकर्मांतानां प्रत्येकमष्टाविंश
तिसमिदाज्याहुतीर्जुहुयात् ॥ ततो वरुणलोकपालादिभ्यो बलीन्दद्यात् समंताद्भ्रामयेत् इदं सलिल
मितिमंत्रपाठः ततः कूर्मादियुतां ताम्रपात्रीं आरोपेमम्मेवरुणोति जले प्रक्षिपेत् ततउत्सर्गः ब्राह्मणाय
गांगुरवे दद्यात् अयंतत्सर्वं मत्स्यपुराणीयजलोत्सर्गविधिवत् इदं चावश्यकं येन कामयते शांतिं वापीकू
पादिके त्विमां तस्यनिष्फलं तोयमुप्तं वीजमिवोषरे वापीकूपतडागेषु संस्थितं प्रथमं जलं अपेयं तु भवेत्ता

वत् यावत्शांतिकारयेत् ॥ मिनिंद्रावगमात् उत्सृष्टं च जलं तत्कान्येयादिपुरोडाशवत्स्वयं नोपयोज्यमिति केचित्
अथ सर्वसाधारणोत्सर्गोद्देश्यत्वात् स्वस्थापितवंतर्गते यां तेनु देवताया एवोद्देश्यत्वात् स्वस्यतत्त्यागे न यागवैयर्थ्यं
स्वयमप्युपयोज्यमित्यन्ये एवमारामफलादिष्वपि ॥ इति भविष्योत्तरोक्तो वापीकूपतडागोत्सर्गविधिः ॥ अथ
वापीकूपतडागादिषु अल्पतोयेषु श्वमार्जारखरश्वानसूकरादिमृतकाद्युपघाते सर्वोदकोद्धारेण शुद्धिः बहुजले
षु कुंभशतमुद्धृत्य पंचगव्यप्रोक्षणं क्षुद्रप्राणिपाते षष्टिकुंभोद्धारे पंचगव्यप्रक्षेपः अत्यल्पोपघाते सूर्यचंद्ररश्मि
संबंधाद्वायुस्पर्शाच्च शुद्धिः तथा अतिगंभीरवापीकूपतडागनद्यादिषु चंडालाद्यशुचिस्पर्शे यथावस्यलेतास्य
र्शलदेवस्यलं परिवर्ज्यान्यत्र शुद्धिः वापीकूपतडागेषु मानुषमृतके मसि सर्वजलोद्धारं कृत्वा शतजलोद्धरणपू
र्वकं पंचगव्यप्रक्षेपात् शुद्धिः ॥ वापीकूपतडागजले मनुष्यमरणे तु जलस्याहोरात्रमासेचनं ततः शुद्धिः ॥
एवं मूत्रपुरीषचर्मरुधिरादिधातुप्रक्षेपे त्रिंशत्कुंभजलोद्धारपूर्वकं गोमूत्रादिप्रक्षेपादिकं माधवोक्तं प्रायश्चि

उत्स० १९

द्दिः एतन्मूलवचनानिपितामहचरणाहृतापापद्धतौद्रष्टव्यानीति ॥१॥ अथारामप्रतिष्ठावक्तुवृक्षारोपणंभवि।
ष्यपुराणे ॥ अश्वत्थमेकंपिचुमैंदमेकंन्यग्रोधमेकंदशविचिणीकं कपित्थविल्वामलकंत्रयंच पंचाम्रवापी
नरकंनपश्येत् ॥ पाद्मे॥ जलेनापिचराजेंद्र पिप्पलारोपणंकुरु सतुपुत्रसहस्राणामेकएवकरिष्यति कर्त्तव्य
मितिशेषः ॥ भारतेपि०॥ कीर्त्तिश्चमानुषेलोकेप्रेत्यचैवशुभंफलं अतीतानागतेचोभेपितृवंशौचभारत ॥ता
रयेद्वृक्षरोपीचतस्माद्वृक्षांश्चरोपयेदित्यादि ॥ मात्स्ये॥ पादपानांविधिंवक्ष्येतथैवोद्यानभूमिषु तडागविधिवत्स
र्वमासाद्यजगतीश्वर ऋत्विग्मंडपसंभारमाचार्यश्चापितादृशः पूजयेद्ब्राह्मणांस्तद्वद्धेमवस्त्रानुलेपनैः सर्वौ
षध्युदकैःसिक्तान्पिष्टातकविभूषितान् विष्टातकंसुगंधिचूर्णं वृक्षान्माल्यैरलंकृत्यवासोभिरभिवेष्टयेत्०॥
सूच्यासौवर्णयाकार्यंसर्वेषांकर्णवेधनं अंजनंचापिदातव्यंतद्वद्धेमशलाकया फलानिसप्तचाष्टौवाकाल
धौतानिकारयेत् कल धौतानि सौवर्णानिप्रत्येकंसर्ववृक्षाणांवेद्यांतान्यधिवासयेत् धूपोत्रगुग्गुलःश्रेष्ठ

स्ताम्रपात्रैः सप्तधान्यस्थितान्कृत्वावस्त्रगंधानुलेपनैः कुंभान्सर्वेषुवृक्षेषुस्थापयित्वानरेश्वर सहिरण्या
नशेषांस्तान्कृत्वाबलिनिवेदनम् यथावल्लोकपालानामिंद्रादीनांविधानतः वनस्पतेश्चविद्वद्भिर्होमःकार्योद्वि
जातिभिः ततः शुक्लांबरधरांसौवर्णकृतभूषणां सकांस्यदोहांसौवर्णशृंगाभ्यामतिशालिनीं पयस्विनींवृक्षम
ध्यादुत्सृजेद्गां सुदङ्मुखीं ततोभिषेकमंत्रेणवाद्यमंगलगीतकैः ऋग्यजुःसाममंत्रैश्चवारुणैरभितस्तथा तैरेवकुं
भैःस्नपनंकुर्युर्ब्राह्मणपुंगवाः ततःशुक्लांबरधरोयजमानोभिपूजयेत् गोभिर्विभवतःसर्वानृत्विजस्तान्समाहितः
हेमसूत्रैःसकटकैरंगुलीयैःपवित्रकैः वासोभिःशयनीयैश्चतथोपस्करपादुकैः क्षीरेणभोजनंकुर्याद्यावद्दिनचतु
ष्टयं होमश्चसर्षपैःकार्योयवैःकृष्णतिलैस्तथा पालाशःसमिधःशस्ताश्चतुर्थेह्निन्यात्सवः दक्षिणापिपुन
स्तद्वद्देयायत्रयथापि तत्रस्सः आचार्येद्विगुणांदत्वाप्रणिपत्यविसर्जयेत् अनेनविधिनायस्तुकुर्याद्वृक्षोत्सवंबुधः ॥स
र्वान्कामानवाप्नोतिफलंचानंतमश्नुतइत्यादि अत्रजलाशयवदारामोप्युत्सृष्टव्यइतिकेचित् मानाभावान्नेत्यन्ये

उत्स० २०

॥ अथैतत्प्रयोगः ॥ तत्र जलाशयोत्सर्गैककालमनुसृत्याधिवासनदिनात्पूर्वेद्युः कृतैकभक्तादिनियमोऽधिवासनदि-
ने प्राङ्मुख उपविश्य ॥ अद्येत्यादि मम सर्वपापक्षयपूर्वकातीतानागतपितृकुलतारणकामो भगवत्प्रीतिकामो वाऽमो-
कं करिष्य इति संकल्प्य ॥ गणेशपूजास्वस्तिवाचनमातृपूजाभ्युदयिकश्राद्धगुर्वादिवरणपूजनमंडपप्रवेशनपूज-
॥ तेभ्यः स्थापनात्पूर्वं आचार्यश्चतुरस्रां पिंडिकां मध्ये कृत्वा आलवालान् हस्तान् सर्वौषध्युदकैः सिक्तां पिष्टातकैः पुष्प-
मालाभिर्वासोभिश्चालंकृत्य तस्यां प्रतिष्ठं संस्कं तत्समीपे कर्णवेधं तत्र परिमरेशेशलाकयानेत्रांजनं कृत्वा गुग्गुलु-
धूपं दत्वा मूलं धृतं चतुरस्रपिंडिकोपरि यवगोधूमषष्टिककंगुश्यामाकतिलचीनकात्मकसप्तधान्यानि प्रक्षिप्य ते-
षु जलपूर्णान् सोपस्करान् ताम्रकलशान् स्थापयेत् प्रतिष्ठसंकलशस्थापनसेकादिकाण्णश्रकौ दृस्राष्टकेकर्तव्य-
मित्याहुः ततो भिःस्थापनानि पुरुषैर्वा षोडशामे सूर्यो वा लोकपालांतादेवता जलाशयोत्सर्गवत् संस्थाप्य प्रतिष्ठं सं-
[illegible] तिहस्तसंस्थर निस्वर्णफलानि वेद्यां कूर्ममकरादि पात्री स्थाने वनस्पते वीडुंग इति मंत्रेणानायचेत् ०॥

॥ तिष्ठति वनेस्मिन् वीडुं गो हि भूया अस्मात्सखा प्रतरणः सुवीरः गोभिः संनद्धो असि वीडयस्वास्थाता ते जय-
तु जेत्वानि ततो ब्रह्माणं शिवं विष्णुं विनायकं कमलां अंबिकां भूतनाथं चेति संस्थाप्य सर्वान् पूजयेत् ततः सर्वे-
भ्यो बलीन् दत्वा पूर्वकुंडान्माचापदर्वर्यं भुवं त्यक्त्वा जलाशयोत्सर्गवद्यूपं निखनेत् ततः सर्वे आज्यभागांते वन-
स्पते इति मंत्रेणाष्टोत्तरशतमाज्याहुतीः पलाशसमिधः हस्तस्तिलाहुतीश्च जुहुयुः ततो ग्रहादिविश्वक-
र्मांतेभ्यो काद्दिसमिद्भिर्यवैः हस्तनिलैश्च प्रत्येकमष्टाविंशतिसंख्याको होमः कार्यः ततः स्विष्टकृदेवम-
धिवासनांते प्रातः कुंडसमीपस्थकलशजलैर्यजमानमभिषिंचेयुः स्नपयेयुश्च ततो यजमानः सोपस्करां गा-
मुत्सृजेत् तत्र मंत्रः ॥ इदं वनं पवित्रं कुरुष्व सुहृत्पूजनमस्तु नित्यं मातारयंतो सर्वतीर्थाभिषिक्तं लोका-
ल्लोकांतरं नेतीयति चेति एकहस्तमितछायाभिमंत्र समित्यूहः ततः सपुष्पदूर्वाः येवामीर एवने दिवस्पति मंत्र इ-
यमुक्ता गोपुच्छोदकेन देवपितृन् संतर्प्य वृक्षयव साङ्गवती प्रीतिर्हिंकृण्वती वसुपत्नी इति जपेत् ततो वनोत्स-

उत्स०
२१

र्गं कुर्यादिति केचित् सर्वेवं कुशयवतिलजलान्यादायेत्यादि इदं वनमश्वत्थनिंबवटतिंतिणीकपित्थबिल्वा
मलकाम्रदाडिमादिनानावृक्षयुतं वनस्पतिदैवतकं सर्वोपसर्वपापक्षयपूर्वकमतीतानागतपितृकुलतारणा
कामो भगवत्प्रीतिकामो वा सर्वसत्वेभ्यो ह्युत्सृजेत् ततऊहितं मंत्रं हयं पठेत् सर्वभूतेभ्यऊहु हं मयैतद्वनमू
र्ज्जितं रमंतु सर्वभूतानि स्थितिभक्षोन्नसवादिभिः सामान्यं सर्वभूतेभ्यो मया दत्तमिदं वनं रमंतु सर्वभूतानि
स्थितिभक्षोन्नसवादिभिरिति ॥ ततो वृक्षमूलस्थापितजलैः पुनर्यजमानमभिषिंच्य स्नपयेयुः तत्र वरुणमंत्राः॥
सुरास्त्वामित्यादयस्त्र ततो यजमानउपविश्याद्येत्यादि कृतैतदारामप्रतिष्ठाकर्मसंपूर्त्यर्थममुकसगोत्रेभ्य ए
ताःशतंगा अष्टषष्टिंपंचाशतं षट्त्रिंशतं पंचविंशतिं वा यथाशक्ति रुद्रदेवताः दक्षिणात्वेन युष्मभ्यं गुर्वादिभ्यः
संप्रदद इति दत्वा हेमसूत्रकटकांगुलीयकवासः शय्यापादुकाद्युपस्कराचार्यात्विग्भ्योशक्तो गुरवे वा दद्यात् ॥ त राम०
त आपोहिष्ठेतितृचेनाविच्छिन्नदुग्धधारया वनं त्रिः परिषिच्य एकं विप्रं पयो दुग्धं पाययेत् ततो गुरुर्लौक २१

उत्स०
म०
२२

प ॥ दिनचतुष्टयं वृक्षमूलेषु तोयाभिषेचनं ग्रहादिपूजनं वेद्यधिवासितदेवार्चनं वा तत्स्व
स्पहोमादि वैश्वदेवकर्महोमांतं च कृत्वा चतुर्थदिने होमसमापनांते जलाशयोत्सर्गोक्तं चतुर्थीकर्म कुर्यात् पूर्णा
हुतिहोमोत्र वनस्पतिमंत्रेणेति विशेषः नात्र नागयष्टिः ततो यंप्रवेशनमिति रूपनारायणः वृषमपि कार्यमि
त्यर्थः ततोभिषेकग्रहपूजाग्निपूजाविसर्जनशय्यादानमंडपाद्युपस्करप्रतिपत्तिविप्रभोजनभूयसीदानक
र्मेश्वरार्पणानि जलाशयोत्सर्गवत् ॥ ॥इति श्रीमीमांसकभट्टशंकरात्मजभट्टनीलकंठकृते भास्करे जलाशयो
द्यानोत्सर्गमयूखः समाप्तः॥ ॥ ॥ शुभम्भूयात् ॥ ॥

राम०
२२

॥ उत्सर्गेन यूपसमाप्तः ॥

॥ उत्सर्गपद्धतिः प्रारम्भः ॥

उत्स०
प० १

ॐ श्रीगणेशायनमः॥ ॥अथतडागोत्सर्गपद्धतीलिख्यते॥ ॥उत्तरायणे कार्तिकमाघफाल्गुणचैत्रवै
शाखज्येष्ठआषाढश्रावणआश्विनपौषेषु यजमानस्यविशुद्धौबहुजलसत्वेषुशुक्लपक्षेद्वितीयातृती
यापंचमीसप्तमीदशमीत्रयोदशीपौर्णमासीषु बुधगुरुशुक्रवारेषु रविसोमयोरप्येके भरणीकृत्तिकाद्रापुन
र्वसुश्लेषापूर्वाफाल्गुनीविशाखाव्यतिरेकनक्षत्रेषुक्रूरग्रहवर्जितेषु विष्कुंभगंडातिगंडशूलव्याघातहर्षण
वज्रव्यतीपातपरिघसाध्यवैधृतिव्यतिरिक्तयोगेषु विष्टिव्यतिरिक्तकरणेषु मेषसिंहधनुर्वृश्चिकातिरिक्तेल
ग्नेबुधगुरुसितनिरीक्षितेचंद्रताराणुकुले अबालवृद्धनास्तमितगुरुशुक्रे असिंहमकरस्थार्कोनातिचा
रोगुरौमलमासक्षयमासलुप्तवर्षाद्भूतावमादिदोषरहिते ज्योतिर्विद्भिःकथितेकालेजलाशयोत्सर्गंकुर्या
त् अथमंडपकरणं चतुर्विंशांगुलोहस्तः समपदस्य प्रपदमालंब्योच्छ्रितस्यवाकर्तुः ऊर्ध्वबाहोः पंच
मांशेन हस्तस्यचतुर्विंशांशोंगुलं अंगुष्ठमांसोपवः दशद्वादशास्यौ द्वादशचतुर्दशमध्यमौ षोडशाष्टद

शावुत्तमौ हस्तमितिः समचतुरस्रावेदिःकार्या नवषोडशस्तंभाः परितोद्वादशमध्येवेदीचतुरस्रावे
दिकाकार्या चतुर्हस्तप्रमाणा मध्येस्तंभचतुष्टयंकृत्वा अष्टहस्तोच्छ्रायाः उपरिवलिकाकाष्ठयोजनसच्छि
द्राःकार्याः द्वादशान्येसर्वेनिश्छिद्राः ऋजवः शुभाःकार्याः स्तंभोच्छ्रायंपंचधाविभज्य पंचमांशभूमिनिखनेत्
क्षेत्रस्यनवधाविभज्यतृतीयांशपरिमितमंतरालंविहायस्तंभानिवेशनीयाः परितोद्वाराणिकनिष्ठैर्द्वि
करद्वारांचतुरंगुलरहितः मध्यमोत्तमयोरिति ततः परितोद्वारशाखाःप्रतिदिशंपूर्वादिषु अश्वत्थोदुंबर
प्लक्षन्यग्रोधादिनाचतुर्णांशाखाभिः क्रमाद्धमममध्यमोत्तमादिमंडपेषुपंचषट्सप्तहस्तोच्छ्राभिर्द्वाभ्यां
द्वाभ्यांप्रतिदिशंतोरणानिकुर्यात् ततःकुंडानितेचवेदिभित्त्योःपरित्यज्यत्रयोदशभिरंगुलैःकुर्यात्कुंड
निचत्वारिचतुर्दिक्षुयथाक्रमं आचार्यकुंडंपूर्वेशयोर्मध्येकार्यं॥हस्तमात्रत्रिमेखलाकार्या एकाचार्यप
क्षेएकंकुंडंजघन्यःपक्षःयोनिवक्रकंठयुक्तंकार्यं कुंडपंचदशांगुलनिम्नंउपरिमात्रांगुलंएकांगुलः परि

तः कुंडः तत्पश्चात् उपरि त्रिमेखलाः कार्या पूर्वमेव भूमिप्रार्थना शुभे हि मंडपं कर्तुं यथोचितं मार्जनदहनखन
नादिनासंस्तुतेन भूमिसंशोध्य समकरणी कुर्यात् ततो द्वादशांगुलशंकुमानेन कृतेन मंडले शंकुप्रवेश लिखि
ताभ्यां प्राचीसाध्या पुरतो हि पूर्वाह्णे गणेशं कूर्म शेषं वसुधां हि जांस्तं दनादिना प्रपूज्य भूमेश्च अर्घ्यं दत्वा मंड
पादि कुर्यात् तद्यथा देशकालौ स्मृत्वा जलाशयोत्सर्गयज्ञोपयोगी मंडपकुंडादिकर्तुं गणपतिकूर्मशेषव
सुधा हि जान् पूज्य अर्घदानानि करिष्ये ताम्रपात्रे गंधदूर्वाफलपुष्पयवयुतजलं गृहीत्वा शुक्लवासाः॥
शुचिर्भूत्वा अर्घ्यं हस्त उदङ्मुखः कृतांजलिपुटो भूत्वा भूमिमावाहयेत् ततः आगच्छ सर्वकल्याणि वसुधे
लोकधारिणि उद्धृतासि वराहेण सशैलवनकानना ॥१॥ मंडपं कारयाम्यद्य त्वद् ऊर्ध्वं शुभलक्षणं गृहाण
अर्घ्यं दत्तं प्रसन्ना शुभसर्वदा भव एवमर्घं दत्वा बद्धांजलिः स्योना पृ॰ भूमिं प्रार्थ्य॰ जलाशयात्पश्चिमे
शान पूर्वे ... मन्यत्र मेवादेशे जलाशय समीपे षोडशहस्तमितं समचतुरस्रं चतुर्द्वारं मंडपं कुर्यात् ॥ ॥

...त॥ नित्यक्रियः कुशपाणिः कुशासने प्राङ्मुख उपविश्य अंजलिं गृहीत्वा प्राणानायम्य सकुशं जलमादा
य समुत्तरे ... देशकालौ संकीर्त्य अद्य कर्तव्यामुकजलाशयोत्सर्गयज्ञेनाविघ्नपरिसमाप्तिकामो विनायकं संपू
जयिष्ये ... पूजयिष्ये ॥ इति संकल्प्य॰ प्रतिमायां सत्वपुंजेषु वा भूर्भुवः स्वर्विनायकाय नमः इति मंत्रेण गणानां त्वेति
वैदिकेन वा पूजयेत्॰ भूर्भुवः स्वः गौर्यै नमः इति॰ श्रीश्च तेति मंत्रेण गौरीं पूजयेत्॰ पुराणोक्तानु॰ हे हेरंब त्वमेह्येहि अंबि
कात्र्यंबकात्मज सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभ पितुः पिता नागास्यं नागहारं त्वं गणराजं चतुर्भुजं भूषितैः स्वायु
धैर्दिव्यैः पाशांकुशपरश्वधैः आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः इहागत्य गृहाण त्वं पूजां कर्तुं च रक्ष
मे आवाहितं गणेशं तं पूजाद्रव्यैः प्रपूजयेत् नारिकेलेन देयो र्घ्यो रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ॥भ
क्तानामभयं कर्ता त्राता भव भवार्णवात् द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो वरदस्त्वं वरं देहि वांछितं वांछि
तार्थद गृहाणार्घ्यमिदं देव सर्वदेव नमस्कृत अनेन फलदानेन फलदोस्तु सदा मम ॥ अथ प्रार्थना ॥ ॥

विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय ॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसु
तायगणनाथनमोनमस्ते ॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ॥ विद्याधराय
विकटायचवामनायभक्तप्रसन्नवरदायनमोनमस्ते ॥ नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः ॥ विश्वरूपस्वरू
पायनमस्तेब्रह्मचारिणे ॥ भक्तप्रियायदेवायनमस्तुभ्यंविनायक ॥ लंबोदरनमस्तुभ्यंसततंमोदकप्रिय ॥
निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ जयंती मंगलाकालीतिगौरींप्रार्थयेत ॥ ॥ पुनर्देशकालौसंकीर्त्य
सर्वपापक्षयपूर्वकरुद्रालयागमनानेककल्पव्यापिस्वर्गलोकहर्षपदह्यावच्छिन्नमहत्तपः प्रभृतिलो
[illegible] सहितैतज्जलाशयस्यतोयबिंदुसमसंख्यदेवसारूप्यत्वइह सुहृद्वनिततनयातुरंगचतुर्वर्गादृष्टी
[illegible] ओवा अमुकजलाशयोत्सर्गपद्धत्यातेनाहमहंकरिष्ये ॥ इतिसंकल्प्यततोवरुणमदोसा दंप
[illegible] स्वेणसूत्रबंधः ॥ काण्डात्काण्डादिति दूर्वामार्जनम् ॥ अस्मिन्निमित्तस्नवंदनं ॥ दधिक्राव्णो इति दधिवं

दनं ॥ करोतु स्वस्तिनेब्रह्मा स्वस्तिश्चापि द्विजातयः ॥ सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्तिसर्वदा ॥ ययातिर्नहु
षश्चैव धुंधुमारो भगीरथः ॥ तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वंतु सर्वदा ॥ स्वस्तिर्नेस्तु द्विपादेभ्य श्चतुष्पादेभ्य एव च
स्वस्त्यस्त्वपादकेभ्यश्च नित्यं तव महामखे ॥ इत्यक्षता माज्या हस्ते दत्वा नंदीक्षितोसीत्युक्त्वा ॥ वलेनदीसाइ
ति मंत्रेण पात्र्याभिमंत्रणं ॥ ततो वाद्यैः अमुकजलाशयोत्सर्गकर्तुं तु प्रणतो गणमातृपूजनसगणपतिगौर्यादि
षोडशमातृकापूजनं च करिष्ये ॥ नंदे नंदिनि वासिष्ठे वसुदेवे च भार्गवे जये च विजये चैव सप्तैते तत्र मातरः
॥ तत्र मातरः इहागच्छ इहातिष्ठ पूजयेत ॥ नंदायै नमः नंदिन्यै० वासिष्ठायै नमः वसुदेव्यै० भार्गव्यै० नजयायै
न० विजयायै० ॥ इति प्रत्येकं पूजयेत ॥ अनेन पूजनेन सप्त मातरः प्रीयंतां न मम० ॥ हार मातृ० कुमारी धनदा नं
मंगला चकलिप्रिया ॥ ऐंद्री च सुभगा चैव सप्तैता ह्यार मातरः ॥ गौरी पद्मा शची मेधा सावित्री विजया जया०
देवसेना स्वधा स्वाहा [illegible] लोकमातरः ॥ हृष्टिः पुष्टिस्तथा तुष्टि आत्मदेवतया सह ॥ गणेशेनाधिका ह्येता पू

ज्ञेनीपातु षोडश॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथेंद्राणी चामुंडा सप्त मातरः॥ ततो व
सोर्द्धारा॥ वसोः पवित्रमसि शतधारं० घृतः तिस्रः पंच सप्त घृतधाराः कुर्यात्॥ ततो नांदीश्राद्धं कुर्यात्॥ पुण्याह
वाचनं कुर्यात्॥ ततो यजमानो देशकालौ संकीर्त्य जलाशयोत्सर्गकर्तुं आचार्यादि ऋत्विक् द्वारपालानां वरणं मधुपर्के ण
चेनं च करिष्ये॥ तद्यथा॥ पूर्वमुखोपविष्टो यजमानः अमुकगोत्रोऽमुकप्रवरान्वितोऽमुक नामा यजमानः जलाशयोत्स
र्गकर्मणि ऋद्धिकर्तुं अमुकगोत्रममुकप्रवरममुकनामानममुकशर्माणमाचार्यं इह मंडले इह पके पूरं इह पक ढ
ह्र कंठाभरणांगुलीयक वस्त्र युग्म रूप्यालंकरणा हिरण्या सुवर्णघटितमलं कारयुक्तं गुणावंतं त्वां आचार्यत्वेन
वृणोऽहं नोस्मि त्वमेतस्मा द्याचार्यो भवेति बद्धांजलिः प्रार्थ्य॥ भवामीति तेनोक्ते त्वन्नो गुरुः पिता माता त्वं प्रभुस्त्व
मय्यंगागः प्रसादाच्च विप्रोषे सर्वं मम मनोगतं॥ आचार्यं त्वं यथा स्वर्गे शक्रादीनां तथैव ब्रह्मवरणं० यथा
यं वृणीमहे० तथैव ऋत्विजानां वरणं कार्यं प्राक्कुंडे कवेदिनो ऋग्वेदः पञ्चपञ्चाशोगायत्र शक्रदैवतः॥

अग्निगोत्रः कर्णिमेंद्रऋत्विक् त्वं मे मखे भव॥ याम्यकुंडे कातरसोऽथ यजुर्वेद स्त्रिष्टुभो विष्णुदैवतः॥ काश्यप यस्काविं
मेंद्रऋत्वि त्वं० सामगो मम पकुंडे॥ सामवेदस्तु पिंगलो जागतः शक्रदैवतः॥ भारद्वाजस्तु विप्रेंद्रऋ० अथर्व
सोऽद्रकु० इह त्वं नैर्ऋते यजुर्वेदोनुष्टुभो रुद्रदैवतः॥ वैशंपायन विप्रेंद्रऋ० ततो दिक्षु चतुरो द्वारपालान् वृणुयात्
॥ मंडकर्णेभिरिति मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण मंडपं प्रविश्य आचम्य देशकालौ संकीर्त्य श्वः करिष्य
माणजलाशयोत्सर्गस्य यागतया गणेशपूजापूर्वकं मंडपदेवतास्थापनादि च करिष्ये॥ गौरसर्षपान् सर्वतो
मंडपांतरविकिरेदक्षो ग्रमंत्रेण॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं त
त्र गच्छतु १ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं॥ सर्वेषामविरोधेन यज्ञकर्म समारभेत॥ ततः कुशैः।
पंचगव्येन सर्वत्र प्रोक्षेत् दाषोहिष्ठेति त्र्यृचेन। ततः कृतांजलिः स्वस्त्ययनं स्वस्तिन० मंत्रहयं पठेत तत ए
कैकवेदिनो द्वौ द्वौ जापकौ पूर्वादि दिशि० एवमेव जापकाग्नेन त्वामहं वृणे। अष्टौ जापकान् पूर्वं देव वृणुयात्

उत्स० ५ ततोष्टौ द्वारपालान् पूर्वादिदिक्षु द्वौ द्वौ द्वारपालत्वेन त्वामहं वृणे ॥ एवमेव पंचविंशतिऋत्विजो भवंति ॥
अत्राशक्तो अष्टौ होतारश्चत्वारो जापकाश्चत्वारो द्वारपाला गुरुश्चेति सप्तदश अत्राप्यशक्तो चतुरो हो
तॄन् चतुरो जापकान् चतुरो द्वारपालान् गुरुं चेति त्रयोदश अप्यसामर्थ्ये एकाग्निविधिना कर्म कर्तुमाचा
र्यं ब्रह्माणं च हो तदा शाखांतरस्य मंत्रहोमो जापक द्वारपाल कर्म निवर्तते कर्त्रभावात् ततो गुर्वादीन् स्व
दीयपरंपरागतशाखीयगृह्योक्तविधिना वरणक्रमेण मधुपर्केणार्चयेत् तत्र नानारूपत्वाद्वचनलि ॥
प्यते ॥ तदनंतरं उक्तरीत्या कृतमंडपमध्ये उपसंक्तवस्तून्युपकल्पयेत् तद्यथा स्रुक्स्रुवादीनि पात्रोप
[illegible] होमार्थं प्रादेशमिता अष्टोत्तरसंख्या औदुंबर्यः समिधः महाहोमार्थं अश्वत्थपला
[illegible] र्गापिप्पलोदुंबरशमीदूर्वाकुशमय्यः प्रत्येकमष्टाविंशतिसंख्याकाः समिधः अधिदेवता
नवग्रहविनायकादिपंचेंद्रादिलोकपालदशकं विश्वकर्महोमार्थं प्रत्येकमष्टाविंशतिसंख्याकाः । पाला

शीसमीधः प्रादेशमिता एतावद्देवताहोमपर्याप्तमाज्यं होमसामग्निकुंडपंचके होतुः पंचगुणां संपादयेत् ॰
यजमानेतिलद्यात् स्थिरार्थं पूर्णपात्रस्थितांस्तंडुलान् अष्टमुष्टिर्भवेत्किंचित् किंचिद्द्वे तु पुष्कलं पुष्कलानि
त्वं तदुच्यते तथा च शतद्वयं षट्पंचाशन्मुष्टयस्तंडुलानां पूर्णपात्रं भवति अत्राशक्तस्य
तृप्तिः पूर्णो जायते नावराध्यमतः कुर्यात् पूर्णपात्रमिति स्थितिः छंदोगपरिशिष्टोक्तं ग्रहा
धिदेवतापूजार्थं नानाविधगंधपुष्पधूपदीपवस्त्रग्रंथिताग्रथितपुष्पाणि संपादयेत् भूरिभक्ष्याणि च नैवे
द्यार्थे गुडौदनादि नवग्रहबल्यर्थे पायसं वा अधिदैवतादिबल्यर्थं सर्वार्थं वा पायसमेव दिक्पालादिबल्य
र्थं माषभक्तं च चतुर्हस्तं वेद्युपरि देयं पंचवर्णवितानकं ग्रहादिस्थापनार्थं नानावर्णांस्तंडुलान् ॰ ॥
यजमानरत्नित्रयमितं यजमानप्रमाणं वा अश्वत्थादिक्षीरद्रुमोपमं यष्टिं स्त्रिमुपरि वर्तुलं मध्ये संततं मृ
न्मयं यूपं संपादयेत् ॥ शक्तिसुवर्णनिर्मितं सपंचरत्नसुवर्णपात्र्यां सौवर्णौ कूर्ममकरौ राजितौ मत्स्यडुंडुभौ ॥

अ० प० ६

मत्स्यमुखो कुलीरमंडूकौ लोरश्च शिशुमारकः ॥ आसादनार्थं संपादयेत् यथासंभवं बरुणादीं श्चवित्तानुसा
रेणशतमष्टषष्टिः पंचाशत्षट्त्रिंशत्पंचविंशतिर्वा गा दक्षिणार्थं स्कवर्णशृंगीरौप्यखुरीताम्रपृष्ठीरत्नपु
च्छो घंटाचामरे स्वर्णपट्टिकादियुक्ता गा वा बृतारणाय तुलिकोपधानाद्युपस्कारयुतां शय्यां च अन्यदपि
यजमानस्य दातुमिष्टं वस्तु यत् प्रदानार्थमुपकल्पयेत् अन्यच्चोपयुक्तं सर्ववस्तुमुपकल्पयेत् ॥ ततो गु
रुर्त्विग्भिः सर्वौषधीयुतजलेन स्नापितः ॥ शुक्लमाल्याम्बरधरः शुक्लगंधानुलेपनः ॥ सपत्नीकः पुत्र
पौत्रयुतो यजमानः ॥ स्वाचार्यसहर्त्विक् सपूर्णकलशहस्तो मंगलतूर्यनिस्वने जायमाने भद्रं कर्णेभिः
इत्यादिवेदघोषेण मंडपपूजनं कुर्यात् ततः पूर्वस्यादिशि मंडपद्वाराद्बहिर्हस्तमात्रे आश्वत्थसुदृढनाम
कं सुदृशीं इंद्रप्रभं माल्यपर्वतसहितं शाखांकितोरणमेह्येहि सुदृढ तोरण एनं यज्ञं रक्ष सर्वविघ्नान्नि
वारय ॐ अग्निमीळे० आवाह्य० ॥ ऋग्वेदाधिष्टिताय सुदृढतोरणाय नमः इति गंधादिनाभ्यूज्य०

चंदनवस्त्रादिशोभितं कृत्वा राहुबृहस्पती तत्र न्यसेत् पूजयेच्च तत्रैकः कलशः स्थाप्यः तत्र विधिः मही द्यौरि
ति भूमिं स्पृशन् प्रार्थ्य० ओषधय इति यवान् क्षिपेत् आजिघ्रेति कलशं निधाय इमं मे इति जलमापूर्य गंध
द्वारामिति गंधं या ओषधीरिति सर्वौषधीः ॥ कांडात्कांडादिति दूर्वा अश्वत्थे इति पंचपल्लवान् स्योना पृथि
वीति सप्तमृदः याः फलिनीरिति फलं परिवाजपतिरिति पंचरत्नानि हिरण्यगर्भ इति हिरण्यं युवा सुवासा
इति रक्तसूत्रेणावेष्टयेत् पूर्णा दर्वीति धान्यपूर्णं शरावं कलशोपरि निधाय तत्र ध्रुवमावाह्य पूजयेत् ततः आ
चम्य ततो दक्षिणे औदुंबरं विकटाख्यं भिन्नांजनप्रभं विंध्यपर्वतसहितं चक्रांकितं तोरणमेह्येहि विकटतो
रण एनं यज्ञं रक्ष सर्वविघ्नान्निवारय इषेत्वोर्जे त्वेत्यावाह्य यजुर्वेदाधिष्टिताय विकटतोरणाय नमः ॥
गंधादिनाभ्यूज्य चंदनादिशोभितं कृत्वा तत्र सूर्यमंगारकं च न्यसेत् पूजयेत् ततः पूर्ववत्कलशं स्थापयित्वा
तत्र धरामावाह्य पूजयेत् ततः आचम्य पश्चिमे प्लाक्षं सुभीमाख्यं स्निग्धं दूरमभं गंधमादनपर्वतसहितं गदांकि

अग्र॰
प०
२

ततोरणं एह्येहि सुभीमतोरणं एनं यज्ञं रक्ष सर्वविघ्नान्निवारय अग्न आयाहीत्यावाह्य सामवेदाधिष्ठिताय सु
भीमतोरणाय नमः गंधादिनाभ्यपूज्य चंदनादिशोभितं कृत्वा शुक्रं बुधं च तत्र न्यस्य पूजयेत् ततः पूर्ववत्क।
लशं निधाय तत्र वाक्पतिमावाह्य पूजयेत् तत उत्तरे वटस्तु प्रभाख्यं शुद्धस्फटिकसंभं हिमवत्पर्वतसहितम्
पद्मांकितं तोरणं एह्येहि सुप्रभतोरणं एनं यज्ञं रक्ष सर्वविघ्नान्निवारय शन्नो देवीत्यावाह्य अथर्ववेदा।
धिष्ठिताय सुप्रभतोरणाय नमः इति गंधादिनाभ्यपूज्य चंदनादिशोभितं कृत्वा सोमकेतुशनिं तत्र न्यस्य पूज
येत् तत्र पूर्ववत्कलशं निधाय॰ तत्र विघ्नेशमावाह्य पूजयेत् ततः पूर्वशाखाद्वये कलशद्वयं वहिर्दध्यक्षत॰
भूषितं पूर्ववन्मंत्रेण स्थापयेत् प्रतिकलशं मंत्रावृत्तिः ऐरावतं कलशद्वये न्यस्य पूजयेत् कलशोपरि घृते
न तैलेन वा दीपो देयः ततक्रमेबहिनौ द्वौ द्वारपालौ अग्निमीले गंधादिना पूजयेत् एह्येहि सर्वामरसिद्धसा।
ध्यैरभिष्टुतो वज्रधरामरेशसंवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते ततः सांगसपरि ॥

वारं सायुधसशक्तिकमिंद्रं कलशयोरुपरि आवाह्य त्रातारमिंद्रमवितारमिंद्रं ५ हवेहवे सुहवं ५ शूरमिंद्र
मह्वयामि॰ त्विंद्र प्रपूज्य आशुः शिशान इति मंत्रेण पीतौ पताकाध्वजौ उच्छ्रयेत् द्वारशाखयोः धात्रे नमः वि
धात्रे नमः ह्रीश्रियै नमः गणपतये नमः उपरि वास्तुपुरुषाय नमः अधः ततः सहस्राक्षमैरावतसंस्थि
तं पीतं किरीटकुंडलधरं दक्षिणवामकरवज्रोत्पलमिंद्रं ध्यात्वा ततः इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महा
बलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः ततो बलिः इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिका॰
य एनं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ततः आचम्य आग्नेयं गत्वा पूर्ववदेकं कलशं निधाय तत्र पुं
डरीकं पूजयित्वा अमृतं च गणां पूजयित्वा दीपो देयः छागस्थं रक्तं दक्षिणवामकरद्वयं ध्वजशक्तिकं कमंड
लुपक्षोपवीतिममग्निं ध्यात्वा ॐ एह्येहि सर्वामरहव्यवाहमुनिप्रवीरैरभितोभिजुष्ट तेजोवता लोकगणे
न साहं मम ध्वरं पाहि कवे नमस्ते ततोग्निं सांगं सहपरिवारं सायुधं सशक्तिकं कलशे आवाह्य त्वन्नो अग्ने तव दे

व० ब्रते १ अग्निं गंधादिना सम्पूज्य० अग्निदूतं० रक्तोपताकोध्वजोदच्छ्रयेत् आग्नेयः पुरुषो रक्तः सर्वदेवमयो
व्ययः धूम्रकेतुरजोध्यक्षस्तस्मै नित्यं नमो नमः ॥ अग्नये सांगेत्यादि एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्
ततः दक्षिणो प्रतिहारस्तम्भयोः पूर्ववत् कलशद्वयं निधाय वामनदिग्गजं तत्र न्यस्य सम्पूज्य दीपदानं यजुर्वेद
नो द्वारपालौ इषेत्वोर्जे० गंधादिना सम्पूज्य ततो माहिषारूढं धृतदंडपाशं दक्षिणवामकरद्वयम् ॥ कज्जला
जनचयोपमं अग्निसमलोचनं यमं ध्यात्वा० एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते शुभाशुभानंद
शुचामधिप शिवाय नः पाहि मखं नमस्ते सांगयमं कलशयोरावाह्य यमायत्वांगिरस्वते० पितृगंधादिनाम्
पूज्य० आपंगोः कृष्णोपताकोध्वजोदच्छ्रयेत् द्वारशाखयोर्वेलायनमः सवलायनमः ॥ द्वारश्रियैनमः ॥
॥ उपरिगणपतये नमः ॥ अधोवास्तुपुरुषाय नमः ॥ ततो माहिषमारूढं दंडहस्तं महाबलं ॥ आवाह
यामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतां यमाय सांगेत्यादि एतं माषभक्तबलिं समर्पयामीति बलिं० ॥ ॥

दद्यात् ततो नैरृत्यां पूर्ववदेकं कलशं निधाय कुमुदं दिग्गजं च पूजयित्वा दीपो देयः ततः निरृतिं ध्या
त्वा नरारूढं महाकायं खड्गहस्तं महाबलं नीलवस्त्रवेष्टितं पीताभरणभूषितं एह्येहि सांगगणाधिप रक्ष
विशालनेत्रातपिशाचसंघैः मम ध्वरं पाहि पिशाचनाथ लोकेश्वर त्वं भगवन्नमस्ते ॥ ततः सांगादि निरृतिं
मावाह्य असुन्वंतमयजमानस्य० मन्त्रेण गंधादिभिः पूजयित्वा मोरवृक्षादिनीलपताकोध्वजमुच्छ्रये
त् निरृतिं खड्गहस्तं च सर्वलोकैकपावनं आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां सांगेत्यादि निरृत
ये माषभक्तबलिं समर्पयामि बलिं दद्यात् ततः पश्चिमे प्रतिहारयोः संपूर्ववत् कलशौ निधाय अंजनाख्य
दिग्गजं तत्र न्यस्य सम्पूज्य दीपदानं ततः सामवेदिनौ द्वौ द्वारपालौ अग्न आयाहि इति गंधादिभिः सम्पूज्य० ॥
ततो मकरस्थं पाशहस्तं मुक्ताभरणं किरीटधारिणं ध्यात्वा ॐ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहा
प्सरोभिः विद्याधरेंद्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते सांगादि वरुणं कलशयोरावाह्य तत्वायामि

मित्रस्तारा० रिवः॥ गंधादिभिः संपूज्य दुर्गमेति श्वेतो पताका ध्वजावु च्छ्रयेत् द्वारशाखयोर्जयायनमः विजया
यनमः द्वारश्रीये० उपरिगणेशाय० अधोवास्तुपुरुषायनमः ततः पाशहस्तं च वरुणं मणसांपतिमीश्वरं आवा
हयामि यज्ञेस्मिन्पू० सांगायादि एतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ ततः आचम्य वायव्यां० पूर्वव
देकंकलशंनिधायपुष्पदंतं दिग्गजंसिद्धार्थं च संपूज्यदीपोदेयः ततः मृगाधिरूढं धूम्रवर्णं चित्रांबरधरं युवा
नं वरं ध्वजधरं दक्षिणवामहस्तद्वये वायुं ध्यात्वा ॐ एह्येहि यज्ञेमम रक्षणाय मृगाधिरूढ सहसिद्धसंघैः॥
प्राणाधिपः कालकवेसहस्य गृहाण पूजां भगवन्नमस्ते ततः सांगादिवायुमावाह्य आनोनियुद्भिः शतिनी० ।
दानः गंधादिभिः पूज्य० वायवेनमः० धूम्रोपताका ध्वजावुच्छ्रयेत् ततः वायुमाकाशगं चैव पवनं वेगवद्गतिं॥
आवाहयामि यज्ञेस्मिन्पूजियं प्रतिगृह्यतां अनाकाशे महोजास्य यथा हस्तिगता दिवि तस्मै पूज्याय जगतो वायु
वे हंसवाहिने सांगोपादि एतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात् ततः आचम्योत्तरे प्रतिहारशास्त्रं पूर्ववत्

कलशं निधाय० तत्र सार्वभौमं दिग्गजं च संपूज्य दीपोदेयः ततो यर्वैविद्गुरपालो शन्नोदेवी० गंधादिभिः
प्रपूज्य नमोनरयुतं विमानस्थं कुंडलहारकेयूररुचिरां बरगदाधरं दक्षिणवामभुजद्वये मुकुटिनं महोदरं महा
कायं हर्षितवर्णं कुबेरं ध्यात्वा ॐ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन साहं सर्वौषधिभिः पितृभिः स
हैव गृहाण पूजां सांगादि सोमं कलशे पारावाह्य वयं सोम व्रते तव० मह्हि गंधादिभिः पूज्य आप्यायस्व तिश्वेतो
पताकोध्वजौ हारितौ वाउच्छ्रयेत् उत्तरद्वारशाखयोश्चंडायनमः प्रचंडायनमः द्वारश्रीये नमः उपरिगणाय
नयनमः अधोवास्तुपुरुषाय० ततः सर्वनक्षत्रमध्ये तु सोमो राजा व्यवस्थितः तस्मै सोमाय देवाय नक्षत्र पत
येनमः सांगेत्यादि सोमायैतं माषभक्तबलिं समर्पयामीतिबलिंदद्यात् आचम्य ईशान्यां पूर्ववत्कलशं निधा
यत्र पशुपतिं कंदिग्गजं मंगलं च तत्र न्यसेत् संपूज्य दीपोदेयः ततः वृषारूढं दक्षिणवामहस्तयोर्वरं त्रिशूलध
रं त्रिनेत्रं शुक्लवर्णं ईशानं ध्यात्वा एह्येहि विश्वेश्वर विश्वनाथ कपालखट्वांगधरेण साहं लोकेश यज्ञेश्वर यज्ञ

ग्र०ह० प० १८

दिक्षु कृत्वा ॐ सर्वाधिपो महादेव ईशानः शुक्ल ईश्वरः शूलपाणी विरूपाक्षस्तस्मै नित्यं नमो नमः सांगायेति मी
शानमावाह्य तमीशानं ॐ नमः ते गंधादिभिः संपूज्य श्वेतो सर्ववर्णो वा पताका ध्वजानुत्क्षेपेत् तमीशानमिति मंत्रे
ण वृषस्कंधसमारूढं शूलहस्तं त्रिलोचनं आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां ततः सांगेत्यादि ईशा
नाय एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ततः पूर्वेशानमध्ये ऊर्ध्वं दिग्भागे पूर्ववत्कलशं निधाय
तत्र ब्रह्माणं पूजयेत् तद्यथा पद्मस्रुवकुशमुष्टिधरो ध्यो धो रक्षिणाकरं स्रुव कमंडलुधरो ध्यो धो वामक
रद्वयं चतुर्मुखं सश्मश्रुलं जटिलं लंबोदरं रक्तवर्णं ब्रह्माणं ध्यात्वा ॐ एह्येहि सर्वाधिपते सुरेश्वर लोकेन सार्द्धं
पितृदेवताभिः ॥ सर्वस्य धाता त्वममितप्रभावो विघ्नाध्वरं नः सततं शिवाय सांगायेति ब्रह्माणमावाह्य ब्रह्मज
ज्ञानं प्रथमं पुरस्तात् ॐ विवः गंधादिना संपूज्य तेनैव मंत्रेण रक्तो पताका ध्वजानुत्क्षेपेत् पद्मयोनिश्चतुर्मूर्तिर्वे
दावासः पितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः सांगेत्यादि एतं माषभक्तबलिं समर्पयामीति ब

लिं दद्यात् ततः आग्नेयनिर्ऋतिवरुणयोर्मध्ये पूर्ववत्कलशं निधाय ततः अधः अनंतशयनासीनं फणास्
फणामंडितं पद्मशंखधरो ध्यो धो दक्षिणाकरद्वयं नीलवर्णमनंतं ध्यात्वा ॐ एह्येहि पातालधराधरेन्द्र नागांग
नाकिंनरगीयमान रक्षोरगेन्द्रामरलोकसंघैरनंत रक्षाध्वरमस्मदीयं सांगादि अनंतमावाह्य आपंगोः प्रभि
गंधादिभिः संपूज्य धूम्रो श्वेतो पताका ध्वजानुत्क्षेपेत् योसावनंतरूपेण ब्रह्मांडं सचराचरं पुष्पवद्धारयेन्मू
र्ध्नि तस्मै नित्यं नमो नमः सांगेत्यादि अनंताय एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ततः आदर्श मं
डपमध्ये चामरकिंकिणीयुतः षोडशहस्तदंडो वा दशहस्तदीर्घः त्रिहस्तविस्तार एकहस्तविस्तारो वा पंचव
र्णविचित्रो महाध्वजो रक्तसूत्र इत्युत्क्षेपेत् तत्र प्रत्युज्ज्वालमिति मंत्रेणाग्निं पूजयेत् ततो मंडपषोडशस्तं
भेषु स्तंभेभ्यो देवेभ्यो नमः केशरेषु किंनरेभ्यो नमः पृष्ठे पन्नगेभ्यो नमः ततो मंडपान्तः पूर्वादिभागे किंचि
दूर्ध्वमुपलिप्य पंचविंशत्य त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि वै

देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमुनयोगावोदेवमातरएवच सर्वेमंगमध्येरक्षांप्रकुर्वंतुमुदान्वि
ताः ब्रह्माविष्णुश्चरुद्रश्चशेषपालोगणैःसह रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः त्रैलोक्यस्थेभ्यस्थावरेभ्यो
नमः त्रैलोक्यस्थेभ्यश्चरेभ्योनमः ब्रह्मणेभ्योनमः शिवाय० देवेभ्यो० दानवेभ्योनमः गंधर्वेभ्यो० यक्षेभ्यो०।
राक्षसेभ्यो० पन्नगेभ्यो० ऋषिभ्योनमः मनुष्येभ्यो० गोभ्योनमः० देवमातृभ्यो० इतिसंपूज्य० पंचदशैकंवा।
बलिंदद्यात्॥ ॥इतिमंडपप्रतिष्ठा॥ ॥अथवास्तुपूजनम्॥ ॥मंडपनैर्ऋत्यकोणे वास्तुमंडपंकार्यं०
चतुरंगुलोन्नतांहस्तमितांवेदिंविधाय आचम्यप्राणानायम्य अद्येत्यादिवास्तुकर्माहंकरिष्ये ततः वा
स्तुमंडलचतुःकोणेषुशंकुचतुष्टयंईशानादिप्रदक्षिणक्रमेणारोपयेत् तत्रमंत्रः विशंतुभूतलेनागा।
लोकपालाश्चसर्वदा मंडपेत्रावतिष्ठंतु आयुर्बलकराःसदा अनेनमंत्रेणआग्नेयादिकोणेषु ततः शंकु
नां पूर्वेरोपणक्रमेणबलिदानं अग्निभ्योप्यथसर्पेभ्योयेचान्येतान्समाश्रिताः तेभ्योबलिंप्रयच्छामिपु

ण्यमोदनमुत्तमं॥१॥ अनेनमंत्रेणआग्नेयांबलिंदत्वा नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यायेचराक्षसाः ते०॥२॥ॐन
मोवायुसर्वेभ्योयेचान्येतान्समाश्रिताः तेभ्यो०॥३॥रुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतान्समाश्रिताः तेभ्यो०॥४॥
इतिक्रमेणचतुःकोणेषुबलिंदद्यात् तन्मध्येकनकशलाकयारत्नेवारजतफलपुष्पाणामन्यतमेनवीरेखाः
प्रागायताः उदक्संस्थाःकुर्यात् लक्ष्मीर्यशोवतीकांतासुप्रियाविमलाश्रिया॥सुभगासुमतीडाचक्रमादे
तैस्तुनामभिः धन्याप्राणाविशाला चस्थिराभद्राजयानिशा विरजाविभवाएतौनामभिश्चैवतत्क्रमात् उदगाः
प्राक्संस्था नवरेखाकृत्वाचतुःषष्टिपदंमंडलंभवति तत्रमध्यगंपदचतुष्टयमेकीकृत्य तत्कोणचतुष्टया
द्बहिः कोणचतुष्टयेरेखाभिः पदान्यष्टौ उद्धृतशिख्यादीन्स्थापयेत् मंडलमध्येवास्तुपुरुषमावाहयेत् पूजये
च एह्येहिभगवन्वास्तोयज्ञेस्मिन्सर्वसिद्धये॥जानुनीकूर्परौशक्र पिण्डाचान आहुतयः॥वास्तुपुरुषायपंचो
पचारैःपूजयेत् ततः शिखिप्रभृतिपंचचत्वारिंशद्देवताःस्थापयेत्॥स्वस्वपदेषुअक्षततंडुलैः तत्रईशान

पददक्षिणार्द्धे शिखिनं ॐ शिखिनायनमः शिखिनं आ० इति सर्वत्र तद्दक्षिणसार्द्धपदे पर्जन्यं २ तद्दक्षिण पदद्वये जयंतं ३ तद्दक्षिणपदद्वये कुलिशायुधं ४ तद्दक्षिणपदद्वये सूर्यं ५ तद्दक्षिणपदद्वये सत्यं ६ तद्दक्षिणपदद्वये भृशं ७॥ तद्दक्षिणाग्नेयपदार्द्धे आकाशं ८ तत्पश्चिमार्द्धे वायुं ९ तत्पश्चिमसार्द्धपदे पूषणं १० तत्पश्चिमपदद्वये वितथं ११ तदनंतःपदद्वये गृहक्षतं १२ तदनंतःपदद्वये यमं १३ तदनंतःपदद्वये गंधर्वं १४ तत्पश्चिमसार्द्धपदे भृंगराजं १५ तत्पश्चिमनैर्ऋत्यपदार्द्धे मृगं १६ तदुत्तरार्द्धे पितॄन् १७ तदुत्तरसार्द्धपदे दौवारिकं १८ तदुत्तरपदद्वये सुग्रीवं १९ तदुत्तरपदद्वये पुष्पदंतं २० तदुत्तरपदद्वये वरुणं २१ तदुत्तरपदद्वये। असुरं २२ तदुत्तरसार्द्धपदे शेषं २३ तदुत्तरवायव्यपदार्द्धे पापं २४ तत्प्राक् पदार्द्धे रोगं २५ तत्प्राक् सार्द्धपदे। अहिं २६ तत्प्राक् पदद्वये मुख्यं २७ तत्प्राक् पदद्वये भल्लाटं २८ तत्प्राक् पदद्वये सोमं २९ तत्प्राक् पदद्वये सर्पं० ३० तत्प्राक् पदद्वये दितिं ३१ तत्प्रागर्द्धपदे अदितिं ३२ मध्यपदेषु ईशानपदोत्तरार्द्धे आपं वा अद्भ्योनमः ३३



ईशानपददक्षिणार्द्धे आपवत्सायनमः ३४ तद्दक्षिणपदद्वये अर्यम्णो। नमः ३५ तद्दक्षिणे आग्नेयपदार्द्धे सावित्रायनमः ३६ आग्नेयपदपश्चिमार्द्धे सवित्रे० ३७ तत्पश्चिमपदद्वये विवस्वतायनमः ३८ तत्पश्चिमे नैर्ऋत्यपदार्द्धे विबुधाधिपायनमः ३९ तदुत्तरार्द्धे जयंतायनमः ४०॥ तदुत्तरपदद्वये मित्रायनमः ४१ तदुत्तरे वायव्यपदार्द्धे राजयक्ष्मणेनमः ४२ तत्पूर्वार्द्धे रुद्रायनमः ४३ तत्पूर्वपदद्वये पृथ्वीधरायनमः ४४ मध्यमपदचतुष्के ब्रह्मणेनमः ४५ ततोमंडपाद्बहिः ईशानादिषु चरक्यैनमः स्कंदायनमः विदार्यैनमः अर्यम्णोनमः पूतनायैनमः जंभकायनमः पाप० राक्षस्यैनमः पिलिपिञ्जायनमः पूर्वादिषु इं

उत्त० द्वारेणैन्यसेत्॥ तत्र मंडलादीशानेकलशं स्थापयेत् कलशोक्तविधिना इति वास्तुपूजा॥ ततो यजमानः सा
प० चार्यऋत्विक् प्रक्षालितपादपाणिराचांतः प्राग्द्वारेण मंडपं प्रविश्य दक्षिणद्वारपश्चिमभागे उपविश्य भो गुर्वाद
१३ योयथाविहितं कर्म कुरुध्वमिति सविनयं प्रार्थयेत् ततः आचार्यो वेद्यामुपरि पल्लवपुष्पोपशोभितं पंचवर्णवि
तानं दद्यात्॰ ततो वेद्यामुपविश्य वेदिसंमुखमंगलतूर्यध्वनौ प्रवर्तमाने उक्तरीत्या वारुणमंडलं लिखेत्
ततः पूर्वकुंडे ऋग्वेदिनो होतार उपविशेतं॰ तत्रैको ब्रह्मासनपश्चिममुखः अपरो होमकर्ता सचोदङ्मुखः
॥तथा दक्षिणकुंडे यजुर्वेदिनौ॰ तत्र ब्रह्मा उदङ्मुखः अपरो होमकर्ता पूर्वमुखः पश्चिमकुंडे सामवेदिनौ।
एवमेवोत्तरकुंडे अथर्ववेदिनौ ततः कुंडसंनिधौ यथा तद्द्वयविदौ होतृवत् द्वौ द्वौ जापकावुपवेशयेत् आचा ग्रह०
र्यश्च स्वकुंडे प्राङ्मुख उपविश्य येत् ततो गुरुः स्वकुंडे स्वगृह्योक्तविधिनाग्निं स्थापयेत् तेपि च कुर्युः अथ नव। १३
ग्रहस्थापनं अग्निप्रणयनं विधाय ग्रहवेद्यां देवतास्थापनं कुर्यात् सा च कुंडात् पश्चिमे शदंगुलोपरि ईशा

नभागे मूर्त्तिसाहस्तविस्तृता चतुरस्रा प्रागुदक्प्रवणा वप्रत्रयोपरि द्वादशांगुलोच्चा कार्या तस्याः प्रथमो वप्रो द्व्यं
गुलोच्छ्रायो वप्रोपि द्व्यंगुलविस्तारः कार्या एवं च वप्रे सहाष्टादशांगुलोच्चता भवति तस्यां च देवतावाहनं कुर्या
त् अथ वहिर्वेद्यां अष्टदलपद्मे नवग्रहपूजनं कार्यं आचम्य अद्येत्यादि ग्रहपूजनमहं करिष्ये याज्ञवल्
क्यः आद्यां दद्यादेवं च विनियोगं तथैव च वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ऋषिं त्वातु यः कुर्यात्।
याजनं स्थापनं जपं होमं मंत्रजलादीनि तस्य चाल्पफलं भवेत् प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता दे
वीगायत्री छंदः व्याहृतीनां क्रमेण जमदग्निभरद्वाजभृग्वोऋषयः अग्निवायुसूर्या देवता दैविगायत्री
छंदः दैवीउष्णिक् दैवीबृहती छंदांसि सूर्याद्यावाहने विनियोगः॥ तत्र ग्रहपीठे वर्तुले द्वादशांगुले मंडले।
प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैः आकृष्णेनेति मंत्रस्य हिरण्यस्तूप ऋषिः त्रिष्टुप् छंदः सविता देवता सूर्या
वाहने विनियोगः॥ ॐ आकृष्णेन रजसा॰ ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपसगोत्र सूर्य इहागच्छ।

इतिष्टेतिस्थापयेत् ततः आग्नेये चतुरंगुले मंडले मत्स्याकृतं सोमं श्वेतपुष्पासते ॥ इमंदेवा इत्यस्य वरुण
ऋषिः यजुः सोमो देवता सोमावाहने विनियोगः इमंदेवा अ० ॐ यमुनातीरे उद्भव आत्रेयसगोत्र सोम इह
गच्छेत्यावाह्य इतिष्टेतिस्थापयेत् ततो दक्षिणे त्रिकोणे त्र्यंगुले मंडले दक्षिणाभिमुखं भौमं रक्तपुष्पासतैः
अग्निमूर्धेति विरूपाक्ष ऋषिः गायत्रीछंदः अंगारको देवता अंगारकावाहने विनियोगः ॥ अग्निर्मूर्धा
० ॐ अवंतिदेशोद्भव भारद्वाजगोत्र भौम इहागच्छेत्यावाह्य इहतिष्ठेतिस्थापयेत् ततः ईशाने बाणाका
रे चतुरंगुले मंडले उदङ्मुखं बुधं पीतपुष्पासतैः उद्बुध्यस्वेति परमेष्ठी ऋषिः त्रिष्टुप्छंदः बुधो देवता बुधावा
हने विनियोगः ॥ ॐ उद्बुध्यस्व० ॐ मगधदेशोद्भव आत्रेयसगोत्र बुध इहतिष्टेतिस्थापयेत् ततः उत्तरे दी
र्घचतुरस्रे षडंगुले उदङ्मुखं बृहस्पतिं पीतपुष्पासतैः बृहस्पतेति गृत्समद ऋषिः त्रिष्टुप्छंदः ॥ बृहस्पतिर्दे
वता बृहस्पत्यावाहने विनियोगः ॥ बृहस्पते अति० ॐ सिंधुदेशोद्भव आंगिरसगोत्र बृहस्पते इहागच्छेत्यावा

ह्य इहतिष्ठेतिस्थापयेत् ततः पूर्वे पंचकोणे नवांगुले मंडले प्राङ्मुखं शुक्रं शुक्लपुष्पासतैः अन्नात्परिस्रुतेति प्र
जापतिः अश्विसरस्वतीन्द्रा ऋषयः अतिजगतीछंदः शुक्रो देवता शुक्रावाहने विनियोगः ॐ अन्नात्परिस्रुतो
रसं० ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवसगोत्र शुक्र इहागच्छेत्यावाह्य इहतिष्ठेतिस्थापयेत् ततः पश्चिमे
धनुषि द्व्यंगुले मंडले प्रत्यङ्मुखं शनिं कृष्णपुष्पासतैः शन्नो देवीरिति दध्यङ्ङाथर्वण ऋषिः त्रिष्टुप्छंदः शनिर्दे
वता शन्यावाहने विनियोगः ॥ शन्नो देवि० सौराष्ट्रदेशोद्भव काश्यपसगोत्र शनैश्चर इहागच्छेहतिष्ठेतिस्थाप
येत० ततो नैरृत्ये शूर्पाकारे द्वादशांगुले मंडले दक्षिणाभिमुखं राहुं कृष्णपुष्पासतैः कयानश्चित्र इति वा
मदेव ऋषिः गायत्रीछंदः राहुर्देवता राह्वावाहने विनियोगः कयानश्चित्र० ॐ भूर्भुवः स्वः राठिनापुरोद्भव पैठिन
सगोत्र भो राहो इहागच्छेहतिष्ठस्थापयेत् ततो वायव्ये ध्वजाकारे षडंगुले मंडले दक्षिणाभिमुखं केतुं धूम्र
पुष्पासतैः केतुं कृण्वन्निति मधुच्छंद ऋषिः गायत्रीछंदः केतुर्देवता केत्वावाहने विनियोगः केतुं कृण्वन्न०

अंतर्वेदिसमुद्भवजैमिनिसगोत्रकेतो: इहागच्छेत्यावाह्य इहतिष्ठेतिस्थापयेत ॥ अथाधिदेवता ॥ अथय
थालाभोपन्नैः कुसुमतंडुलैस्थापयेत सर्वे आदित्याभिमुखास्थाप्याः त्र्यंबकमितिवसिष्ठऋषिः अनुष्टुप्छं
दः रुद्रोदेवताईश्वरस्थापनेविनियोगः त्र्यंबकंयजामहे० सूर्यस्यदक्षिणपार्श्वेईश्वरं श्रीश्चतेतिनारायणऋ
षिः त्रिष्टुप्छंदः उमादेवताउमास्थापनेविनियोगः ॐश्रीश्चतेलक्ष्मी० ईशान ॐभूर्भुवःस्वः सोमस्यदक्षिण
पार्श्वेउमां० यदक्रंदइतिभार्गवजमदग्निर्दीर्घतमऋषयः त्रिष्टुप्छंदः स्कंदोदेवतास्कंदावाहनेविनियोगः
ॐयदक्रंदः प्रथमजायमान० ॐभूर्भुवःस्वः भौमस्यदक्षिणपार्श्वेस्कंदं० इदंविष्णुरितिमेधातिथिऋषयः
गायत्रीछंदः विष्णुर्देवताविष्णोरावाहनेविनियोगः ॥ विष्णोर्नुकंविष्णो० ॐभूर्भुवःस्वःबुधस्यदक्षिणपार्श्वे
विष्णुं० ब्रह्मजज्ञमितिप्रजापतिऋषिः त्रिष्टुप्छंदः ब्रह्मादेवताब्रह्मावाहनेविनियोगः ब्रह्मजज्ञानंप्रथमं
० ॐभूर्भुवःस्वः बृहस्पतिर्दक्षिणपार्श्वेब्रह्माणं त्रातारमिंद्रस्यगर्गऋषिः त्रिष्टुप्छंदः इंद्रोदेवताइंद्रावाह
नेविनियोगः ॥ सजोषाइंद्रसगणोमरुद्भिः० तोनः ॐभूर्भुवःस्वःशुक्रस्यदक्षिणपार्श्वेइन्द्रं असिपमः भार्गवो
जमदग्निर्दीर्घतमाऋषयः त्रिष्टुप्छंदः यमोदेवता ॐभूर्भुवःस्वःशनिर्दक्षिणपार्श्वेयमं यमायत्वा० पित्रे
कार्षिरितिप्रजापतिऋषिः अनुष्टुप्छंदः कालोदेवताकालावाहनेविनियोगः कालऋषिसिसमुद्र० यधीः
भूर्भुवःस्वःराहुर्दक्षिणपार्श्वेकालं विश्वावसोइतिऋषिः अतिजगतीछंदः चित्रगुप्तोदेवताचित्रगुप्तावाह
नेविनियोगः ॥ ॐविश्वावसोस्वस्तितेपारमशीय ॐभूर्भुवःस्वः केतुर्दक्षिणपार्श्वेचित्रगुप्तं इत्यधिदेवताः
॥ अथप्रत्यधिदेवतास्थापयेत ॥ ॥ अग्निंदूतमितिविरूपाक्षऋषिः गायत्रीछंदः अग्निर्देवताअग्न्यावाहने
विनियोगः अग्निंदूतंपुरोदधे० ॐभूर्भुवःस्वःसूर्यस्यवामपार्श्वेअग्निं अपःपिन्वेतिदेवाऋषयः देविहह
तीछंदः आपोदेवताअपामावाहनेविनियोगः देवीरापो० ॐअपान्नपादो०हा ॐभूर्भुवःस्वःसोमस्यवाम
पार्श्वे आपं० स्योनापृथिवीतिमेधातिथिऋषिः गायत्रीछंदः पृथिवीदेवताभूम्यावाहनेवि० स्योनापृथिवि

उत्स०
प०
१६

इदंविष्णुरितिमेधातिथिः गायत्रीछंदः विष्णुर्देवताविष्णोरराटमसिविष्णोः० ॐभूर्भुवःस्वः बुधस्यवामपार्श्वेविष्णुं सजोषाइंद्रेतिविश्वामि त्र‌ऋषिः त्रिष्टुप्छंदः इंद्रोदेवताइंद्रावाहनेविनियोगः सजोषा इन्द्रसगणोमरुद्भिः० त्रातनः ॐभूर्भुवःस्वः भौमस्यवामपार्श्वेभूमिं इदंविष्णुरितिमेधातिथिः

नोभवा० प्रथा: ॐभूर्भुवःस्वः भौमस्यवामपार्श्वेभूमिं इदंविष्णुरितिमेधातिथिः गायत्रीछंदः विष्णुर्देवताविष्णोराटमसिविष्णोः० ॐभूर्भुवःस्वः बुधस्यवामपार्श्वेविष्णुं सजोषाइंद्रेतिवि
ष्ण्वावाहनेविनियोगः विष्णोरराटमसिविष्णोः० ॐभूर्भुवःस्वःबुधस्यवामपार्श्वेविष्णुं सजोषाइंद्रेतिवि
श्वामि त्र‌ऋषिः त्रिष्टुप्छंदः इंद्रोदेवताइंद्रावाहनेविनियोगः सजोषा इन्द्रसगणोमरुद्भिः० त्रातनः ॐभूर्भु
वःस्वःबृहस्पतिवामपार्श्वेइन्द्रं अदित्यैरास्नेतिदध्यं ० गाथर्वणऋषिः यजुः छंदः इन्द्राणीदेवताइन्द्रा
ण्यावाहनेविनियोगः॥ अदित्यैरास्नासीन्द्राण्या० ॐभूर्भुवःस्वःशुक्रस्यवामपार्श्वेइन्द्राणींप्रजापतीतिहिर
ण्यगर्भऋषिः त्रिष्टुप्छंदः प्रजापतिर्देवताप्रजापत्यावाहनेविनियोगः॥ प्रजापतेनत्वदेवता० गांस्वाहा०
ॐभूर्भुवःस्वःशनिवामपार्श्वेप्रजापतिं नमोस्तुसर्पेभ्यइत्यस्यप्रजापतिऋषिः अनुष्टुप्छंदः सर्पोदेवता
सर्पावाहनेविनियोगः नमोस्तुसर्पेभ्योजेकेच० नम: ॐभूर्भुवःस्वःराहुवामपार्श्वेसर्पान् ब्रह्मजज्ञानमित्य
स्यप्रजापतिऋषिः त्रिष्टुप्छंदः ब्रह्मादेवताब्रह्मावाहनेविनियोगः॥ ब्रह्मजज्ञानंप्रथमं० ॐभूर्भुवःस्वः

केतुवामपार्श्वेब्रह्माणं आवाहयामि विनायकादिपंचलोकपालान्स्थापयेत्० गणानांत्वेतिप्रजापतिऋषि
अनुष्टुप्छंदः गणपतिर्देवतागणपत्यावाहनेविनियोगः॥ गणानांत्वागणपतिंहवामहे० धम एहोत्त
रतोगणपतिं० अंबेअंबिकेतिप्रजापतिऋषिः अनुष्टुप्छंदः दुर्गादेवतादुर्गामावाहनेविनियोगः॥ ॐअं
बेअंबिकेंबालिकेनमा० शिनीम० मनेरु त्तरतोदुर्गां आनोनियुद्भिरित्यस्यवसिष्ठऋषिः त्रिष्टुप्छंदः वायु
र्देवतावाय्वाहनेविनियोगः आनोनियुद्भिः० नः रवेरुत्तरतोवायुं उर्ध्वोअधस्येतिप्रजापतिऋषिः विराट्
छंदः घृतंघृतपावानःपिबत० हा एहोदक्षिणआकाशं यावांकशेतिमेधातिथिऋषिः गायत्रीछंदः अ
श्विनौदेवताकेतोदक्षिणे अश्विनौ जावांकशामधु० नम। अथगरुत्मतं सुपर्णोसीतिप्रजापतिऋषिः॥:
चतुरवसानाकृतीछंदः गरुत्मंदेवतागरुत्मदावाहनेविनियोगः सुपर्णोसिगरु त्मान्पृष्ठेपृथिव्यांसीद० आवाह
नंपरमेष्ठिनः॥ विशांपायंहरेन्नित्यंमतः शांतिंप्रयच्छमे॥ इतिमंत्रेणप्रार्च्यवेद्यांस्थापयेत्॥ उत्तरेसेत्रा

अस०
प०
४२

धिपतिंवास्तोष्पतिंचैकेवाहयेदितिवदंति॥नहिस्पशमित्यस्यविश्वामित्रऋषिः त्रिष्टुपछंदः वैश्वानरोदेवता
ॐनहिस्पशं क्षेत्राधिपतिं आवाहयामि वास्तोष्पतेइतिवशिष्ठऋषिः त्रिष्टुपछंदः वास्तोष्पतिर्देवतावास्तो
ष्पमावाहनेविनियोगः॥ॐवास्तोष्पतेप्रतिजानी० वास्तोष्पति० ततः इंद्रादिलोकपालानांमावाराग्नस्त्यो
भिमुखांस्थापयेत्॥इंद्रं अग्निं यमं।निर्ऋतिं।वरुणंवायुं।सोमं।ईशानं।ब्रह्माणं।अनंतं।ततः रवेपूर्वेशेषं
स्थापयेत् नाममंत्रेण।सोमस्याग्नेवासुकिं।भौमस्याग्नेतक्षकं।बुधोत्तरेककोटकं।बृहस्पते रग्रेपद्मं।शुक्रो
ऽग्ने महापद्मं।शनिपश्चिमेशंखपालं।राहोपुरतः।कंबलं।केतोःपुरतःकुलिकं।ततोवहिर्भूमंडले।पूर्वतः।
पांदिसप्त नक्षत्राणि।विष्कुंभादिसप्तयोगानि।ववबालवकरणे।सप्तद्वीपानि।ऋग्वेदंदक्षिणे।पूष्या।
नक्षत्राणि।धृत्यादिसप्तयोगानि।कौलवतैतिलकरणे।सप्तसागरान्।यजुर्वेदं।पश्चिमेस्वात्यादिस
प्ताणि।वज्रादिसप्तयोगानि०।गरवणिजकरणे।सप्त,पातालानि।सामवेदंउत्तरे अभिजिता दि।

सप्तनक्षत्राणि।साध्यादिषड्योगः॥विष्टिकरणं।भूराद्याःसप्तलोकाः॥अथर्ववेदं।वायव्योध्रुवं।सप्तऋषी
न् ततोयथावकाशंगंगादिसप्तसरितः।सप्तकुलाचलाः ल।द्वादशादित्याः।एकादशरुद्राः।ए
कोनपंचाशन्मरुतः।षोडशमातरः।षट् ऋतवः।द्वादशमासा ।पंचदशतिथयः।षष्टिसंवत्सराः।सुप
र्णाःनागाः।गंधर्वाः।विद्याधराः।अप्सरसः।रक्षांसिभूता ाः॥इत्येतेस्थाप्याः।मनोजूतिरितिमति
ष्ठा॥तेषांहोमेनह्यानं॥मत्स्यपुराणे॥ ॥पद्मासनः ह्मगर्भसमद्युतिः॥सप्ताश्वरथसंस्थ
श्चद्विभुजःस्यात्सदारविः॥१॥ ॥श्वेतःश्वेतांबरधरोदश भूषणः॥गदापाणिर्द्विबाहुश्चकर्तव्योवर
दःशशी॥२॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः॥चतुर्भुजोमेषगमोवरदःस्याद्धरासुतः॥३॥पीतमा
ल्यांबरधरःकर्णिकारसमद्युतिः॥खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधः॥४॥देवदैत्यगुरूतद्वत्पी
तश्वेतौचतुर्भुजौ॥दंडिनौवरदौकार्यौसाक्षसूत्रकमंडलू॥५॥इंद्रनीलद्युतिःशूलीवरदोगृध्रवाहनः

उत्स० ॥वामवामासनधरः कर्तव्योर्कसुतः सदा॥६॥ करालवदनः खड्गचर्मशूलीवरः सदा॥नीलसिंहासनस्थ
पु० स्त्वाहुरत्र प्रशस्यते॥७॥ धूम्राद्विबाहवः सर्वे गदिनो विकृताननाः॥गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः
१८ ॥८॥सर्वे किरीटिनः कार्या ग्रहलोकहितावहाः॥अंगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं शतं ॥९॥ ततः षो
डशोपचारैः पूजा॥ आकृष्णेनेत्यादि पूजा।स्थापित देवता पूजनं॥ततः प्रभृति आहोमसमाप्तेर्गंधकुसु
मादिभिः पूजनीयाः प्रत्यहं॥ततो ग्रहवेदीसमीपे भूमौ पूर्वं नाममंत्रैः ग्रहदेवताभ्यो बलिं दद्यात्॥सू
र्याय गुडौदनं।सोमाय घृतपायसं।कुजाय मसूरान्नं।सौमीव नंबुधाय।दध्योदनं बृहस्पतये।घृतौदनं।
शुक्राय। अमांसं संशनिश्चराय।पायसं राहवे।चित्रौदनं केतवे।अन्येभ्यः पायसं।ततो ग्रहवेदीशानभा
गे॥ अव्रणकलशं मही द्यौरिति पूर्ववत्कलशं स्थापयेत् तत्वायामीति वरुणमावाहयेत्पूजयेत्॥
तं अस्मिन्कलशे गंगाद्यावाहनं॥ इति ग्रहपूजा॥ पंचभूसंस्कारादि अग्निस्थापनोत्तरं सर्वेपदार्थास्त

णाकर्तव्यं॥तत्र पर्युक्षणानंतरं यजमानेन द्रव्यत्यागः कार्यः स च बहुकर्तृके यथाकालमन्वाहु।
गत्वा सर्वमेव होमद्रव्यजातं मनसा ध्यात्वा देवताभ्यो यथादैवमस्तु न ममेत्येवंरूपः॥ ॥ततो म
हस्मध्ये पंचरत्नकूर्ममकरादियुतां सुवर्णपात्रीं इमंमे वरु [illegible] येत।ततो मंडलमध्ये वरुणो ब्रह्मा रुद्र
श्च विष्णुर्गणपतिरम्बिका।भूतग्रामाश्च एते वै स्थाप्य [illegible] षीः तासां मूर्तिनां प्रमाणानि।महाभारते।
दानधर्मे हैमं च प्रकुर्वीत प्रधानप्रतिमां तथा॥समानेन [illegible] बिंबं यथाशक्ति तथैव च॥विष्णुधर्मोत्त
रे॥पलमात्रं सुवर्णं वा प्रतिमां कारयेच्छुभं तदर्द्धं वा प्रकुर्वी [illegible] शाठ्यं न कारयेत्॥इदं च वारुणविषयं॥
अन्यासां मूर्तीनां यथाशक्त्यनुसारेण कर्तव्याः॥ मत्स्यपु [illegible] ॥उत्सर्गे तु प्रतिमानां प्रमाणं परिकीर्ति
तं॥सुवर्णेन प्रकर्तव्यं यथाविभवसंभवः॥सुवर्णाद्यभा [illegible] डलमध्ये एव ब्रह्माणं ब्रह्मजज्ञानमि
ति।तत्रैव नमः॥शंभवायेति शिवं।तत्रैव इदं विष्णुरिति विष्णु।तत्रैव गणानां त्वेति गणपतिं।गंधद्वारां

प्रस० प० १७

श्रियं। अंबे अंबिके अंबा। तत्रैव आपंत्रतद्रविणमिति भूतस्थानं। एवं देवतास्थापयित्वा॥ स्वस्वनामंत्रे
णप्रतिष्ठाप्य पूजयेत्॥ कस्तूरीयुतं चंदनं नानाविधास्रजः। नानाविधाश्च धूपाणि नानाविधानि खाद्यानि
पट्टकूलानि वस्त्राणि सौवर्णादक्षिणामुख्य देवतान्वाहिरे। पूजाकार्या तत्रापि स्तंभचतुःकोणेषु चत्वा
रः कुंभास्थाप्याः। पूर्ववत् एवं पूजासमाप्य स्थापितदेवतानां यथाक्रमेण बलिदानं कुर्यात्॥ अथवा पूजा
यस्य देवस्य कृता तदानीमेव तस्य देवस्य बलिर्देया॥ ततः प्राक्कुंडसमीपे कलशस्थापनं कुर्यात् विधिना॥
कुंडप्राग्भागे गोमयोपलिप्तदेशे धान्यादिकृत चतुर्ध्वे हरिद्रा... रजसा चतुर्विंशतिदलं कमलं कृत्वा तत्कर्णि
कायां पश्चादिना सुपरिष्कृतं रक्तवहिर्व्यस्त्रभूषितं कलशं। ओं धयइति यवान्निक्षिप्य० आ जिघ्रेति
कलशं स्थापयेत्॥ इमं मेति तीर्थादिवारिणा किंचिदुदकं पूरयेत् अश्वत्थेवेति पंचपल्लवान्॥ परिवाजप
तिरिति पंचरत्नानि॰ स्योना पृथिवीति सप्तमृदः॥ या ओषधीरिति सर्वौषधीः। गंधद्वारामिति गंधं। आयन्य

गोमूत्रं। मानस्तोके इति गोमयं। आप्यायस्वेति क्षीरं दधिक्राव्ण इति दधि:। तेजोसीति घृतं देवस्यत्वेति कुशो
दकं। कांडात्कांडादिति दूर्वा। याः फलिनीरिति फलं। कलशे ... युवासुवासा वस्त्रं। हिरण्यगर्भ इति हिर
ण्यं। ततो वरुणं पूजयेत्। ॐ गंगाद्याः सरितः सर्वाः सरांसि जल ... दाः॥ आपातु यजमानस्य दुरितक्षयकार
काः॥ अश्वत्थो भास्करो गंगा नैमिषारण्यमेव च॥ एतानि स ... नि घटेस्मिन्निवसंतु मे॥ सरस्वती गंडकी
चर्मण्वती शरयू तथा॥ एता अन्याः सरितः सर्वाः कलशे संतु मे ... गेच० इमं मेति आपो हिष्ठेति तिसृभिश्च
तीर्थानि न्यसेत्॥ पूर्णा दर्वीति यथादिशं रत्नं सुवर्णं न्यसेत्॥ ... तं केवलाग रक्षमाणाय॥ ॐ येन बद्धो ब
ली राजा दानवेंद्रो महाबलः॥ तेन त्वामपि बध्नामि रक्षमा च ... लेति॥ ॐ जदाबध्नं दाक्षायणा यजमान
हस्ते आचार्यो बध्नीयात्। यजमानो आचार्यहस्ते आचार्योपि अन्येषामृत्विजां पाणिकानां च दक्षिण
हस्ते बध्नीयात्॥ ततः आचार्यः आचम्य द्वारपालान् पुष्पगंधादिनाभिपूज्य पठध्वमिति प्रेष्येत्॥ यजध्वमि।

उ.स० मिहोत्रतुल्हस्वमंचजप्येन्मिं तत्र ध्वमितिआपकान् सएवमेप्येन ततः आचार्यऋत्विजश्चस्वेस्वेकुंडेस्वस्वशा
प० खोक्तविधिनाग्निप्रणयनादनंतरंभाविकर्मकुर्युः॥ तत्रप्रतिकुंडमिध्माधानानंतरंयजमानाचार्यप्रभृतिकुंड
२० दक्षिणउपविश्यसकुशयवजलमादाय॥ ॐ अद्येत्यादि अमुकजलाशयोत्सर्गकर्मणि इदं हविर्द्रव्यं वह्
णादिविश्वकर्मांतेभ्यः पूर्वोत्तरगदेवताभ्य श्च होतुं मयात्यक्तं नममेति प्रतिकुंडद्रव्यत्यागं कुर्यात्॥ बहु
भिर्होतृभिर्होमे क्रियमाणे मंत्रांतेहुत्यागस्यैकेन कर्तुमशक्तेः॥ ततोजापकैर्द्वारपालैश्च जपे क्रियमाणे हो
मः कार्यः॥ होमक्रमस्तु यथा॥ दर्भैः परिसमुह्य॥ गोमयेनोपलिप्य॥ स्रुवेणोल्लिख्य॥ उदकेनाभ्युक्ष्य॥ अग्नि
मुपसमाधाय॥ दक्षिणतो ब्रह्मासनं॥ उत्तरतः प्रणीतासनं॥ अग्नेः पूर्वेण ब्रह्मणो गमनं॥ अस्मिंस्तडागोत्सर्गक
र्मणि ब्रह्मा भव॥ भवानीति प्रतिवचनं॥ प्रणीताप्रणयनं॥ अंतरिक्षे पूर्णं स्थापनं॥ आलंभनं॥ अग्नेरुत्त
रतो निधानं॥ परिस्तरणं॥ अग्नेरीशानादि पात्रासादनं॥ पवित्रच्छेदनार्थं दर्भास्त्रयः॥ पवित्रे द्वे॥ प्रोक्षणीपात्रं

आज्यस्थाली॥ चरुस्थाली॥ संमार्जनकुशाः॥ पंच उपयमनकुशाः॥ सप्त समिधस्तिस्रः॥ स्रुवं आज्यं॥ तंडुलाः ह
...पूर्णपात्रं दक्षिणा... निधाय॥ द्वौ मूलेन प्रदक्षिणीकृत्य॥ द्विर्मोट्य॥ छित्वा त्यजेत्॥ प्रोक्षणी त्रिः पूरणं॥ प्रणीतोदके
न॥ अनामिकांगुष्ठाभ्यां उत्तराग्रं... हस्तीकरणं॥ पवित्र निधानं॥ उत्पवनं॥ उद्दिंगनं॥ ता॰ ...प्रोक्षणीमेव प्रोक्षण मिति सर्वत्र॥ चरुस्थाल्याः
संमार्जनकुशानां॥ उपयमनकुशानां॥ समिधां॥ स्रुवस्य॥ आ॰ ...॥ तंडुलानां प्रोक्षणं पूर्णपात्रस्य॥ आसंचरे
प्रोक्षणी निधानं॥ आज्यस्थाल्यामाज्यनिर्वापः॥ चरुस्थाल्यां प्र... दकमासिच्य॥ प्रक्षालित तंडुल प्रक्षेपः॥
आज्याधिश्रयणं॥ दक्षिणतः चरोः अधिश्रयणं मुत्तरतः उ... पर्यग्निकरणं॥ अर्द्ध श्रुते स्रुवस्य प्रतपनं॥
संमार्जनकुशैः स्रुव मार्जनं पुनः प्रतपनं॥ देशे निधानं॥ आ... तनं॥ चरोरुद्वासनमाज्यमपरेण॥ आ
ज्योत्पवनं॥ प्रोक्षण्याः प्रत्युत्पवनं॥ आज्यावेक्षणं॥ अपद्रव्य... नं॥ उपयमनकुशादानं॥ तिष्ठन् समिधादा
नं॥ प्रोक्षण्युदकशेषेण अग्नेः॥ पर्युक्षणं॥ ब्रं॰ ध्यानमयनाभ्यां ...दर्शतिथिभ्यः॥ षष्टिसंवत्सरेभ्यः॥ सुपर्णे

उत्स० प० ३१

भ्यः॥नागेभ्यः॥सर्पेभ्यः॥यक्षेभ्यः॥गंधर्वेभ्यः॥विद्याधरेभ्यः॥अप्सरोभ्यः॥यक्षेभ्यः॥भूतेभ्यः॥मनुष्येभ्यः॥ततः स्विष्ट
कृद्धोमः॥ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते न मम॥ संस्रवप्राशनं॥पवित्राभ्यां मार्जनम्॥०
अग्नौ पवित्रप्रतिपत्तिः॥ब्रह्मणे पूर्णपात्रं॥ब्रह्मन् तडागोत्सर्गकर्मणि सांगतासिद्ध्यर्थं पूर्णपात्रं संप्रददे न म
म त्यागः॥बलिदानं० इन्द्रादीनां पूजनं॥ततः इंद्राय सांगाय सपरिवाराय सशक्तिकाय एष माष भक्त बलिः
दिशां रक्ष बलिं भक्ष यजमानस्य अभ्युदयं कुरु। एवमग्ने। यमाय नैर्ऋतये। वरुणाय। वायव्ये कुबेराय॥ईशाना
य० ब्रह्मणे० अनंताय० पश्चात्क्षेत्रपालपूजनं॥एतावद्द्वारि कृत्यं॥द्वारपालजप्यान्युच्यन्ते॥तानि च पठध्व
मिति वै वेदंते पठनीयानि॥पूर्वे द्वारपालः श्रीसूक्तं पावमानं चसोमसूक्तं सुमंगलं शान्त्यध्यायं चेंद्रसूक्तं चर
हं द्वनेतिव हूकचो॥ श्रीसूक्तं॥ हिरण्यवर्णां पंचदशर्चं० पावमानं स्वादिष्ठया मदिष्ठयेत्यादि॥शाकुनं
शान्त्यध्यायः॥ शंन इंद्राग्नी इति वर्गत्रयं॥ इन्द्रसूक्तं यो जात इत्यादि॥१॥ दक्षिणे तु द्वारपालो रुद्रान् पु

रुषसूक्तं तथा शाकाध्यायं तथैव च॥ शुक्रियं सौरसूक्तं च मंडलाध्यायमेव च॥ रुद्रान् नमस्ते पुरुषसूक्तं० सहस्र
शीर्षा शाकाध्यायं देवस्य त्वा सवितः॥ शुक्रियं कृच्छं वाचं॥मंडलाध्यायः। यदेतन्मंडलं तपति॥पश्चिमे सामवेदि
नो॥ वामदेव्यं बृहत्साम ज्येष्ठसाम रथंतरं॥ तथा पुरुषसूक्तं च रुद्रसूक्तमतः परं॥ आज्यदोहानि सामा
नि शांतिकाध्यायमेव च॥ भारुंडानि च सामानि पश्चिमे सामगौ स्थितौ॥वामदेव्यं कया श्चित्रां बृहत्साम त्वा
मिद्धि हवामहे॥ ज्येष्ठसाम मूर्द्धानं दिव इति रथंतरं अभि त्वा शूर अस्यां गीतं सर्वत्र सहस्रशीर्षा पुरुष इत्ये
तासु गीतं। रुद्रसूक्त आ वो राजानमिति वर्गद्वयं॥ रुद्रसंहिता त्र्यं० आज्यदोहानि देवव्रतानि त्येतानि शां
तिकाध्यायः॥ अबोध्यग्निरित्यादि॥ भारुंडानि इमं स्तोममित्यादिगीतानि॥ उत्तरे अथर्ववेदिनौ॥ अथर्वा
गिरसं नीलरुद्रं चैवापराजितं॥ देवीं चमधसूक्तं च रोधसं शांतिकाध्यायनं॥ अथर्वणो द्वारपालो पठेत्ता
सुनेरस्थितौ॥ अथर्वणं ब्रह्म देवा पहहृदयेत्यादि॥ आंगिरसं अंगिरसो जन्मानीत्यादि नीलरुद्र आ

प्र० पलेषित्यादि॥ अपराजिता॥ देविपभिवत्मेनीत्यादि। अपराजिता॥ मधसूक्तं॥ मधुवाता ऋतायते इत्यादि॰ रो
१० धसंश्च भपं द्यावापृथिवीत्यादि शांतिकाध्यायः॥ शन्न इंद्राग्नी भवतामित्यादि॥ अथ जापक जप्यानि॰ रात्रिसूक्त
४२ च रौद्रं च पावमानं कूश्मंगलं॥ जपेयुः पौरुषं सूक्तं पूर्वतो बह्वृचो पृथक्॥ रात्रिसूक्तं रात्रिव्यख्यदेवते त्यादि॥
रौद्रं इमा रुद्राय तवसे त्यादि। पावमानं स्वादिष्ठये त्यादि। कूश्मंगलं कनिक्रदज्जनुषं। पौरुषं सहस्रशीर्षेति॰ शा
कं रौद्रं च सौम्यं च कौश्मांडं जातवेदसं॥ सौरसूक्त जपेरंस्ते दक्षिणेन यजुर्विदो॥ शाक्रमाशुः शिशान इत्यादि॰
रौद्रं इमा रुद्राय तवसे। सौम्यं सोमो धेनुमिति॰ कौश्मांडं यद्देवा देवहेडनं॥ जातवेदसं जातवेदस इत्यनुवाकः॥ :
सौरं विभ्राड् बृहत्पिबतु॥ वैराजं पौरुषं सूक्तं सौवर्णं रुद्रसंहिता॥ शैशवं पंचनिधनं गायत्रं ज्येष्ठसाम च॥
वामदेव्यं बृहत्साम रौरवं सरथंतरं॥ गवां व्रतं विकर्णं च रक्षोघ्नं च यशस्तथा॥ गायेयुः साम गास्तु जन्यश्चैव तु पा
र॰ अतो॰ वैराजं पिवसोममदंतु॥ पौरुषं सहस्रशीर्षा॰ सौवर्णं उद्यदं मित्रजा मध्यमित्यादि त्रीणि समानरुद्रसं

हिता॥ आवो राजानमित्यादि। शैशवं उद्यते जातमंधसः पंचनिधनं हस्याबोत्तं वामदेव्यं॰ कयानश्चित्रेति॰
यज्ञं नानस विश्रुविति॥ ज्येष्ठसाम मूर्धानं दिव इत्यादि॥ वामदेव्यं॰ कयानश्चित्रेति बृहत्साम त्वामिद्धि हवाम
हे॥ सौम्यं सोमव्रतं सते पयो स्तिरौरवं पुनानः॥ सोमेति रथंतरं अभित्वा शूरनोनुम इति॰ गवां व्रतं तमन्वतेश्व
यं अग्नीमीडे इत्यन यो गीत साम हृयं। विकर्णं विभ्राड् बृहत् रक्षोघ्नं अग्ने रक्षणः अग्ने युक्ष्वाही त्येतयोः ४
गीतं यशः बृहदिंद्राये त्यत्र गीतं। अथर्ववेणोत्तरतः। शांतिपाठं पौष्टिकं तथा॥ जपेयुर्मंत्र सादेव नाम्नि त्यवरु
णां भृंगु॥ शांतिकं पौष्टिकानि॥ शन्न इन्द्राग्नीत्यादि। सर्वेष्वेतेषां समावरुणां आपं तोजपेयुः॥ सर्वेष्वेतेष्वक्रपो
ते स्वस्वशाखीप वरुणा सूक्त जपो पिकार्य इति कश्चित॥ एतानि वैदिक प्रसिद्धानि स्मार्तानि होमानंतरं जापकै
र्जप्यानि जपेयुः॥ सर्वे इति कश्चित॥ ततो होमः कार्यः॥ ॥ ततो यूपारोपणविधिः॥ ॥ जलाशयोत्तरा
दीशाने वा यूपो च तृतीयांशं गंभीरं गर्त्तं खानइत्वा॥ ध्रुवासीति मंत्रेणारखनेत॥ यूपंहरिद्रागंधैस्ताभ्यां अभ्यक्तं मौ

योदकस्नापितगौरसर्षपगोरोचनगुग्गुलदर्भानिंबपत्रगर्भां पोटलिकां बध्वा युवा सुवासा इतिवासस्त्रावेष्टितं
यूपंकृत्वा यूपव्रस्का इति यूपमालभ्य। उच्छ्रयस्व वनस्पत इत्युच्छ्रित्य यूपगर्ते अक्षतपुष्पदर्भान् क्षिप्त्वा यूप
मुद्दकेनयोस्य निवेशनः शंनइति निवेश्य पशापस्तावइति मूले जलाभिषिंच्य॥ यूपं कुंकुमेनांत्वा गंधपुष्पैर्नैवे
द्यपूगीफलदक्षिणां दत्वा॥ लोकपाला एकब्रह्म विष्णु शिवान् यूपे पूजयेत॥ ततो बलिदानं॥ एहि धर्मध्वज
यज्ञनाथ ॥ मयो वेदशरीर यूप॥ विधाय देत्य यज्ञरक्षां बलिं गृहाण भगवन्नमस्ते॥ यूपाय एष बलिर्नमः॥ ततः
शाम: पर्वते इति कुंकुमारक्तसूत्रेणावेष्ट्य॥ पर्वतस्येति पर्वतान वरुणां दिक्पालांश्च यूपे गंधपुष्पैः संपूज्य॰
कृतांजलिपूर्वो भूत्वा वरुणं ध्यात्वा इदं स्तवः पठेत॥ देहि मे तु महेयूपप्रतीरकुरुसुप्रभो॥ मूलच्छेदनपत्नाप
॥मिश्रनेन पातकं॥ अदुष्ट यूपघातो यं यूपः पापं व्यपोहतु॥ पद्माल्पे पत्र कौमारे यत्पापं वार्धके कृतम्॥
तत्सर्वं मम देवेश यूपः पापं व्यपोहति॥ यन्निशायां तथा प्रातर्मध्याह्नादुपराह्णयोः॥ संध्ययोश्च कृतं पापं कर्म

णामनसा गिरा॥ सर्वं तन्मम देवेश यूपः पापं व्यपोहतु॥ येन केन निमित्तेन कर्त्ता पापं तु कारयेत॥ तस्य पापेन लि
प्यते नैव स्पृश्यश्च्यते॥ ततो या औषधीरिति पुष्पमालां बध्वा यूपं प्रदक्षिणीकृत्य गाढमालिंग्य पुत्रपौ
त्रादियुतो नमस्कुर्यात॥ केचिदालिंग्य स्नात्वान्यानि वासांसि धारयेत॥ इति वदंति॥ ततो वैतरणीं कुर्यात
ततो ज्योतिर्विदुक्ते शुभलग्ने कनकशृंगादि भूषितांगां गंधादिना संपूज्य गां कंठाभरणभूषितां हेमशृंगीं रौ
प्यखुरां सवत्सां नरश्रीं शुभां॥ कांस्यदोहनसंयुक्तां ताम्रपृष्ठसमन्वितां॥ कपिलां पूजयेद्देवीं सर्वपापप्रणाशि
नीं॥ मातुर्वीतामवस्था प्रसवत्सां गां च पूजितां॥ पुच्छदेशे तु दातव्यास्ता तो वह्निशिखो भवेत॥ गोपूजनं कु
र्यात॰ अत्र गंधपुष्प अक्षत पुष्पाणि दत्वा॥ अथांगपूजा॥ शिरसि ब्रह्मणे नमः॥ ललाटे गरुडध्वजा
यनमः॥ मुखे रुद्राय॰ कर्णयोरश्विभ्यां॰ चक्षुषि भास्कराय॰ दंतेषु पार्वत्यै॰ जिह्वायां सरस्वत्यै॰ गोमये स
र्वतीर्थाय॰ मूत्रे गंगायै॰ रोमकूपे ऋषिभ्यो॰ पृष्ठे वैवस्वताय॰ वामपार्श्वे प्रजापतये दक्षिणपार्श्वे तेजस्विने॰

खुरमध्येगंधर्वाय॰ खुराग्रेपन्नगाय॰ खुरदक्षिणभागे अमरगणाय॰ गोमयेलक्ष्म्यै॰ हुंकारेचतुर्वेदेभ्यो
नमः॥ अंगेषुसर्वदेवेभ्यो॰ हुंभारवशब्देप्रजापतये॰ स्तनेषुसागरेभ्योनमः इतिसंपूज्यधूपदीपनैवेद्यंयवगुड
मिश्रितमन्नावस्त्रंघंटाचामरं अर्पयित्वा।पुष्पांजलीदद्यात्।ब्राह्मणैःशांतिपाठे।पठ्यमानेगवीनव्यानव्युनौक्रि
यमाणे इरावतीधेनुमतीहीत्यनेनजलेगामीशानाभिमुखीमवतारयेत्।तत्रतंगामनुनमयेत्। अनेनमंत्रेण॥इ
दंसलिलंपवित्रंकुरुष्व शुद्धाःपूता अमृताःसंतुनित्यं मांतारयंति कुरुतीर्थाभिषेकं लोकांतरेतेतीर्येतेचेति॰ वा
पीकूपोत्सर्गेतुत्रिःपरिभ्रामयेत्।ततोयजमानआचार्यौचारब्ध पुत्रयुतोपीतिकेचित्।गोपुच्छाग्रलग्नोजलेपञ्चत
रमुद्राद्भिरिति।येवाशीरोचनेइतिमंत्रद्वयंपठेत्॥ततईशान्यांपरंपारंगत्वाजानुदघ्नेजलेउदङ्मुखोगोपुच्छे।
गुरुणान्वितोयजमानःसकुशैर्यवतिलैःस्वशाखोक्तरीत्यादेवर्षिपितृणांतर्पणंकुर्यात् ॥ सव्येन॥तत्र
प्राङ्मुखोदेवान्॰ कंठंकृत्वा उदङ्मुखोऋषीन् ॥ ॥अपसव्येनदक्षिणाभिमुखः॥ ॥पितृन्त

र्पयेत्॥ततःपौराणमंत्रैरपितर्पणंकेचिदाहुः।पितापितामहश्चैवतथैवप्रपितामहः॥स्वस्वपत्नीसमेता
श्च प्रीयंतांजलतर्पणात् अजातदंतायेकेचिद्येचगर्भेव्यवस्थिताः॥तेषामुद्धरणार्थायतडागोदकतर्पणं
॥पितृवंशकाश्चयेस्माकंभ्रातरश्चसहोदराः॥गुरवोमातुलाःपुत्राः आचार्य सखिबांधवाः॥तेषांपुत्रश्चप
त्न्यश्चश्वशुराःयेसपुत्रकाः॥एतेषांक्रीडनार्थायतडागोदकतर्पणं॥बंधुवर्गाश्चयेकेचित् गोत्रनामविवर्जि
ताः॥स्वगोत्रापरगोत्रावातेभ्यश्चेदंतिलोदकं॥उद्बंधनमृतायेचसिंहव्याघ्रहताश्चये॥दंष्ट्रिभिः शृंगिभि
श्चैवतेभ्यश्चैवंतिलोदकं॥असुरादेवपत्न्यश्चमातरश्चंडिकास्तथा।दिक्पालालोकपालाश्चमहदेवाधिदेव
ताः॥तेषामुद्धरणार्थायतडागोदकतर्पणं॥अग्निदग्धाश्चयेकेचिन्नाग्निदग्धास्तथापरे॥विद्युच्चोरहता
येच तेभ्योपीदंतिलोदकं॥रौरवेचांधतामिस्रेकुंभीपाकेचयेगताः॥अनेकयातनासंस्थाप्रेतलोकेषुयेग
ताः॥पश्यंतेसंयमिन्यांयेयेनीतायमकिंकरैः॥असीपत्रवनेघोरेतेभ्योपीदंतिलोदकं॥विश्वेदेवास्तथासा

उत्स०
प०
२५

ध्याः आदित्या वसवो रुद्रगणाः ॥ क्षेत्रपीठोपपीठानि नद्यश्चैव ससागराः ॥ पाताले नागपत्न्यश्च नगाश्चैव सपर्वताः
पिशाचा गुह्यकाः प्रेता नागा गंधर्वराक्षसाः ॥ पृथिव्यापश्च तेजश्च वायुराकाश एव च ॥ तेऽपि वै तृप्तिमायांतु
तडागोदकतर्पणात् ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः ॥
ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रियालोपगताश्चैव जात्यंधाः पंगवस्तथा ॥ विरूपा आमगर्भा
श्च ज्ञाताज्ञाताः कुले मम ॥ तेभ्योऽदत्तं तडागस्थं जलमेतत्तु तृप्तये ॥ आब्रह्मणो पितृवंशजा मातुस्तथा वं
शभवा नदीयाः ॥ वंशद्वये स्मिन् मम दासभूता भृत्यास्तथैवाश्रुतसेवकाश्च ॥ मित्राणि सख्यः पशवश्च वृक्षाः
दृष्टाश्च दृष्टाश्च कृतोपकाराः ॥ जन्मांतरे ये मम संगताश्च तेभ्यस्तडागोदकमेतदस्तु ॥ अतीतकुलकोटीनां
सप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं ॥ वापीकूपयोस्तु ॥ तडागपदस्थाने तत्पद
प्रक्षेपः ॥ तर्पणानेयजमानः ॥ पुच्छ लग्न एव ॥ आपो अस्मानित्यनेन पठनीं शान्त्यं डतीर्य ॥ सूर्यवसाद्भगव

तीहि भूया अथो वयं भगवंतः स्याम ॥ अद्धि तृणमघ्ये विश्वदानीं पिब शुद्धमुदकमाचरंतीत्यनेन जलान्निष्का
षयेत् ॥ इशान्यां दिशि उत्थाप्य प्रदक्षिणां करोति तदाहिं कवा इतीव वसुपत्नी वसूनां वत्समिच्छंतीमनसाभ्या
गात् ॥ दुहामश्विभ्यां पयो अघ्न्येयं सा वर्द्धतां महते सौभगायेत्युप विश्वं जपेत् ॥ ततः पुच्छं त्यक्त्वा धौतेवास
सोपवीताच ॥ हिरण्यचम्पदूर्वाचंदनाक्षतादिभिस्तां गां पूजयेत् ॥ ततः गोदानां गत्वेनेन पूजनं तर्पणं च कुर्यात्
॥ ततः प्रार्थना ॥ या लक्ष्मीः सर्वभूतानां या च देवे व्यवस्थिता ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ गावो
ममाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहं ॥ एवं प्रार्थ्य ॥ गोपुच्छे तर्पणं कुर्या
त् ततः कुशतिलजलान्यादाय प्राङ्मुखः सव्येन देवांस्तर्पयेत् उदङ्मुखः कंठकृत्वा ऋषयः सनकाद्याश्च भू
र्भुवः ॥ स्वर्निवासिनां ते सर्वे तृप्तिमायांति गोपुच्छोदकतर्पणात् ॥ अपसव्येन दक्षिणामुखः ॥ यमाय चतुर्द
श पितृपितामहप्रपितामह वृद्धप्रपितामह तत्पत्नी पत्नी पितृव्यादि भगिन्यादि श्वशुरगुर्वंतांस्तर्पयेत् ॥ तत्र सर्वेषां ना

उत्स० प० २६

मानिगृहीत्वा गोउष्णोदकेन तृप्यन्तामिति सर्वत्र ॥ तत्र देवेभ्य एकमंजलिं द्वौद्वौ तु सनकादिभ्यः ॥ पितृभ्यस्त्रींस्त्री
न् स्त्रीणामेकैकमंजलिं पूर्ववत्तर्पणं कृत्वा सव्यं कृत्वाचम्य गां प्रदक्षिणीकृत्य ततः कुशयवतिलान्याद
य सुवर्णशृंगी रौप्यखुरी ताम्रपृष्ठी संपाद्य कांस्यपात्रदोहनपात्रं अधः स्थाप्य इष्टदेशे कौसुंभवस्त्रयुग्मे
नाछाद्य घृतस्रुवर्णयुक्ते कांस्यपात्रे गोपुच्छं निक्षिप्य घृताक्तं कृत्वा दाता सपत्नीकः प्राङ्मुखः उपविश्य ॥
उदङ्मुखायोपविष्टाय ॥ द्विजाय प्राङ्मुखाय ॥ स्थितायाः पुच्छं ब्राह्मणाय दद्यात् ॥ तत्र क्रमः अद्येत्यादि श्री
परमेश्वरप्रीत्यर्थं गोरोमसमसंख्याविष्णुसन्निधायसर्वकामनया अमुकगोत्रप्रवराय अमुकशर्मणे ब्राह्म
णाय रुद्रदैवतामिमां गां अमुकगोत्रप्रवरोहं अमुकशर्माहं तुभ्यमहं संप्रददे ॥ न ममेति वदेत् ॰ गोपुच्छं
कुशतिलकांस्यपात्रसहितं ब्राह्मणहस्ते दद्यात् द्विजोपि कोदादिति पठेत् ॥ द्यौस्त्वा ददात्विति च ॥ ए
तान्मंत्रान्पठेत् ॥ यज्ञसाधनभूता याः विश्वस्याघप्रणाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥ गवां

मंगे वसंति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ गावो मे अग्रतः संतु गावो मे संतु पृ
ष्ठतः ॥ गावो मे सर्वतः संतु गवां मध्ये वसाम्यहं ॥ तत इरावती धेनुमतीति पठित्वा ॥ ततः देवस्यत्वेति पठित्वा दाता
प्रतिगृह्णातु भवान् ॰ इति वदेत् ॥ प्रतिगृह्णामिति प्रत्युक्ते ॰ प्रतिगृह्णामीति मां धेनुं कुटुंबार्थे विशेषतः ॥ स्व
स्तिर्भवतु मे नित्यं रुद्रमातर्नमोस्तु ते ॥ कोदादिति पठेत् ॥ ततः कृतैतद्गोदानप्रतिष्ठार्थं सुवर्णं दक्षिणां तु
भ्यमहं संप्रददे ॥ ॥ ततो गावो ममाग्रतः संतु ॰ पठित्वा गां प्रदक्षिणीकृत्य नमो गोभ्य इति नत्वा ब्राह्मणं च विसृज्य
इयं गौः आचार्याय दद्यात् ॥ ततो वाद्यादि घोषे जायमाने हरिद्राकुंकुमादिरंजिते ॥ त्रिवृता मंगलसूत्रेण ज
ष्टयेत् ॥ ततो यजमानो नूतनं श्वेतोष्णीषं शिरसि बध्वा जलांतिक उपविशेत् ॥ ततः आचार्यो वेदितः
कूर्ममकरादियुता हेममुक्तारजतप्रवालरूप पंचरत्नं महानदीजलयुतां दध्यक्षतादिभूषितां ॰
...तुर्वैश्चतुर्भिर्हारविभिर्धृतसुवर्णपात्रीमादाय स्वं पूर्वे सुरवोजले स्थित्वा कूर्ममकरौ स्वर्णौ अगाधजले

उ.सु. पूर्वाग्नेयदिशोः पश्चिमाभिमुखौ क्षिपेत्॥ मत्स्यडुंडुभौ रजतौ उदङ्मुखौ दक्षिणपश्चिमयोर्दिशोः क्षिपेत्॥ कु
प ४ लीरमंडूकौ ताम्रमयौ पूर्वाभिमुखौ वायव्यदिशि क्षिपेत्॥ आपस्तं शिशुमारकं दक्षिणाभिमुखमुदीच्यां क्षिपेत्
२२ ॥ सर्वं यजमानः त्विक उदङ्मुखो भूत्वा गाधजले ताम्रपात्रीमयवर्णेन शन्नो देवीत्यनेन गीतेन। अरण्य
नागधाम्ना पुनर्मार्गे त्रिविद्धिय मंत्रेण। आपोहिष्ठेनात्येनं न्युब्जीकुर्यात्॥ पात्रीस्थपदार्थान् जले प्रक्षिप्य॥ ता
मादाय मंडपे गच्छेयुः॥ तत्र आचार्याय दोवासांसि परिधाय हिरण्यं मेयुः॥ ततो यजमानः स्वाङ्गी षमाचार्याय प्र
यच्छति। उद्भिष्पवंधपक्षे॥ ततो यजमानो जलाशयांतिके प्राङ्मुख उपविश्य मंगलवाद्यादिघोषे जायमाने
जलाशयोत्सर्गं कुर्यात्। स्थपनारण्यणादिपक्षस्तु कूर्मादिप्रक्षेपकाले उत्सर्गस्ततः॥ पात्रीन्युब्जीकरणमित्याह॥
उत्सर्गवाक्यं तु कुशयवजलान्यादाय॥ देशकालौ स्मृत्वा सर्वपापक्षयपूर्वकरुद्रालयगमनानेककल्पावच्छिन्न
स्वर्गलोकहर्षपराहृद्यावच्छिन्नमहस्तपः॥ प्रभृति लोकांगनासहितभोगपूर्वांगनासहितपरमविष्णुपदप्राप्ति

कामोऽमुकतडागादिजलाशयवरुणदेवताकं स्नानपानावगाहनार्थमहं सर्वभूतेभ्य उत्सृजेनमनेति जलाशयं
पश्यन् उत्सृजेत्॥ प्रागुक्तार्थवादस्थानि वा फलान्युद्देश्यानि। ततो मंत्रद्वयं पठेत्। ॐ सर्वभूतेभ्य उत्सृष्टं मयैतत्
ज्जलमूर्जितं॥ रमंतु सर्वभूतानि स्नानपानावगाहनैः॥ सामान्यं सर्वभूतेभ्यो मयादत्तमिदं जलं॥ रमंतु सर्वभू
तानि स्नानपानावगाहनैः॥ सामान्यं सर्वभूतेभ्यो स्नानपानावगाहनैः॥ सोपानात्पतितो वा बाल जले चैव निमज्ज
नात्॥ मरणे चास्थिभंगे वा कर्ता दोषैर्न लिप्यते॥ तत आचार्यो गंधपुष्पदक्षिणादिभिः समासदो विप्रानभ्य
र्चयेन्नस्तु सहस्रादित्यः इत्यादि प्रागुक्त दिक्पालमंत्रैः प्राच्यादिक्रमेण इन्द्रादिभ्यो माषभक्तबलिं भूमौ दद्यात्॥
अथ सदाचारभाष्ये नागप्रत्यारोपणविधिः॥ ॥ तत्राचार्यो॥ अनंत। वासुकी। तक्षक। कर्कोटक॥
शंख। महापद्म। कुलिकानां। नागानां नामानि चूतपत्र पृष्ठके लिखित्वा शुद्धभूमौ य वोपरि स्थापित गंधा
द्याः पतनूतनकलशे यत्सोप्यालोढ्यैकचूतपात्रमाहृष्य तत्पत्र लिखितनामानं॥ नागं तीर्थजलधौतायांय

प्रस॰
प॰
२८

श्वामसुकनागइहागच्छेहतिष्ठेत्यावाह्य ॥ अनेननागेनास्यजलाशयस्यरक्षाकार्यैति। सदस्यान् श्राव्यतंना
गममुकनागायनम इतिपाद्यादिगंधपुष्पाद्युपचारैः पूजयेत् ॥ ततोजलाशयाल्पत्वमहत्वानुसारेण द्वाद
शपंचदशविंशत्यन्यतमारत्निमितां यज्ञीयकाष्ठकृतां यष्टिंपश्चिमतोजलांतिके आगम्नामासनेसंस्थाप्य॰ ॥
ॐ नागयष्ट्यैनमइतिपाद्याद्युपचारैः संपूज्य॥पुष्पचंदनादिभिरलंकृत्य तदीयवर्तुलमस्तकोपरि मूलेलोह
मयंचक्रमारोपयेत्॥ ॐचक्रंसुदर्शनाख्यंत्वंनागदंडशिरोगतं॥ अत्रविघ्नस्यकर्त्तारंजहिदुष्टहरप्रिय॥ ततःस
बांधवोयजमानः तांयष्टिंस्कंधेधृत्वावाद्यवेदरवेजायमानेजलाशयप्रदक्षिणीकृत्यजलमध्येभागेवयष्ट्यर्थं
कृतखातसमीपेनयेत्॥तत्रापिपूजा॰त त्रहस्तिमृगोगोमयंदधिमध्वक्षतकुशमहानदीजलपंचरत्नानि निक्षिपेत्
ततः ऋत्वोसौतिस्थिरोभवेतिखातेयष्टिनिखनेदृढतया इदंचयष्ट्यारोपणंकूपवाप्योर्नकार्यं॥ अथयजमा।
नोयंगस्थितोर्थजलानिजलाशयोप्रक्षिप्य तत्समीपेप्राङ्मुखःउपविश्यपठेत्॥ कुरुक्षेत्रंगयागंगाप्रभासःपुष्करं

तथा॥एतानिपंचतीर्थानि तडागेनिवसंतुमे॥दशार्णासुरलासिंधुरथावर्त्ताहषद्वती॥ एतानि॰ वितस्ताकौशि
कीसिंधुःशरयूश्चसरस्वती॥एता॰ यमुनानर्मदारेवाचंद्रभागाचवेदिका॥गोमतीवाड्मतीशोणोगंडकीसाग
रस्तथा॥एतानि॰ इतिपठित्वाजलंस्पृशेत्॥ततः प्रपद्येवरुणंदेवमंभसांपतिमूर्जितं॥ ॥याचितंदेहिमेतु
ष्टंसर्वपापापनुत्तये॥सांनिध्यंमंत्रतोयेषुतवेदमनुनहात्॥रुद्रान्प्रपद्येवरुणंसर्वान्नसुपरंस्तवहं॥शमयन्तुप्र
मेपापंरसंतस्तेप्रभुमांसदा॥आपःपुण्याःपवित्राश्चप्राणिनांप्राणदास्तथा॰॥शमयंतुप्रभुमेपापंतस्माद्रसंतुसर्वं
दा॥ इतिनमस्कृत्य॥ॐह्रियैनमः॥श्रीयै॰ शत्यै॰ मेधायै॰ विद्यायै॰ लक्ष्म्यैनम इतिजलमातृःजलेएवस्वस्तं
तु तंपुंजेएवागंधादिनापूजयेदितिकश्चित्॥तत्रमूलंमृग्यं॰ततआपोहिष्ठेतित्रृचंपठन्॥यजमानोवच्छिन्न
योदुग्धधारयाजलाशयंत्रीः प्रदक्षिणीकृत्य॰गीतवाद्यादिघोषेजायमाने॥ततोदक्षिणादिनासंतोषितंकंचि
द्ब्राह्मणंपयसेहंदुग्धपाययेत्॰ ततोयजमानः मंडपंप्रविश्यस्थापितदेवतानांपंचोपचारैः पूजयित्वाशय्यादानं

उत्त॰
३॰
२८

कुर्यात् सोपस्करां शय्यां गुरवे संकल्पपूर्वकं दद्यात् ॥ अन्यदपि पात्राणि भोजनयोग्यानि ॥ अन्यदपि दातुमुपः
कल्पितं इष्टं वस्तु दद्यात् ॥ अथ शय्यादानम् ॥ भविष्ये ॥ तस्माच्छय्यां समासाद्य सारदारुमयीं दृढां ॥ दंतपत्र
न्वितां रम्यां हेमपट्टैरलंकृतां ॥ हंसतूलीप्रतिच्छिन्नां शुभगंडोपधानिकां ॥ प्रच्छादनपटीयुक्तां गंधधूपादिवा
सि ।॥ तस्यां संस्थापयेद्धैमं हरिलक्ष्म्या समन्वितं ॥ उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ॥ तांबूलं कुंकुमक्षो
द कर्पूरागरुचंदनं ॥ पार्श्वेषु स्थापयेद्भक्त्या सप्त धान्यानि चैव हि ॥ शयनस्थस्य भवति यदन्यदुपकारकं ॥ भृ
गारकरकाद्यं च पंचवर्णं वितानकं ॥ शय्यामेवंविधां कृत्वा ब्राह्मणायोपपादयेत् ॥ सपत्नीकाय संपूज्य दद्या
द्विधिपूर्वकं ॥ दत्वैतस्य हि सकलं प्रणिपत्य विसर्जयेत् ॥ अथ प्रयोगः ॥ देशकालौ स्मृत्वा मम दशसहस्र
वर्षावच्छिन्नस्वर्गलोकवाससिद्धिद्वारा श्रीलक्ष्मीनारायणप्रीत्यर्थं शय्यादानं करिष्ये ॥ इति संकल्प्य वस्त्रा
लंकारादिभिः पात्रं संपूज्य ॥ अग्न्युत्तारणपूर्वकं उक्तविधि प्रतिमायां आवाहनादिषोडशोपचारैर्लक्ष्मीनारायणौ

पूजयेत् ॥ ततः शय्याशिरःप्रदेशे घृतपूर्णकुंभं निधाय ॥ पार्श्वतः सप्त धान्यानि निधाय ॰ शय्यायां नारिकेला
दिफलं निधाय । पूर्ववद्वा फलं च सहीर्ष इमां शय्यां सारदारुमयीं तुलिकोत्तरच्छदप्रच्छन्नां लक्ष्मीनारायणप्र
तिमायुक्तां सुगंधोपधानघृतकुंभसप्तधान्यतांबूलकर्पूरकुंकुमागरुचंदनदीपिकोपानच्छत्रचामरवितान
आसनभोजनभाजनजलभाजनतांबूलपात्रफलयुक्तां तुभ्यमहं संप्रददे इति पात्रहस्ते जलं प्रक्षिपेत् ॰ मंत्रं
पठेत् यस्मादशून्यं शयनं केशवस्य शिवस्य च शय्या ममाप्यशून्यास्यात्तथा जन्मनि जन्मनि ॥ प्रतिगृहीता स्वस्ती त्यु
क्त्वा देवस्य त्वेति प्रतिगृह्णीयात् ॥ दाता कृतस्य शय्यादानस्य पूर्णतायै इदं हेमसुवर्णपरिमाणं दक्षिणात्वेन
तुभ्यमहं संप्रददे इति पात्रहस्ते दद्यात् ॥ प्रतिगृहीता स्वस्तीत्युक्त्वा कोदादिति पठेत् ततस्तं करे धृत्वा श
य्यायामुपवेशयेत् ॥ पूर्णतां वाचयित्वा भूयसीं संकल्प्य ईश्वरार्पणं कुर्यात् तिलपात्रदानं आज्यपात्रदानं ॰
आज्ये सुवर्णं निक्षिप्य ततः आचार्याय अश्वं दद्यात् ॥ ततः महिषीदानं ॰ ततः वृषभदानं ॰ ततः भूमिदानं

उत्० ॥ततःआचार्यायवर्षपर्यंतंअन्नंदद्यात्॥ततःजलोत्सर्गसांगतासिध्यर्थंसहस्रंअष्टोत्तरशतंपंचविंशतिंगा
प० वांदद्यात्॰ततःसहस्रंअष्टोत्तरशतंपंचाशद्विंशतिंवाब्राह्मणान्शक्त्यातदैवकालांतरेवासंकल्पपूर्वकंय
३० थोपपन्नेनान्नेनभोजयेत्॥ततःब्राह्मणेभ्यःभूयसींदक्षिणांदद्यात्॥ततःपूजास्विष्टकृदाहुत्यावलिपूर्णाहु
तिस्तथा॥अथसंपाद्यदानंचअभिषेकेविसर्जनं॥ततःआचार्येणपूर्णाहुतिःकार्या॥ततःवैदिकमंत्रैर
भिषेकःपौराणिकमंत्रैश्च॥सुरास्त्वामभिषिंचंतुब्रह्माविष्णुमहेश्वराः॥वासुदेवोजगन्नाथस्तथासंकर्षणो
विभुः॥प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते॥आखंडलोग्निर्भगवान्यमोवैनैरृतिस्तथा॥वरुणःपव
नश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्मणासहिताःशेषादिक्पालाःपांतुमेसदा॥कीर्तिर्लक्ष्मीधृतिर्मेधापु
ष्टिःश्रद्धाक्रियामतिः॥बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिश्चमातरः॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमाग
ताः॥आदित्यचंद्रमाभौमोबुधजीवसितार्कजाः॥ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः॥देवदानव

गंधर्वायक्षराक्षसपन्नगाः॥ऋषयोमनवोगावोदेवमातरएवच ॥देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः
।अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥औषधानिचरत्नानिकालस्यावयवाश्चये॥सरितःसागराःशै
लास्तीर्थानिजलदानगाः॥एतास्त्वामभिषिंचंतुसर्वकामार्थसिद्धये॥एवमभिषिच्यसर्वकलशोदकैर्यजमानंस्न
पयेयुः॥ अयंदिनद्वयपक्षः॥चतुर्दिनपक्षेचतुर्थदिनेचतुर्थीकर्मकुर्यात्॥तद्यथा॥तत्रचतुर्थदिने अद्येत्या
दि अमुकजलाशयोत्सर्गांगभूतंचतुर्थीकर्मकर्तुंआचार्यवरणं पंचभूसंस्कारः अग्निस्थापनं॰ब्रह्मवरणादि
आघारावाज्यभागांतंकृत्वाभूराद्यानवाहुतयोहुत्वा॥इमंमेवरुणेतिवारुणमंत्रेणतोयमभिमंत्र्य॥तेनाग्निमभ्यु
क्ष्य॥गायत्र्यासविश्येपंचदशाहुतिर्जुहुयात्॥ततोव्याहृतिभिः व्यस्ताभिराहुतित्रयंहुत्वा॥अग्नयेस्विष्टकृते।
स्वाहेतिजुहुयात्॥एतदनंतरंदानदर्पणोवरुणस्नापनमुक्तं॥ तद्यथा॥आदौदध्यक्षतकुशाग्रेक्षीरदूर्वामधु
श्वेतसर्षपफलसहितंताम्रादिपात्रेणार्घ्यंदत्वा॥उद्धृतासिगजादंतोधृतसप्तमृत्तिका॥अग्न्यागारनवमृदोन

उत्स॰
प॰
३१

वकुंभेषु सिक्त्वा शन्नो देवीरापोहिष्ठेति तत्र जलं पूरयित्वा ॥ एभिरेव मंत्रैर्वरुणं स्नापयेत् ॥ अथ पंचगव्यस्नानं तत्र
सावित्र्या फलं गोमूत्रं ॥ गंधद्वारामिति अंगुष्ठार्द्धमितं गोमयं ॥ आप्यायस्वेति पलत्रय क्षीरं ॥ दधिक्राव्ण इति द्वि
पलं दधि ॥ तेजोसीत्येकपलं घृतं ॥ देवस्यत्वेत्येकपलं कुशोदकं ॥ गृहीत्वा सर्वमेकीकृत्य तेनापोहिष्ठेति ति
सृभिर्वा पिवामिनं वरुणं स्नापयेत् ॥ ततः केवलदध्ना दधिक्राव्ण इति स्नपयेत् ॥ आप्यायस्वेति क्षीरेण॰ तेजो
सीति घृतेन॰ मधुवाता इति त्रयेण मधुना॰ सरस्वत्यैभै॰ पुष्पोदकेन॰ हिरण्यगर्भ इत्युदकेन॰ देवस्यत्वेति कु
शोदकेन॰ याः फलिनीति फलोदकेन॰ सावित्र्या गंधतोयेन स्नपयेत् ॥ ततो घटानां सहस्रेण पंचशतमष्टोत्त
रशतेन वा षोडशेन चतुष्टयेन वा शक्त्या स्नपयेत् ॥ शक्त्या सुवर्णरजतताम्रकांस्यपैत्तलमृण्मयैः कलशैः ॥॰
ततः सहदेवी॰ वचा व्याघ्री॰ बला॰ अतिबला॰ शंखपुष्पी॰ सिंहि सुवर्चला॰ इत्यष्टौ महौषधीयुतजलक
लशेन स्नपयेत् ॥ ततो यवा गोधूम नीवार तिल श्यामाक शालि प्रियंगु व्रीहि बीजाष्टकयुतकलशेन ॥ ततो गोम

येन मृत्स्नया कृतैः स्वस्तिक पद्म शंख उत्पल कलश श्रीवत्स दर्पण नंद्यावर्तैः पंचवर्णोदनैः पंचवर्णरजोभिः वा कृ
त्वा भक्तबलिभिश्च वरुणं नीराज्य ॥ वरुणायेत्याचमनीयं नम इति गंगाजलं दत्वा ॥ वेदसूत्रसमायुक्ते यज्ञपात्रस
मन्विते ॥ सर्ववर्णप्रभेदे देवी वाससी तव निर्मिते ॥ इति वस्त्रयुग्मं दत्वा ॥ अथ चतुर्थीकर्म ॥ कृत्वा समभागकर्पू
रकुंकुमान्वितं चंदनं शरीरं तेन ज्ञानामि चेष्टां चैव वचनेन च मया निवेदितं भक्त्या प्रतिगृह्य विलिप्यतामिति दत्वा
तूष्णीं पुष्पमालां च॰ वनस्पती ति॰ धूपं दत्वा॰ त्वं सूर्यचंद्रज्योतीषि विद्युदग्निस्तथैव च ॥ त्वमेव सर्वज्योतीषि
दीपोयं प्रतिगृह्यतामिति चत्वारिंशद्दीपान् दत्वा ॥ प्रदक्षिणीकृत्य यथाशक्त्यालंकरणं भूषयतेनमद्यादि ॥ अ
प्रणाममूल्यं ततः इमं मे वरुणेति सर्वे ऋत्विजो यजमानान्वारब्धो पूर्णाहुतिं दत्वा अग्निं प्रपूज्य॰ आयुर्यज्ञमद
स्वेहूत्यात्मनो यजमानस्य च आयुरवं कृत्वाग्निं विसर्जयेत् ॥ ततो यजमानो गुरुत्विग्भ्यः गोसुवर्णादि दक्षिणां द
द्यात् ॥ गुरवे द्विगुणं॰ तद्यथा॰ अद्येत्यादि॰ कृतैतदमुकजलाशयोत्सर्गयज्ञांगभूतं चतुर्थीकर्म प्रतिष्ठार्थेम

उ.प्र॰ मुकगोत्रायामुकशर्मणेगुरवे॰मुकगोत्रामुकशर्माहमिदंसुवर्णंअग्निदैवतंदक्षिणांसंप्रददेनममेतिकुश
३२ सतजलैर्दद्यात्॥स्वस्तीतिवदेत्ततःऋत्विग्भ्योन्येभ्यश्चब्राह्मणेभ्यश्चदक्षिणांदद्यात्शक्त्या।पूर्ववत्॰ततःस
त्विंगाचार्यौवैदिकैःसुरास्त्वामित्यादिपौराणिकैश्चपूर्वोक्तमंत्रैःकलशोदकेनसकुटुंबंयजमानमभिषिंच्य॰
सयजमानःअग्निंप्रदक्षिणेनवेदिंगत्वा ॐसूर्यायनमइत्यादिक्रमेणपाद्यादिभिःसूर्यंप्रपूज्यप्रणमेत्॥सम
स्तंविघ्नशांप्रार्थ्य॰यांतुदेवगणाःइतिविसर्जयेत्॥एवंकर्मसमाप्यवरुणंस्मरन्यज्ञपात्राणियज्ञोपकरणा
निच॥अयनंशक्त्याचार्यायवेति स्वयमेवविभज्य ऋत्विग्भ्योदद्यात्गुरवे॰मंडपस्तुगुरुभ्यस्तेभ्योविभज्यदेयः
कूर्मादिस्थापनार्थंहेमपात्रीआचार्यायैवदद्यात्।नैतेषांदानेसंकल्पवाक्यप्रतिपत्तित्वात्॥ततोनवग्र।
हप्रीतयेसुवर्णंशक्त्याज्योतिर्विदेदेयमितिरूपनारायणाग्रहान्विसर्जयेत्॥वास्तूनविसर्जयेत्॥ब्रह्मा
गावोनरोब्राह्मणाश्चविशेषतः॥पूजनीयाःप्रयत्नेनसयज्ञफलमाप्नुयात्॥ततःअभिषेकान्निहोत्वा

उ.प॰ वर्धापनादिमांगलिकंनिवर्त्य॥दीनानाथादिभ्योयथाशक्तिभूयसींदद्यात्॥ततःस्वस्थाःसपुत्रःसुहृद्युतोभुंजी
३३ तेति॥एषमुख्यःकल्पः अत्राशक्तौसप्तदशभिस्त्रयोदशभिर्वात्रार्थऋत्विग्भिःकुर्यात्॥तत्राशक्तावेकाग्निविं
धानेनऋत्विग्भिर्विनाचार्येणैकेनकुर्यात्॥ ॥इतितडागोत्सर्गविधिःसमाप्तिमगात्॥ ॥समाप्तोयंग्रंथः॥ ॥
॥ ॥शुभम्भूयात्॥ ॥ संवत् १८२१॥ ॥भाद्रपदकृष्ण॥ ११॥ शनौ॥ ॥ॐ॥ शुभमस्तु॥ ॥

उत्सर्गपद्धतिः समाप्ता॥ श्रीः

यः पोथी शहर बनारस दिवाकर छापाखाने मे शोखम पुष शिवचरन के छापाखाने मे छपी साकिन मोहल्ले भदैनी काली महल के पास वा: दुर्गा मिश्र वो छापने कलेका नाम मातादयाल यः पोथी जिस्को लेना हो सो चांदनी चौक मे कुंजगली के पश्चिम ओर रामचरन के दुकान पर मिलेगी मी: चैत्रशुदी १० संम्वत १९२५ वार गुरुः ॥

धौ॰म॰ श्रीगणेशाय नमः ॥ यो लीलया संतनुतेऽत्र विश्वं तस्या लयं स्वात्मनि विश्वरूपे लयं नयत्यात्सुवपूर्णरूपः शिवं तनोत्वाशुर॥
१ विमेमासौ १ महो महत्समाराध्य समाकर्ण्य गुरोर्गिरः समुद्धृतो नीलकंठीव कुं शांतिकपौष्टिके २ मतारके याद्दृतमत्र किंचि
न्मया तु निर्मूलतया तदुक्तितः ऊनोक्तिता तो न हि तेन काचित् वपुष्य हीनापचितिर्न हीयते ३ अस्पष्टपापविशेषनिदा
नकैहिकमात्रानिष्टनिवर्तकं पापाप्रयोजकं वैधकर्म शांतिकं यथा दिव्यहरदानादावतिप्रसंगवारणाय तु निदानकांतं आमु
ष्मीकानिष्टनिवर्तकेत्वं वारयितुं ऐहिकेति प्रायश्चित्ते वारयितुं मात्रपदं प्रायश्चित्तस्यामुष्मिकानिष्टनिवर्तकमपि अभिचा
रस्यभिचारादौ वारयितुं पापाप्रयोजकमिति तयोः फलतो हि साम्येन तदनुष्ठाने प्रायश्चित्तोक्तेश्च पापप्रयोजकत्वात् आ
निष्टनिवर्तकत्वं च शांतिकस्य तन्निदानपापनाशरूपसामग्रीनिघटकत्वेन पुष्टिफलकं वैधं कर्म पौष्टिकं तत्र परिभाषा मार्क
ण्डेयपुराणे शिरःस्नातश्च कुर्वीत दैवं पित्र्यमथापि वा प्राङ्मुखोदङ्मुखो वापि श्मश्रुकर्म च कारयेत् १ तत्रैव देवार्चनादिकर्म
णि तथा गुर्वभिवादने कुर्वीत सम्यगाचम्य प्रयतोपि सदा द्विजः २ वृहन्मनुः प्राणानायम्य कुर्वीत सर्वकर्माणि संयतः मार्कण्डे
य संकल्पविधिवत्कुर्यात्स्नानदानव्रतादिकं देवलः मासपक्षतिथीनां च निमित्तानां च सर्वशः उल्लेखनमकुर्वाणो न तस्य फलभा
ग्भवेदिति मासपक्षतिथयः प्रयोगाधिकरणभूताः सर्वेपि यत्तु अनेकदिनसाध्यकर्मणि आद्यदिने संकल्पकालीनां तिथिमधिक

रणत्वेनोल्लिख्य ज्योतिष्टोमेनाहं यक्ष्य इत्यादिसंकल्पवाक्यं प्रयुंजते याज्ञिकाः तत्तु यदानामन्वयायोगात् नाहं नादर्तव्यं य
दपि केचित्ते नैव तेन रूपेण प्रयोगांगतया विहितानामेव मासादीनामुल्लेख इति तदपि न मानाभावात् अविहितमासादिस
आधानादौ मासपक्षतिथीनां ज्योतिष्टोमएकादशीव्रतादौ च मासपक्षयोरुल्लेखाभावप्रसंगाच्च अतो ज्योतिष्टोमादा
वेकादश्यादिपूर्णिमांतानामुल्लेखः एवमन्यत्रापीति दिक् अत्र च शूद्राणामप्यधिकारः श्रावयेच्चतुरो वर्णान् कृत्वा ब्रा
ह्मणमग्रतः इत्यादिवाक्येषु श्रवणस्य हृत्यर्थतया रागप्राप्तत्वेन तद्विधौ वाक्यवैयर्थ्यापत्तेर्णिजविवक्षया श्रवणविधि
ना तेषां पुराणश्रवणाधिकारेण ज्ञानसद्भावात् वैदिकमंत्राभावे कथं तत्तत्कर्मस्वधिकार इति चेत् शृणु धर्मेप्सवस्तु
धर्मज्ञाः सतां धर्ममनुष्ठिताः मंत्रवर्ज्यं न दुष्यंति प्रशंसां प्राप्नुवंति चेति मनुना मंत्रवर्जनात् यत्तु मेधातिथिर्मंत्रवर्जितं
षूपवासादिष्वधिकारार्थमिदं न तु समंत्रकेषु मंत्रपर्युदासार्थमिति तत्र अमंत्रकोपवासादिषु श्रवणविधिनैवाधिका
रसिद्धावेतद्वाक्यानर्थक्यापत्तेः अत एव मोक्षधर्मेष्वपि मंत्रवर्जं न दुष्यंति कुर्वाणाः पौष्टिकीः क्रियामिति अत्रैतद्वाक्य
स्य पौराणत्वेन तत्सामान्योपस्थितेः पौराणक्रियोद्देशेन मंत्रवर्जनविधौ पौष्टिकीमित्युद्देश्यविशेषणत्वेनाविवक्षितं
एवं च मनुवाक्यस्यैतस्य चैकवाक्यश्रुतिमूलत्वेन कल्पते गृह्यपरिशिष्टे आदौ विनायकः पूज्यस्त्वंते तु कुलदेवताः शौनकः शू

शां.म. एणाहवाचनविधिं वक्ष्यामि यथाविधि प्रयोक्तुः कर्मणामादावंते चोदयसिद्धये कर्मप्रदीये कर्मादिषु तु सर्वेषु मातरः सगण
२ णाधिपाः पूजनीयाः प्रयत्नेन पूजिताः पूजयंति ताः १ प्रतिमासु च शुद्धासु लिखित्वा वा पटादिषु अपि वाक्षतपुंजेषु नैवेद्यै
श्च पृथग्विधैः २ कुड्यलग्नां वसोर्धाराः सप्तवारान् घृतेन तु कारयेत्पंच धारा वा नातिनीचा न चोच्छ्रिताः ३ आयुष्याणि च शांत्यर्थं
जप्त्वा तत्र समाहितः षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेदिति ४ षड्भ्य इति छंदोगकातीयपरं अन्येषां तु नवदैवत्
मन्वष्टकासु वृद्धौ च गयायां च क्षयेहनि अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सहेति १ वचनात् सर्वत्राचार्यो यजमा
नसमशाखीय एव अन्यथाचार्यस्य यजमानशाखाध्ययनाभावे तच्छाखीयपदार्थानां निर्वाह एव न स्यात् स्वशाखयानु
ष्ठाने तु वैगुण्यं तथा च याज्ञवल्क्यः स्वशाखां परित्यज्य परशाखां समाश्रयेत् अप्रमाणमृषिं कृत्वा सोंधे तमसि मज्जतीति
ऋत्विजस्तु भिन्नशाखीया अपि सर्वथा चार्यबह्वृत्विजो मधुपर्केण पूज्याः ऋत्विजो वृत्वा मधुपर्कमाहरेदित्याश्वलायनोक्तेः
संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेदिति विश्वामित्रोक्तेश्च यत्र ऋत्विक् यच्छाखीयं कर्म करोति तच्छाखोक्तेन प्रकारेण काण्डा
नुसमयेन मधुपर्कं कुर्वंति याज्ञिकाः केचित्तु परे यजमानशाखोक्तेन यजमानेन स्वशाखीय ऋत्विग्भिश्च स्वस्वशाखीयाः पदा
र्थाः अनेकेषु ऋत्विक्षु यदर्थानुसमयेनानुष्ठेया इति तु युक्तं तत्तच्छाखाध्ययनजन्यज्ञानस्यांगत्वादेकप्रयोगविधिपरिग्रहाच्च

भूषणं

ऋत्विग्भ्यो देयमुक्तं लिंगपुराणे वस्त्रयुग्मं तथा पूरं केयूरं कर्ण अंगुलीभूषणं चैव मणिबंधस्य भूषणं १ कंठाभरणयुक्तानि प्र
रंभे धर्मकर्मणः पुरोहिताय दत्त्वाथ ऋत्विग्भ्यश्चापि दापयेत् २ इति आपः पूर्यंते स्मिन्निति पूरं जलपात्रं मत्स्यपुराणे यज
मानः सपत्नीकः पुत्रपौत्रसमन्वितः पश्चिमद्वारमाश्रित्य प्रविशेद्यागमंडपं १ संग्रहे समंततश्च सिद्धार्थान् विकिरेद्राक्षोघ्न
मंत्रतः प्रतिष्ठासारे सर्वतः पंचगव्येन प्रोक्षयेद्यागमंडपं आपो हि ष्ठा तृचेनैव ततः स्वस्त्ययनं जपेत् १ अत्र हेमाद्रौ वास्तुपूजा
युक्ता स मंडपं प्रविश्याथ तोरणादि प्रपूज्य च वास्तुयागं ततः कुर्यात्प्रासादे मंडपे थवा १ वास्तुमंडलं च नैरृत्यां नैरृत्या
दिशि वास्तोः शं ब्रह्माद्यांश्च समर्चयेदिति शारदोक्तेः वास्तुहोमस्तु भिन्नस्थंडिले कार्यः मुख्यायतने वा तत्राप्यादौ पृथक्प्र
योगतया प्रधानसमं तंत्रतया वा शारदातिलके तु होम एव नोक्तः सर्वं च शांतिपौष्टिकमहादानादि लौकिकाग्नौ कार्यं श्रौत
स्मार्ताग्निप्राप्तेर्मानाभावात् यत्तु मनुः वैवाहिकेग्नौ कुर्वीत गार्ह्यं कर्म यथाविधिः पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृही
ति तत्स्पष्टं गृह्योक्तपरं वैवाहिक इति च दायाद्यकालीनयोरप्युपलक्षणं तत्सजातीयसंस्कारस्यैव साधनतावच्छेदकत्वात् य
दपि याज्ञवल्क्यः स्मार्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही दायकालाहृते वापि श्रौतं वैतानिकाग्निषु इति १ तत्रापि सामान्य
स्मार्तपदं गार्ह्ये उपसंक्षिपते एतेनाहवनीयादयो निरस्ताः यदाहवनीये जुहोतीत्यादौ अश्वप्रतिग्रहेष्टौ वैदिकत्वसाम्येन

वैदिकाश्च दानप्रतिग्रहोपस्थितिवत् वैदिकहोमोपस्थितेश्च यद्यप्यत्र गार्ह्यस्मार्त एव श्रौतं वैतानिक एवेति नियमेन स्मृत्युक्तेपि कर्मणि श्रौतस्मार्तान्योः प्राप्तिः संभाव्यते तथापि न साहवनीयावसथ्यत्वरूपेण किंतु लौकिकसाधारणज्वलनत्वेनैव अदेवाहुतिप्रक्षेपे आहवनीयत्वादिविधानापत्तेश्च अत एव सर्वाधानि न औपासनाभावात् वैतानिकाप्राप्तेश्च नेनगार्ह्यो लौकिक एव कार्यं अमुमेव सर्वमर्थं स्मृत्यर्थसारकृदमपि संजग्राह गृह्याग्नौ होमोपासने कुर्यात्सर्वाधानी तु लौकिके स्मार्तं च लौकिके कुर्याच्छ्रौतं वैतानिकाग्निष्विति १ यत्तु नारायणवृत्तौ सर्वाधानिना सीमंतोन्नयनादिगार्ह्यकर्मार्थं स्मार्ताग्निरुत्सादनीय इति तत्र मूलं बौधायनसूत्रं यदपि विज्ञानेश्वरो गृह्ययज्ञ औपासन इत्युचे तत्र मूलमन्वेष्यं कातीयपरं वा तत् तत्सूत्रे तथाम्नामानात् अत एव स विनायकशांतौ लौकिकाग्निमेवावोचत् अतः स्मृत्युक्ते लौकिके एवेति कृत्यरत्नाकरे शुभपात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः तस्याभावे शरावेण नवेनाभिमुखं च तत् १ गोभिलीये आहूय सोमजयोयत्र विहितोनलः तथा लक्षहोमे तु वह्निः स्यात्कोटिहोमे हुताशनः पूर्णाहुत्यां मृडो नाम शांतिके वरदः सदा १ अन्येषु संस्कारादिकर्मसु अन्ये नाम विज्ञेयाः प्रयोगरत्ने होमे विशेषो गोभिलीये न मुक्तकेशो जुहुयान्नानुपादिकालालो कषाश्चैव च विघ्नविनायकाः ३ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः माविघ्नं माच मे पापं मा संतु परिपंथिनः ४ सौम्या भवंतु तृप्ताश्च भूतप्रेताः

शुभावहाः दद्यादित्यत्रापि देहलीदीपवदन्वेति विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां दूर्वासर्षपपुष्पाणां दत्वार्घं पूर्णमंजलिं अनंतरं विनायकमंबिकां च दूर्वाद्यर्घमंजलिं अर्घं च दत्वोपतिष्ठेत उपस्थानमंत्रमाह रूपं देहि यशो देहि भगं भगवति देहि मे पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे १ देहि मे भगवन्भगमित्यूत्त्व विनायकं उपतिष्ठेतेति विज्ञानेश्वरः अत्र मदनः विनायकोपस्थानं कृत्वांबिकोपस्थानं कार्यमित्याह किंच ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि गुरोराचार्याय अपिशब्दाद्दक्षिणामपि एवं विधिं कर्म कुर्वतः फलमुक्तं एवं विनायकं पूज्य ग्रहांश्चैव विधानतः कर्मणां फलमाप्नोति श्रियमाप्नोत्यनुत्तमां १ अस्याः कर्मांगत्वेन पौष्टिकत्वेन च वर्णचतुष्टयस्याप्यत्राधिकारः शूद्रस्य तु मंत्रवर्जं तान्प्रकम्य मंत्रवर्जं न दुष्यंति कुर्वाणाः पौष्टिकीं क्रियामिति मोक्षधर्मे श्रवणात् महार्णवेपि यजमानस्तु शूद्रश्चेदिति वदन् तस्याधिकारमभिप्रैति ० इति विनायकशांतिः ० अथ प्रयोगः कर्ता देशकालौ संकीर्त्य विनायकोपसर्गनिवृत्त्यर्थममुककर्मणो निर्विघ्नतासिध्यर्थं वा विनायकस्नपनं करिष्ये इति संकल्पयेत् ततः पुण्याहवाचनादि नांदीश्राद्धांतं यथोक्तं कुर्यात् अपरे पुण्याहवाचनं नेच्छंति अग्रेतस्य कर्तव्यत्वात् अथाचार्यं कर्तुं संपूज्य पार्वतीभीमजं तथा कुलस्य पितरं केतुमर्कमारं सितं तथा २ धिषणांके दषुत्रं च कोणं लक्ष्म च भारत विधुंतुदं वाहुलेयं नंदकस्य च धारि

णामिति २ व्योमकेशः शिवः भीमजो गणेशः आरो भौमः सितः शुक्रः धिषणो गुरुः लेरपुत्रः बुधः कोणः शनैश्चरः लक्ष्मीतह्नं
श्चंद्रः बाहुलेयस्कंदः नंदकधारी कृष्णः गौरशार्षपकल्केन साज्येनोत्सादितस्य च सर्वौषधैः सर्वगंधैर्विलिप्य सिरसस्तथा
भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः गौरसर्षपपिष्टेन गोघृतयुक्तेनोत्सादितस्योद्वर्तितस्य सर्वौषधानि च देगपरि
शिष्टे कुष्टं मांसी हरिद्रे द्वे मुरा शैलेयचंदने वचा कर्चूरमुस्ता च सर्वौषध्यः प्रकीर्तिताः १ सर्वगंधैश्चंदनकुंकुमागरुकस्तू
रिकाजातीफलादिभिः वेयांसितवस्त्रप्रच्छादितश्रीपर्णीपीठे भद्रासनं स्वस्तिवाच्याः स्वस्तिवाचनीयाः ब्राह्मणद्वारेण
स्वस्तिवाचनं कारयेदित्यर्थः अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाह्रदात् मृत्तिकां रोचनां गंधं गुग्गुलुं चाप्सु निक्षि
पेत् १ या आहृता एकवर्णैश्चतुर्भिः कलशैर्ह्रदात् चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः २ अनडुहं चर्म च वेधा
ग्रग्रीवमूर्ध्वलोमावस्थाप्यमिति विज्ञानेश्वरः याज्ञपेतिचत्वारोपि कलशा भद्रासनस्य पूर्वादिक्षु चतुर्दिक्षु स्थाप्याः इति
शोभदापिकाः पूर्वादिदिक्त्रयावस्थितकलशोदकेनाभिषेकक्रमेण मंत्रानाह सहस्राक्षं शत ॰ ॰ ॰ रमृषिभिः पावनं कृ
तं तेन त्वामभिषिंचामि पावमानीः पुनंतु ते २ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः भगमिंद्रश्च वायुश्च भगं सप्तर्षयो
ददुः २ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा ३ सहस्राक्षं बहुशक्तिकं ॥

पवमानीरित्येनेतरमा पद्त्रितेषः भगीकल्याणी दौर्भाग्यमकल्याणी उदग्दिगवस्थितेनाभिषेके पूर्वोक्तास्त्रयराव मंत्राः स
र्वैश्चतुर्थमिति विज्ञानेश्वरो लिंगात् किंच स्नातस्य सार्षपतैलं स्रुवेणौदुंबरेण तु जुहुयान्मूर्द्ध्नि कुशान् सव्येन प
रिगृह्य च १ सव्यपाणिगृहीतकुशांतरिते सर्षपतैलमुदुंबरनिर्मितेन स्रुवेण यजमानमूर्द्धनि जुहुयात् आचार्यः मितश्च
संमितश्चैव तथा शालकटंकटौ कूष्मांडो राजपुत्रश्चेत्येते स्वाहासमन्वितैः १ नामभिर्बलिम[illegible]नमस्कारसमन्वितैः न
मः स्वस्ति स्वाहेति चतुर्थी एतानि च षट् विनायकनामानीति विज्ञानेश्वरः अपरार्कस्तु शालकटंकटइत्येकवचनांतपा
ठ तेन तन्मते पंचैवाहुतयो भवंति अत्र लौकिकेऽग्नौ स्थालीपाकविधिना चरुं कृत्वा तेभ्य एवाहुतिषट्कं हुत्वेंद्रादिद
शलोकपालेभ्यस्तन्नाम्ना बलिं दद्यादिति मिताक्षरायां तत्र चरुहोमेंद्रादिभ्यो बलिदाने च मूलं चिंत्यं अतः स्वाहा
समन्वितैर्नामभिर्जुहुयात् नमस्कारसमन्वितैश्च मितादिभ्यो बलिं दद्यात् इति वक्ष्यमाणेन संबध्यत इति युक्तं
दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः कृताकृतांस्तंडुलांश्च पललौदनमेव च १ मत्स्यान् पक्वांस्तथैवामान् मांसमेता
वदेव तु पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि २ मूलकं पूरिकापूपांस्तथैवौडेरकस्रजः दध्यन्नं पायसं चैव गुडपि
ष्टं समोदकं ३ एतान्सर्वान् समाहृत्य भूमौ कृत्वा ततः शिरः कृताकृतान्सकृदवहतान् पललौदनः तिलपिष्टमिश्र ओदन

शां· म इति मिताक्षरायां अपक्वमांसमिश्र ओदने इति तु युक्तं पललं क्रव्यमामिति कोशात् अमानपक्वान् मांसमेतावदेव तु पक्व
५ मपक्वं च मांसमन्यदित्यर्थः त्रिविधा सुरा गौडी पैष्टी माध्वी च मूलकं कंदाकारो भक्ष्यविशेष इति मिताक्षरायां स्वरूपत
एव ग्राह्यमिति तु युक्तं उभयमपि ग्राह्यमिति महार्णवे अपूपाः स्नेहपक्वा गोधूमविकारा इति विज्ञानेश्वरः उंडेरकाः पि
ष्टविकारास्ते नानाविधास्ते मोदकाः स्रज इत्युच्यंते गुडपिष्टगु डमिश्रशाल्यादिपिष्टं अत्र सुरामांसं चाब्राह्मणविषयं ब्रा
ह्मणेस्तु मांससुरास्थाने सलवणपायसदुग्धं च ग्राह्यं पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत दुग्धं लवणसंमिश्रं सुरा
स्थाने प्रकल्पयेत् १ इति स्मरणादिति महार्णवादिषु विनापक्वाविकाविकागापत्रीभ्यां विनायकर्मविकां च नमस्कृत्य पूर्वोक्त
द्रव्यजातं तयोरग्रत उपकल्प्य ततः शेषं शूर्पे निधाय चतुष्पथे शूर्पं संस्थाप्य बलिं दद्यात् एतैर्मंत्रैः बलिं गृह्णं त्विमं देवा आदित्या
वसवस्तथा मरुतोप्याश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः १ असुरा यातुधानाश्च पिशाचा मातरो [illegible]गाः शाकिन्यो यक्षवेता
लायोगिन्यः पूतनाः शिवाः २ जृंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः तिलजानुकः उत्तानेनैव हस्तेन अंगुष्ठाग्रेणापी
डितं संहतांगुलिपाणिस्तु वाग्यतो जुहुयाद्धविरिति बह्वृचके होमे प्रस्ताहुतिसंख्याशतैः होमारंभ एव देतास्व तुर्थ्यं ते
नोदिनपसर्वाणि द्रव्याणि त्यजेदिति हेमाद्र्यादयः इति परिभाषा अथ विनायकस्नपनं याज्ञवल्क्यः विनायकः कर्मवि

घ्नसिद्ध्यर्थं विनियोजितः गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत १ स्वप्नेवगाहतेत्य
र्थं जलं मुंडांश्च पश्यति काषायवाससश्चैव क्रव्यादांश्चाधिरोहति २ अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठति व्रजन्नपि त
थात्मानं मन्यते नुगतं परैः ३ तेन विनायकेन उपसृष्ट उपद्रुतः स्वप्ने स्रोतसापाह्रियते तत्र मज्जति वा न त्ववगाहनमा
त्रं विवक्षितं तस्य शुभसूचकत्वात् अंत्यजैश्चांडालैः प्रत्यक्षलक्षणान्याह विमना विफलारंभः संसीदत्यनिमित्त
तः तेनोपसृष्टो लभते न राज्यं राजनंदनः १ कुमारी नैव भर्तारं अपत्यं गर्भमंगना आचार्यत्वं श्रोत्रियः पश्च न शिष्योध्ययनं
तथा २ वणिक्लाभं च नाप्नोति कृषिं चापि कृषीवलः संसीदति कारणं विना दीनमनस्को भवति एतदुपलक्षणं
यस्य यदिष्टं स्वेष्टसामग्रीसत्वेन न प्राप्नोति तदा तदुपद्रुतो बोध्यः एतदुपद्रवपरिहारार्थं कर्माह स्नपनं तस्य कर्त
व्यं पुण्येऽह्नि विधिपूर्वकं अत्र पुण्येह्नीत्यविशेषेपि विशेषोपराके भविष्ये शुक्लपक्षे चतुर्थ्यां च वारे धिषणस्य च
तिष्ये च वा स्नपनस्यैव तस्यैव पुरतो नृपेति १ अत्रादौ देवपूजोक्ता तत्रैव व्योमकेत्विक् चतुष्टयं च वरणुयात् ऋत्विजो न
संतीति केचित् तदाचार्य एव वक्ष्यमाणमभिषेकं कुर्यात् यजमानः प्रतिमा धान्यपुंजेषु वा शिवं पार्वतीं गणेशं वसुदे
वं केतुं अर्कं भौमं शुक्रं गुरुं बुधं शनिं चंद्रं राहुं स्कंदं कुसंवावाह्य पूजयेत् ततः आचार्यः पंचवर्णचूर्णैः पूर्वादि च

तुर्दिक्षु च त्वाभिम ध्यस्थवेद्यां चैकमिति स्वस्तिक पंचकमालिख्य मध्यस्थस्वस्तिको परि यानडुहं रक्तं चर्म प्राचीनग्रीवमूर्ध्वलोम
संस्थाप्य तस्योपरि श्रीपर्णीपीठं संस्थाप्य सितेन वाससा संछादयेत् एतद्भद्रासनमिति चतुर्षु स्वस्तिकेषु पूर्वादिदिक्षु चत्वा
रोपि ऋत्विजः कलशान्संस्थापयेयुः आचार्यो वा तत्रायं प्रकारः मही द्यौः पृथिवी च न इति भूमिं स्पृष्ट्वा न संप्रार्थ्य ओष
धयः समिति यवान् क्षिप्त्वा आकलशेष्विति तेषु कलशान् संस्थाप्य इमं गंगे इति तीर्थोदकेनापूर्य गंधद्वारेति चंदनागरुक
स्तूरीकर्पूरगोरोचना दीन् गंधान् गुग्गुलुं च निक्षिपेत् ॐ या ओषधीरिति सर्वौषधीः ॐ पयः समिति यवान् काण्डात्का
ण्डादिति दूर्वाः अश्वत्थे व इति पंचपल्लवान् स्योना पृथिवी सनेन उद्धृतासि वराहेण कृष्णेन शतबाहुना मृत्तिके हर मे पा
पं यन्मया दुष्कृतं कृतं इति अनेन पंच मृदः क्षिपेत् याः फलीनीरिति फलं स हि रत्नानि इति पंच रत्नानि हिरण्यरूप इ
ति हिरण्यं युवा सुवासा इति अनेन वस्त्रेण रक्तसूत्रेण च वेष्टयेत् पूर्णा दर्वीति धान्यपूर्णपात्रं कलशोपरि निदध्यात्
अत्र च वरुणावाहनपूजने अपि केचिदाहुः ततः कलशे सर्वे समुद्रा इति गंगाद्यावाहनं ततः कुंभाभिमंत्रणं कलश
स्य मुखे विष्णुः कंठे रुद्रः समाश्रितः मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः १ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुं
धरा ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः २ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः इति ततः कुंभप्रार्थना देवदा

नवसंवादे मथ्यमाने महोदधौ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं १ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः त्वयि
तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः २ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः आदित्या वसवो रुद्रा विश्वेदेवाः स
पैतृकाः ३ त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ४ सांनिध्यं कुरु मे देव प्र
सन्नो भव सर्वदा इति ततः ऋत्विज आ नो भद्रा इति शांतिसूक्तं पठेयुरिति केचित् आ नो भद्रा इति दश गौतमो राहुगणो भ
विश्वेदेवास्त्रिष्टुप् आद्या पंच सप्तमी च जगत्यो षष्ठी विराट् शेषास्त्रिष्टुभः शांतिसूक्तजपे विनियोगः आ नो भद्राः क्रतवो य
न्तु विश्वतः ० इत्यादिका वा तस्मिन्नेव समये आचार्यो भद्रासनस्योत्तरतः ईशान्यां वा वस्त्राच्छादितपीठादौ विनायकप्रति
मां अंबिकाप्रतिमां वाग्न्युत्तारणपूर्वकं प्रतिष्ठाप्य षोडशोपचारैः पूजयेदिति निबंधकृतः ० तत्र विनायकमंत्रः ० ः
गणानां त्वा गृत्समदो गणपतिर्जगती गणपत्यावाहने विनियोगः गणानां त्वा ० तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि तन्नो दंती
प्रचोदयात् इति वा गौर्यास्तु गौरीर्मिमाय दीर्घतमा उमा जगती गौर्यावाहने विनियोगः गौरीर्मिमाय ० सुभगायै विद्महे
काममालिन्यै धीमहि तन्नो गौरी प्रचोदयात् अत्र मिताक्षरायां चरुहोमस्तूक्तः शिष्टाश्च कुर्वंति तस्मिन् पक्षे आचा
र्यो गृह्योक्तविधिना कुंडे स्थंडिले वाग्निं प्रतिष्ठाप्य प्रादेशमात्रे समीत इध्मं आदाय अस्मिन् होमे देवतापरिग्रहार्थम

श्रा॰म॰ न्वाधानं करिष्य इति संकल्प्य चक्षुषी आज्येनेत्येतमुक्त्वा अत्र प्रधानं मितं संमितं शालं कटंकटं कूष्मांड राजपुत्रमेताः
७ न्केकया चर्वाहुत्याप्रशेषे णाग्निस्विष्टिकृतमित्यादिमुक्त्वाग्न्याबाद्ध्यात् अपरार्कमेतेतुपंचैवाहुतेपन्मतेन्वाधानेभ
होमद्वये च तथैवानुसंधेयं ततः परिसमूहनादि चरुस्त्रपणांतं कृत्वा गोघृतलोलीकृतेन गौर सर्षपकल्केनोद्वर्ति
तांगं सर्वौषधीचूर्णैः कस्तूरिकागरुचंदनादिभिर्लिप्तशिरसं यजमानं आचार्यो भद्रासन उपवेशयेत् ततो यजमा
नः स्वस्तिवाचनं कुर्यात् अनंतरं रूपगुणशालिनीभिः सुवासिनीभिः नीराजनं कारयेत् ततो भद्रासनात्पूर्वदेशा
वस्थितकलशमादायाभिषिंचेत् मंत्रश्च सहस्राक्षं शतधारं ऋषिभिः पावनं कृतं तेन त्वामभिषिंचामि पावमा
नीः पुनंतु ते १ ततो दक्षिणदेशावस्थितकलशमादाय भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः भगमिंद्रश्च वायुश्च
श्च भगं सप्तर्षयो ददुः इत्यनेनाभिषिंचेत् ततः पश्चिमदिगवस्थितमादाय यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ल
लाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदेति १ तत उदक्देशावस्थितकलशमादाय पूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिंचेत् बृहस्पराशा
रेणाप्येषि मंत्रा उक्ताः एतद्वेणवनं स्नानं सहस्राक्षमृषिस्मृतं तेन त्वां शतधारेण पावमान्यः पुनंतु मा १ शक्रादिदश दि
क्पाला ब्रह्मेशाः केशवादयः आपस्तद्घ्नंतु दौर्भाग्यं शांतिं यच्छंतु सर्वदा १ सुभिक्षमनआपओषधयः संतु दुर्भिक्षमस्तु

सैसंतु येषां मान्द्वेष्टि यं च वयं च द्विष्मः समुद्रा गिरयो नद्यो मुनयश्च पतिव्रताः दौर्भाग्यं घ्नंतु ते सर्वे शांतिं यच्छंतु सर्वदा १ पादगु
ल्फोरुजंघादौ नितंबोदरनाभिषु स्तनोरुबाहुहस्ताग्रग्रीवांसांघ्रिसंधिषु २ नासाललाटकर्णाक्षकेशांतेषु च यत्स्थि
स्थितं तदापो घ्नंतु दौर्भाग्यं शांतिं यच्छंतु सर्वदा २ इत्येतैरप्यभिषिंचेदिति केचित् चतुर्थकलशाभिषेचने एवैते पठनी
याः अथाचार्यो यजमानस्य पश्चिमतस्तिष्ठन् सव्यपाणिगृहीतकुशाग्रैर्हि यजमानशिरसि औदुंबरेण स्रुवेणार्पयन्ते
नजुहुयात् ॐ मितायस्वाहा यजमानो मितायस्वाहा यजमानो मितायेदं न ममेति त्यजेदित्येवं सर्वत्रापि ॐ संमिता
यस्वाहा ॐ शालाय ॐ कटंकटाय ॐ कूष्मांडाय ॐ राजपुत्रायेति अथाचार्योग्न्यर्चनाद्याज्यभागांतं कृत्वा चरुणा मि
तादिभ्य एव जुहुयात् यजमानस्तु पूर्ववत्त्यजेत् आचार्यः स्विष्टकृतादि प्रणीताविमोकांतं कर्मशेषं समापयेत् यजमा
नस्त्वभिषेकशालायामिंद्रादिदशलोकपालेभ्यो नाम्ना दिक्षु विदिक्षु च बलीन् दद्यात् एतानि अग्निस्थापन चरुहो
मदिक्पालबलिदानानि मितादिसत्रमनुरुध्योक्तानि ततो मितायैष बलिर्न ममेति पायसेन माषभक्तेन वा मितादिभ्यो
बलिं दत्वा विनायकाविकयोरग्रतः सकृद्वहनतंदुलानां मांसेन तिलपिष्टेन वा मिश्रमोदनं मत्स्यमांसं पक्वमपक्वं च गौ
डीं पैष्टीं माध्वीं इति त्रिविधां सुरां च ब्राह्मणस्य मांसस्थाने सलवणं पायसं सुरास्थाने सलवणं दुग्धं चित्रपुष्पं सुगंधिद्रव्यं मूलकं

शां·म पूरिकाः अपूपाः उंडेरकस्रजः दध्यन्नं पायसं गुडमिश्रं तंडुलादिपिष्टं मोदकांश्च पात्रे संस्थाप्य तत्पुरुषाय विद्महे इति
८ मंत्रेण विनायकाय शुभगायै विद्महे इति मंत्रेण चांबिकायै निवेदयेत् अथाचार्यो नूतनशूर्पे सर्वमुपहारशेषं सं
स्थाप्य चतुष्पथं गत्वा तत्र गोमयेनोपलिप्य कुशानास्तीर्य तत्र शूर्पं प्राङ्मुखं संस्थापयेत् यजमानस्त्वेतैर्मंत्रैर्बलिं द
द्यात् बलिमंत्रास्तु इमे देवाश्चादित्या वसवस्तथा मरुतो वाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः १ असुरा यातुधाना
श्च पिशाचा मातरोरगाः शाकिन्यो यक्षवेतालाः योगिन्यः पूतनाः शिवाः २ जृंभकाः सिद्धगंधर्वाः नागा विद्याधरा न
गाः दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ३ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः मा विघ्नं मा च मे पापं मा
संतु परिपंथिनः ४ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः इति देवादित्यवसुमरुदश्विरुद्रसुपर्णपन्नगग्रहासु
रयातुधानपिशाचमातृउरगशाकिनीयक्षवेतालयोगिनीपूतनाशिवजृंभकसिद्धगंधर्वनागविद्याधरनगदिक्पा
ललोकपालविघ्नविनायकजगच्छांतिकर्तृब्रह्मादिमहर्षिभूतप्रेतेभ्यश्चेदं नममेति त्यागः ततः शिरःसाभूमिं गत्वा पु
ष्पयुतमर्घं तत्पुरुषायेति मंत्रेण विनायकाय शुभगायेत्यंबिकायै च दद्यात् ततो दूर्वासर्षपपुष्पाणां पूर्णोक्तविनायक
मंत्रेण विनायकायांजलिं दद्यात् अंबिकायै तन्मंत्रेण तथैव दद्यात् ततो विनायकमंबिकां चोपतिष्ठेत् मंत्रस्तु रूपंदे

हि यशो देहि भगं भगवति देहि मे पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे १ अस्मिन्भगं भगवन्देहि मे इत्यूह्य विना
यकमुपतिष्ठेत् अनंतरं यजमानः प्राङ्मुखोपविष्टः उदङ्मुखानाचार्यादीन्पूजयित्वाचार्याय वासोयुग्मं कुंभपात्रं ति
लपात्रं चान्यां यथाशक्ति दक्षिणां दद्यात् तत उत्तिष्ठ ब्रह्मणस्पत इत्यनेन यांतु देवगणा इत्यनेन च विनायकमंबिकां चो
पस्थाप्य विसृज्य प्रतिमादि सर्वां सामग्रीमाचार्याय दद्यात् ततो यथाशक्ति भूयसीं दक्षिणां दीनानाथेभ्यो दत्वा यथाश
क्ति विनायकप्रीत्यर्थमंबिकाप्रीत्यर्थं च ब्राह्मणान्भोजयित्वा संकल्प्य वायसस्मृतेत्युक्त्वा न्यूनातिरिक्तं सर्वं संपूर्णम
स्त्विति तान्संप्रार्थ्य तैरनुज्ञातः सुहृद्युक्तो भुंजीत ॥ इति श्रीमत्शंकरभट्टसूनुभट्टनीलकंठकृते भास्करे शांतिमयू
खे विनायकशांतिपद्धतिः ॥ अथ ग्रहयज्ञः स्कांदे देवदानवगंधर्वा यक्षराक्षसकिन्नराः पीड्यंते ग्रहपीडाभिः किं पु
नर्भुवि मानवाः १ शनैश्चरेण सौदासो नरमांसे नियोजितः राहुणा पीडितो राजा नलो भ्रांतो महीतले २ अंगारकनि
रोधेन रामो राष्ट्रान्निवारितः अष्टमेन शशांकेन हिरण्यकशिपुर्हतः ३ रविणा सप्तमस्थेन रावणो विनिपातितः गुरु
णा जन्मसंस्थेन हतो राजा सुयोधनः ४ पांडवाः सौम्यपीडायां विकर्मणि नियोजिताः षष्ठेनोशनसा युद्धे हिरण्याक्षो
निपातितः ५ एते चान्ये च बहवो ग्रहदोषैः सुपीडिताः याज्ञवल्क्यः ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च भावाभा

शां·म वौचजगतस्तस्मात्पूज्यतमाग्रहाः १ प्रयोगपारिजातउत्पलपरिमले कार्यारंभेषुसर्वेषु प्रतिष्ठास्वध्वरेषु च नववेश्मप्रवेशे च ग
९ र्भाधानादिकर्मसु आरोग्यस्नानसमये संक्रांतौ रोगसंभवे २ अभिचारेचयः कुर्याद्ग्रह पूजांविधानतः सोभीष्टफलमाप्नोति
निर्विघ्नेनन संशयः इति याज्ञवल्क्यः श्रीकामः शांतिकामोवा ग्रहयज्ञंसमाचरेत् वृष्ट्यायुः पुष्टिकामोवा तथैवाभिचर
न्नपि १ मात्स्ये ग्रहयज्ञास्त्रिधाप्रोक्ताः पुराणश्रुतिकोविदैः प्रथमायुतहोमःस्याल्लक्षहोमस्ततः परं तृतीयः कोटिहो
मस्तु सर्वकामफलप्रदः ग्रहस्योत्तरपूर्वेण मंडपं कारयेद्बुधः रुद्रायतनभूमौवा चतुरस्रमुदक्प्लवं १ दशहस्तमथा
ष्टौवा हस्तान्कुर्याद्विधानतः तस्यद्वाराणि चत्वारि कर्तव्यानि विचक्षणैः २ स्नानेनवग्रहमखे कुंडेहस्तमात्रं समंभवे
त् चतुरस्रमथाहस्तं योनिवक्त्रं समेखलं १ योनिरेववक्त्रंयस्यतत् पुत्रादिकामनायां तु योन्याप्याकारा अपि भवंति चतु
रंगुलविस्तारा मेखलातद्वदुच्छ्रिता अत्र विशेषोपदेशादेकैवमेखला मात्स्येवितस्तिमात्रायोनिः स्यात् षट् सप्तांगुल
विस्तृता कूर्मपृष्ठोन्नतामध्ये पार्श्वयोश्चांगुलोच्छ्रिता १ गजोष्ठसदृशीतद्वदायता छिद्रसंयुता मेखलोपरि सर्वत्र अश्व
त्थदलसन्निभा २ एकंकुंडंचमंडपेशानभागउदीच्यांवेति हेमाद्रिः अयुतादिहोमंप्रकृत्यवशिष्ठः कुंडंतन्मध्यभागे
तु कारयेच्चतुरस्रकंकुंडस्येशानभागेतु पूजावेदीं प्रकल्पयेत् १ इत्याह अत्र चतुरस्रमित्यनेन क्षत्रियादिपुरस्कारेण वि

हितानामाकारविशेषाणां स्त्रीपुरस्कारेण विहितस्य योन्याकारस्य निवृत्तिः योनौपुत्राः शुभं दलेहाप्यद्वंद्वयाः कास्याः
स्त्वाकाराभवंत्येव वेद्यांविशेषमाह गोभिलः कुंडस्यप्रागुदीच्यांवाप्राच्यांमुत्तरतोपि वा चतुरस्रां चतुर्हस्तां कर्तव्यां ग्रहपी
ठकं १ श्रीकामः पूर्वतः कुर्यात्पुष्ट्यर्थं दक्षिणेन तु पश्चाद्विजन्मसिध्यर्थं शांत्यर्थं चोत्तरेण तु २ ईशान्यां सर्वकामार्थं त्वा
ग्नेय्यांत्वभिचारके नैर्ऋत्यां पुत्रलाभाय पुष्ट्यर्थं वायवे न तु ३ इतिवेदीतुस्थंडिलपक्षे कार्या वशिष्ठः त्रिवेदष्टदलं प
द्मंवेदिकोपरितंडुलैः अत्रैकाग्निब्रह्माचार्यपक्षमुक्त्वात्र पानवसंख्याकुंडेषु तत्तद्ग्रहाकारांचाह प्रयोगपारिजाते भग
वान् मनोरमे भुवोदेशे होमशालामलंकृतां कृत्वातु संवृतां प्राज्ञो ग्रहस्थानं प्रकल्पयेत् १ तन्मध्ये भास्करस्थानं भवेत्स
र्वोत्तमेबुधः पूर्वस्मिन्भागवस्थानं सोमोदक्षिणपूर्वके २ दक्षिणस्यांकुजस्थानं राहोर्दक्षिणपश्चिमे शनेस्तु पश्चिमेस्था
नं केतोरुत्तरपश्चिमे ३ उत्तरस्यांगुरोः स्थानं एवं च स्थंडिलंभवेत् स्थंडिलमस्यर्थं भास्करस्य तु वृत्तं स्याच्चंद्रस्यचतुरस्र
कं ४ कुजस्य तु त्रिकोणं स्याद्बाणाकारं बुधस्य तु गुरोर्दीर्घचतुष्कोणं पंचकोणं सितस्य तु ५ चापाकारं शनिराह्वोः सूर्प
केतोर्ध्वजाकृतिः नवधा विभजेदग्निं श्रौतकर्मविधानतः ६ ऋत्विजश्च यथायोगं कुंडेषु ब्राह्मणाः पृथक् अथ स्रुवे
णजुहुयात्स्वयं पावकरुद्रकान् ७ ऋत्विजोजुहुयुः सर्वे स्रुवेणैव पृथक् पृथक् अष्टौचकलशान्गृह्यसमारोयण

मग्निषु ८ प्रधानाग्नौविधायेमानिष्टंहोमंसमाचरेदिति अथैवस्थंडिलेभवेदिसनेनस्थंडिलानांकुंडानांचससआका
रस्तत्रहिक्षुनिवेशश्चोक्तः ब्राह्मणाः पृथगीत्यनेननवाचार्यानवब्रह्मणाश्चेत्युक्तं अत्रार्थसंक्षेपः प्रयोगपारिजा
ते मध्यकुंडेस्मार्ताग्निंप्रणीय ततोनवाचार्याअष्टसुकुंडेष्वग्निंप्रणीयाज्यभागांतंकार्दिसमिद्धिर्गुडोदनादिहविर्भि
राज्येनचग्रहादिमंत्रैर्हुत्वा व्यस्तसमस्तव्याहृतिभिश्चतिलान्हुत्वा स्विष्टकृतादिहोमशेषंकृत्वा पूर्णाहुतिंजुहु
युरिति कुंडमुक्त्वास्थंडिलेतुस्पचोत्तरपूर्वेणस्थंडिलंहस्तमात्रकं त्रिवप्रंचतुरस्रंचवितस्त्युच्छ्रायसंमितं १ स्थंडिल
वेदिः वप्रामेखलामात्स्ये द्विरंगुलोच्छ्रितोवप्रः प्रथमः समुदाहृतः त्र्यंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि १ द्व्यं
गुलस्तत्रविस्तारः सर्वेषांकथितोबुधैः २ तत्रग्रहानाहयाज्ञवल्क्यः सूर्यः सोमोमहीपुत्रः सोमपुत्रोबृहस्पतिः शु
क्रः शनैश्चरोराहुःकेतुश्चेतिग्रहाःस्मृताः १ स्कांदेनवग्रहमखेकुर्यादृत्विजश्चतुरःशुभान् अथवाप्येकमभ्यर्च्यविधि
नाब्रह्मणासह १ तथानवग्रहमखेविप्राश्चत्वारोवेदवादिनः त्रिविधमपिनवग्रहमुपक्रम्य वशिष्ठस्तु षोडशब्रा
ह्मणानभुक्तान्दंभानृतविवर्जितान् तेषांमध्येश्रेष्ठतमंआचार्यंतुप्रकल्पयेदिति १ अत्रपारिजातेनवाचार्याएकोब्र
ह्माषडृत्विजः आचार्येभ्योनवभ्यश्चग्रहार्चनफलंततः इत्युक्तेः आचार्यकर्मएकएवकुर्यात् परेत्वन्वारंभमात्रंधेन्वा

घायहदक्षिणाअर्पितेभ्यएवदेया इत्याद्युक्तं तदयुक्तं उपक्रमेएकाचार्येनवाचार्यसमुदायेप्राणावदुपदधातीतिवत् ॥
लिंगसमवायमात्रेणानवभ्यइत्युपसंहारस्यपदोपपत्तेः उपक्रमेपि यद्यथाचार्यस्यसंस्कार्यत्वेनैकत्वमविवक्षितंत
थाप्याचार्यस्यभूतभाव्युपयोगाभावात्संस्कार्यत्वानुपपत्तेः वृतआचार्यः स्वकर्मकुर्यादितिकल्पितेवाक्येउपादेयत्वा
दाचार्यस्यभवस्येकत्वंविवक्षितं उपपादितंचेदमध्वर्युंवृणीतेहोतारंवृणीतेपुरोहितंवृणीतइत्यत्र मिश्रे जन्मभूर्गो
त्रमग्निश्चवर्णाः स्थानमुखानिचयोज्ञात्वाकुरुतेशांतिंग्रहास्तेनावमानिताः १ तत्रवर्णजन्मनीआह दामोदरीयेरू
द्रयामले रक्तः कश्यपजोभानुःमुक्तोब्रह्मसुतः शशीरक्तोरुद्रसुतोभौमः पीतः सोमसुतोबुधः १ पीतोब्राह्मःसुरा
चार्यः भृगुः भृगोर्गृहह कृष्णः शनीरवेः पुत्रः कृष्णोराहुःप्रजापतेः २ कृष्णः केतुःकृशानुस्तुः कृष्णापापाश्चयो
प्यमी ३ स्कांदेउत्पत्तिलोकः कलिंगेषुयमुनायांचचंद्रमाः अंगारकस्त्ववंत्यांमगधायांहिमांशुजः सैधवेषुगुरुर्जा
तः भृगुर्भोजकटतथा शनैश्चरस्तुसौराष्ट्राहुर्वैराटिनापुरे अंतर्वेद्यांतथाकेतुरित्येताग्रहभूमयः १ यस्ययस्तत्रयज्ञे
चैततेवक्ष्याम्यतः परं आदित्यःकाश्यपोगोत्रे आत्रेयश्चंद्रमाभवेत् १ भारद्वाजोभवेद्भौमस्तथा त्रेयश्चसोमजः शक्र
पूज्योंगिरोगोत्रः भृगुर्वैभार्गवस्तथा २ शनिःकाश्यपएवाथराहुः पैठीनसिस्तथा केतवोजैमिनीयाश्चग्रहाग्निस्तदना

तरं ३ आदित्यःकपिलोनामपिंगलःसोमउच्यते धूमकेतुस्तथाभौमोजाठराग्निर्बुधःस्मृतः४ गुरोश्चैवशिखीनामभृ
गोर्भवतिहाटकः शनैश्चरेमहातेजाराहुकेत्वोर्हुताशनः५ एतानिग्रहविशेषतोग्निनामानि कर्मविशेषतोपि दे
वीपुराणे शुभोग्रहविधौह्यग्निर्लक्षहोमेपराजितःकोटिहोमेशिवोवह्निःसर्वकामप्रदायकः १क्वचित्तुलक्षहोमेतुव
न्हिःस्यात्कोटिहोमेहुताशनइति स्कांदेभास्करांगारकौश्वेतौशुक्रनिशाकरौ सोमपुत्रोगुरुश्चैवतावुभौपीतकौस्मृतौ१
कृष्णंशनैश्चरंविद्याद्राहुंश्विदाश्चकेतवःमध्येतुभास्करंविद्याच्छशिनंपूर्वदक्षिणे २दक्षिणेलोहितंविद्याद्बुधंपूर्वोत्त
रेणतुउत्तरेणगुरुंविद्यात्पूर्वेणैवतुभार्गवं ३पश्चिमेनशनिंविद्याद्राहुंदक्षिणपश्चिमे पश्चिमोत्तरतःकेतुंस्थाप्यावै
शुक्लतंदुलैः ४ अथवावर्णकैःकार्याःकार्याःस्वर्णादिधातुभिः याज्ञवल्क्यः ताम्रकात्स्फाटिकाद्रक्तचंदनात्स्वर्णजा
वुभौरजतादयसस्सीसात्कांस्यात्कार्याग्रहास्तथा१ वशिष्ठःयथाकृतिप्रमाणेनप्रतिमाःकल्पयेत्सुधीः अत्रसर्वग्र
हाणांसूर्यादिक्रमःस्पष्टः बौद्धायनस्तु सूर्यांगारकशुक्रचंद्रबुधगुरुशनयइत्याह स्कांदे भानुंतुमंडलाकारं सोमंतुचतु
रस्रकं अंगारकंत्रिकोणंचबुधंबाणाकृतिंतथा१ दीर्घचतुरस्रंगुरुंपंचास्रंगुरुंपंचास्रंभार्गवंतथा धनुस्तुल्यंशनिं
विद्याद्राहुंशूर्पाकृतिंतथा २ ध्वजाकाराःकेतवश्चकारणीयास्तत्ररूपिणःहस्तपादाद्यवयवयुक्ताःस्थापयेच्छुक्लतंदुलैर्वर्णा

कैर्वास्वास्वेतेनत्वश्वपोमंडलाद्याकारतेति हेमाद्रिःतत्रैवशुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ प्रत्यङ्मुखः
शनिःसोमःशेषादक्षिणतोमुखाः१ इदंचशुक्रादीनांप्राङ्मुखत्वात् आदित्याभिमुखाःसर्वइतिमात्स्योक्तादित्याभिमु
खत्वेनविकल्प्यते यत्तुहेमाद्रिर्विकल्पपरिजिहीर्षया प्राङ्मुखावूर्ध्वदृष्टीउदङ्मुखौसमदृष्टीप्रत्यङ्मुखोधोदृष्टिःद
क्षिणातेमुखाःदक्षिणदृष्टयइतिव्याचष्ट तत्रमूलंचिंत्यं विरोधवतादृश्यश्च वर्णरूपगुणैर्युक्तान् मात्स्यावाहा
येत्तुतान् मात्स्ये पुराणेहिविप्रकथितेकृत्वाब्राह्मणवाचनं अग्निप्रणयनंकृत्वावेद्यामावाहयेत्सुरान् १ देवानांतत्रसं
स्थाप्याविंशतिर्द्वादशाधिका आदित्याभिमुखाः सर्वेसाधिप्रत्यधिदेवताः २ विष्णुधर्मोत्तरे अतः परंप्रवक्ष्यामियोदेवो
योग्रहःस्मृतः अग्निरर्कःस्मृतःसोमोवरुणःपरिकीर्तितः१ अंगारकःकुमारश्चबुधश्चभगवान्हरिःबृहस्पतिःस्मृ
तःशक्रःशुक्रोदेवीचपार्वती २ प्रजापतिःशनिश्चैवराहुर्ज्ञेयोगणाधिपःविश्वकर्मास्मृतःकेतुर्येग्रहास्तेसुराःस्मृताः
३ अतएवाग्न्यादिलिंगकामंत्राःसूर्यादिस्थापनउक्ताःस्कांदे अग्निंदूतंदिनेशायसूर्यायाप्सुंतदित्यपि स्योनापृथिवीभौ
मायइदंविष्णुर्बुधायच१ इंद्रआसांसुरेज्योतिःसितायचप्रजापतेतिसौरायआयंगौरीतिराहवे २ केतवेब्रह्मजज्ञानंखे
स्वैर्मंत्रैःप्रतिष्ठिताः एतेषांचैवमंत्राणांमात्स्यावाहयेत्तुतान् ३ इत्युक्ताभिर्व्याहृतिभिरावाहनेविकल्पः मदनरत्नेवा

ज्यायसुकं२

श्रो.भ.
९२

ह्वनस्थापनयोर्भेदाभावात्तु तिमिरावाहनं एतैर्मंत्रैः स्थापनमित्यूचे पारिजाते वामनस्तु प्रणवेनादितः कृत्वा भूर्भुवः स्वः न
तःपरं चतुर्थ्यानामसंयुक्तं नमस्कारांतयोजितं १ एष मंत्रः समाख्यातो ग्रहपूजाविधायकः अनेनावाहनं कुर्यादनेनैव
विसर्जनमित्यूचे अत्र आवाहनवाक्येषु विशेषमाह बौधायनः किरीटिनं पद्मासनं पद्मकरं पद्मगर्भसमद्युतिं सप्ता
श्वं सप्तरज्जुं कलिंगदेशजं काश्यपगोत्रं विश्वामित्रार्षं त्रिष्टुप्छंदसं रक्तांबरधरं रक्ताभरणभूषितं रक्तगंधानुलेपनं र
क्तछत्रध्वजपताकोपशोभितं मुकुटकेयूरमणिशोभितं आरूढरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडलप्रविष्टमधि
देवताग्निसहितं प्रत्यधिदेवतेश्वरसहितं रक्तवृत्तमंडले पूर्वमुखमादित्यमावाहयामि १ किरीटिनं रक्तमाल्यांबरं रक्त
शूलगदाधरं चतुर्भुजं मेषगमनमवंतिदेशजं वाशिष्ठगोत्रजं जमदग्न्यार्षं जगतीछंदसं रक्तांबरधरं रक्ताभरणभूषितं र
माल्यानुलेपनं रक्तछत्रध्वजपताकिनं मुकुटकेयूरमणिशोभिप्यदलाग्रेषु क्रमान्न्यसेत् इंद्रादिलोकपालांश्च तत्तन्मंत्रै
मपूजयेत् १ विनायकं तथा दुर्गां वायुमाकाशमेव च आवाहयेद्व्याहृतिभिस्तथैवाश्विकु[illegible]रकौ २ [illegible] विनायकाद्याः
पंचग्रहेभ्य उत्तरतः स्थाप्याः इति सांप्रदायिकाः दक्षिणापश्चिमवायव्योत्तरपूर्वेषु यथाक्र[illegible]मित्यन्ये एत[illegible] दिनेशानाउ
त्तरस्यां यथाक्रमं गणेशो दुर्गा वायुश्च राहुकेत्वोश्च पश्चिमे १ आकाशमश्विनौ चेति पंचैतान्स्थापयेद्बुधः इति संग्रहानुसा

रेणेति पितामहचरणाः रूपनारायणश्च स्कांदे उत्तरे शनिसूर्याभ्यां गुरुकेत्वोश्च दक्षिणे गणाधिपं प्रतिष्ठाप्य सर्वं देवनम
स्कृतं १ रविचंद्रानिकेतू गुरूणां मध्य इति फलितोर्थः विनायकपदमुपलक्षणं तेन दुर्गादयोप्यत्रैव स्थाप्या इति केचित् चं
दनादिनियमस्तत्रैव दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं चंद्रे च भार्गवे चैव सितवर्णं प्रदापयेत् १ कुंकुमेन तु संयुक्तं
चंदनं जीवसौम्ययोः अगरुं चंदनं दद्याद्राहुकेत्वर्कजेषु च २ ग्रहवर्णानि पुष्पाणि गायत्र्या धूपमाहरेत् रवेः कुंदुरु
कं धूपं चंद्राशिनस्तु घृताक्षताः ३ भौमे सर्ज्जरसं चैव अगरुं च बुधे स्मृतं सिल्हकं गुरवे दद्याच्छुक्रे बिल्वागुरुस्तथा ४ गु
ग्गुलं मंदचारे तु लाक्षा राहोश्च केतवे ५ कुंदुरुकः सल्लकीनिर्यासः सिल्हकं सिल्हा इति मध्यदेशे प्रसिद्धं बिल्वागुरुं भ
बिल्वफलनिर्याससहितमगरुं मंत्रपाठः शनिः उदीप्यस्वेति मंत्रेणैदोपं दद्यादतः ऊर्ध्वं विहितगंधधूपानामसंभवे तु पा
ज्ञवल्क्यः यथाह ५ किरीटिनं पीतवर्णं चतुर्भुजं दंडिनं वरदं साक्षसूत्रकमंडलुं सिंधुदेशजमांगिरसगोत्रं वाशिष्ठार्षं अनु
ष्टुप्छंदसं पीतांबरधरं पीताभरणभूषितं पीतपीतगंधानुलेपनं पीतगंधानुलेपनं पीतछत्रध्वजपताकिनं मुकुटकेयूरम
णिशोभितं मारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवतेंद्रसहितं प्रत्यधिदेवताब्रह्मसहितं पीत
दीर्घचतुरस्रमंडले उदङ्मुखं गुरुमावाहयामि ६ किरीटिनमिंद्रनीलसमद्युतिं शूलधरं वरदं गृध्रवाहनं सबाणबाणास

नधरं सौरं शूद्रे शजं काश्यपगोत्रजं भृग्वार्षं गायत्रीछंदसं कृष्णांबरधरं कृष्णाभरणभूषितं कृष्णगंधानुलेपनं कृष्णछत्रध्व-
जपताकिनं मुकुटकेयूरमणिशोभितमारुह्यरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताप्रजापतिस-
हितं प्रत्यधिदेवता यमसहितं कृष्णधनुर्मंडले प्रत्यङ्मुखं शनैश्चरमावाहयामि ७ किरीटिनं करालवदनं खड्गचर्मशू-
लधरं सिंहासनस्थं पूर्वदेशजं पाठीनसिगोत्रं मांगिरसार्षमनुष्टुप्छंदसं कृष्णांबरधरं कृष्णाभरणभूषितं कृष्णगंधानुलेप-
नं कृष्णछत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्यरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेव-
ता सर्पसहितं प्रत्यधिदेवता कालसहितं कृष्णशूर्पमंडले दक्षिणामुखं राहुमावाहयामि ८ धूम्रान् द्विबाहून् पाशध-
रान् विकृतान्नान्यभवाहनान् किरीटिनो मध्यदेशजान् जैमिनिगोत्रजान् गौतमार्षान् नानाछंदसश्चित्रांबरधरान् चि-
त्राभरणभूषितान् चित्रगंधानुलेपनान् कृष्णपिंगध्वजपताकिनो मुकुटकेयूरमणिशोभितानारुह्यरथं दिव्यं मेरुं प्रदक्षि-
णीकुर्वाणान् ग्रहमंडले प्रविष्टान् अधिदेवताब्रह्मसहितान् प्रत्यधिदेवता चित्रगुप्त[illegible]तान् [illegible]ध्वजमंडले
दक्षिणामुखान् केतून् आवाहयामि ९ ईश्वरं भास्करे विंद्यादुमां विद्यान्निशाकरे स्कंदमंगारके विंद्याद्बुधे नारायणं
विदुः गुरौ वेदनिधिं विंद्याच्छुक्रे शक्रो विधीयते शनैश्चरे यमं विद्याद्राहौ कालं तथैव च २ चित्रगुप्तोधिपः केतोरित्येते

ग्रहदेवताः ३ वेदनिधिर्ब्रह्मा तत्रैव वक्ष्ये स्थानानि देवानामीश्वरादि यथाक्रमं सूर्यस्यैवोत्तरे शंभुमुमां सोमस्य दक्षिणे १
स्कंदं मंगारकस्यैव दक्षिणस्यां निवेशयेत् सौम्यात्पश्चिमतो विष्णुं ब्रह्माजीवस्य पूर्वतः २ इंद्रमैंद्र्यां सिताद्विद्यान्मंदादाग्नेय-
तो यमं राहोः पूर्वोत्तरे कालं सर्वभूतभयावहं ३ केतोर्नैर्ऋतदिग्भागे चित्रगुप्तं निधापयेत् ४ [illegible]स्थापने मंत्राश्च
कथयाम्यनुपूर्वशः ईश्वरं त्र्यंबकं चेति श्रीश्चते चेति पार्वती १ यदक्रंदेति च स्कंदं विष्णुर्विष्णोरराटमिति आब्रह्मन्निति ब्र-
ह्माणं सजोषेंद्रेति वासवं २ यमाय त्वेति च यमं कालं कालकाषीति मंत्रतः चित्रावसुरिति मंत्रेण चित्रगुप्तं निधापयेत् ३
अग्निरापः क्षितिर्विष्णुरिंद्र ऐंद्री प्रजापतिः सर्पा ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्रमं ४ अग्निं दूतमिति त्वग्ने वरुणास्यतुदु-
तं मस्योना पृथिवी मे द्विन्या इदं विष्णुस्तु विष्णवे ५ इंद्रायेंदो इतींद्रस्यो नान्यणेशा विस्थितौ प्रजापते प्रजेशस्य एष ब्रह्मो-
क्तिवै विधिः ६ मंत्रा नमोस्तु सर्पेभ्यः सर्पाणां स्थापने मतः ग्रहदेवाधिदेवानां नैवेद्यं कुसुमानि च ७ ग्रहवद्वासनं दानं स्था-
पनं चानुपूर्वशः अत्र सूर्यादयो ग्रहा ईश्वरादयो देवाः आग्न्यादयोधिदेवाः तत्रेश्वरादिदेवानां सूर्यस्यैवोत्तरे शंभुमित्या-
दिना पूर्वस्थलान्युक्तानि अग्न्याद्यधिदेवास्तु ग्रहदेवयोर्मध्ये स्थाप्याः तथा च मदनरत्ने गोभिलपरिशिष्टे ग्रहदेवतयो-
र्मध्ये अधिदेवान्निधापयेत् तत्रैव संग्रहे तु ईश्वरादयो देवा अधिदेवतात्वेन व्यवहृता अग्न्यादयस्तु प्रत्यधिदेवतात्वेन ते

नांस्थानांतरंचोक्तं अधिदेवाद्दक्षिणतोवामेप्रत्यधिदेवताः स्थापनीयाः प्रयत्नेनव्याहृतीभिः पृथक्पृथक् १ तत्रैववासिष्ठीये
तुदेवतानांस्थानांतरंक्वचिन्मंत्रांतरंचोक्तं रुद्रंत्र्यंबकमंत्रेणरवेरुत्तरतोन्यसेत् सोमस्याग्नेयदिग्भागेश्रीश्चतेमेनकाल्मजा
यदक्रंदेति भौमस्यस्कंदंयाम्येप्रदापयेत् विष्णुंविष्णोरराटेनतुयजेत्पूर्वे बुधस्यतु २ गुरोरुत्तरतोभ्यर्च्यब्रह्माब्रह्मेतिमंत्रतः
सजोषेंद्रेतिशुक्रस्यप्राच्यांशक्रंनिधापयेत् ३ शनेःपश्चिमतःस्थाप्योयमायत्वेतिचायमः कार्षिरसीतिमंत्रेणराहोःका
लंतथोत्तरे ४ चित्रगुप्तंतुकेतूनांचित्रावसेतिनैर्ऋते ग्रहाश्चदेवताख्याताःशृणुष्वातोधिदेवताः ५ अग्निरापोधराविः
ष्णुरिंद्रेंद्राणीप्रजापतिः सर्पाब्रह्मचनिर्दिष्टाअधिदेवायथाक्रमं ६ ग्रहदेवतयोर्मध्येअधिदेवान्निवेशयेत् एतानिचवा
शिष्ठीयवचांसिकेचिन्नाद्रियंते पारिजातेपद्मप्राग्दलमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टम
धिदेवताभूमिसहितंप्रत्यधिदेवतास्कंदसहितंत्रिकोणारक्तमंडलेदक्षिणामुखंअंगारकमावाहयामि २ किरीटिनंश्वे
तवर्णंचतुर्भुजंदंडिनंवरदंकमंडलुसाक्षसूत्रकमंडलुंकीकटदेशजंभार्गवगोत्रजंशौनकार्षेयं ... श्वेतांबरधरंश्वेता
भरणभूषितंगंधानुलेपनंश्वेतछत्रध्वजपताकिनंमकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्र
हमंडलप्रविष्टमधिदेवतेंद्राणीसहितंप्रत्यधिदेवेंद्रसहितंशुक्रंपंचकोणमंडलेप्राङ्मुखंभगवंतंशुक्रमावाहयामि ३

किरीटिनंश्वेतांबरधरंदशाश्वंश्वेतभूषणंपाशपाणिंद्विबाहुंयमुनादेशजमत्रिगोत्रमात्रेयार्षमनुस्तुंदसंश्वेतांबरध
रंश्वेताभरणभूषितंश्वेतगंधानुलेपनंश्वेतछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणी
कुर्वाणंग्रहमंडलप्रविष्टमधिदेवतापसहितंप्रत्यधिदेवतोमासहितंचतुरस्रमंडलेप्रत्यङ्मुखंसोममावाहयामि ४
किरीटिनंपीतमाल्यांबरधरंपीतवर्णंकर्णिकारसमद्युतिंखड्गचर्मगदापाणिंसिंहस्थंवरदंमगधदेशजमत्रिगोत्रजभा
रद्वाजार्षंजगद्दृहतीछंदसंपीतांबरधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतछत्रध्वजपताकिनंमुकुटकेयूरमणि
शोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवताविष्णुसहितंप्रत्यधिदेवताविष्णुसहितं
पीतवाणमंडलेदक्षिणामुखंबुधमावाहयामि वर्णांश्चदेयानिवासांसिकुसुमानिच गंधाश्चबलयश्चैवधूपोदेयश्चगुग्गुलुः
१ रक्तादेगुडोदनंरवेर्दद्यात्सोमायघृतपायसं लोहितायहविष्यान्नंबुधायक्षीरषाष्टिकं १ दध्योदनंगुरोर्देयंशुक्राय
चघृतौदनं मिश्रितंतिलमाषैश्चनैवेद्यंचशनैश्चरे २ राहोर्मांसौदनंदद्यात्केतोश्चित्रौदनंतथा चित्रौदनंतिलतंदुलं
मिश्रंस्यादजाक्षीरंचशोणितं कर्णनासाग्रहीनंस्याद्वेतच्चित्रौदनंस्मृतमितिदामोदरः ३ एतेरेवद्रव्यैर्ब्राह्मणाअपिभो
ज्याः तथाचयाज्ञवल्क्यः गुडोदनंहविष्यंपायसंचक्षीरषाष्टिकं दध्योदनंहविश्चूर्णंमांसंचित्रान्नमेवच दद्याद्ग्रहक्रमादे

शां०म०
५१

तिद्विजेभ्योभोजनंबुधः २ शक्तितोवायथालाभंसंकल्पविधिपूर्वकं ३ वशिष्ठः उपचाराणिसर्वेषामपिशुक्लाक्षतैःसुदा
गंधाभावेशुक्लगंधपुष्पाभावेसुगंधकं १ धूपाभावेगुग्गुलःस्याद्द्रव्याभावेतुमिश्रकं पंचामृतगवामेवमिश्रकंनकदाचने
ति मात्स्येमाणुत्तरेशांतस्नाच्चदध्यक्षतविभूषितं चूतपल्लवसंयुक्तंफलवल्लपुगान्वितं १ पंचरत्नसमायुक्तंपंचभंगयुतं
तथा स्थापयेद्व्रणांकुंभंवरुणंतत्रविन्यसेत् २ गंगाद्याः सरितः सर्वाः समुद्राश्चसरांसिच गजाश्वरथ्यावल्मीकासंग
माह्रदगोकुलात् ३ मृदमानीयविप्रेंद्रसर्वौषधिसमन्वितं स्नानार्थविन्यसेत्तत्रयजमानस्यधर्मवित् ४ याज्ञवल्क्यः
अर्कः पलाशः खदिर अपामार्गोथपिप्पलः उदुंबरः शमीदूर्वाकुशाश्चसमिधः क्रमात् १ ईश्वरादिदेवानांस्वस्वग्र
हसमिद्भिरेवहोमः हेमाद्रौदेवीपुराणे गणाधिपतयेदेयाप्रथमातुवराहुतिः अन्यथाविफलविसमवतीहनसंशयइति
१ आश्वलायनः जुहुयात्समिदन्नाज्येनाभिरग्भिर्यथाक्रममिति समित्सुविशेषमाह याज्ञवल्क्यः होतव्यामधुसर्पिर्भ्यां
दध्नाक्षीरेणवायुताइतिनचात्रसंप्रतिपन्नदेवताकानेकद्रव्याणामेकैवाहुतिः सान्नाय्यवदितिवाच्यं आदौतुसमि
दन्नाज्यैःपृथगंतेशतमितिवाशिष्ठात् अन्यत्रापिसंप्रतिपन्नदेवताकेस्मार्तकर्मण्यनेकद्रव्यकेपृथगेवहोमइ
तिसांप्रदायिकाः वहुस्वकर्मसुप्रायोवचनान्यप्येवंस्कांदे आकृष्णेनसहस्रांशोरिमंदेवातथैवदवे अग्निर्मूर्धेतिभौमा

य उद्बुध्यस्वबुधाय च १ बृहस्पतेतिचगुरोः शुक्रायान्नात्परिस्रुतः शनैश्चरस्यमंत्रोयंशन्नोदेवीरुदाहृतः २ कयानइति
राहोश्चकेतुंकृण्वन्नकेतवे ३ मात्स्ये आवोराजेति रुद्रस्यबलिहोमंसमाचरेत् आपोहिष्ठेत्युमायास्तुस्योनेति
स्वामिनस्तथा १ विष्णोरिदंविष्णुरितित्वमित्येतिस्वयंभुवः इंद्रमिद्देवतातयइतींद्रस्यप्रकीर्तितः २ तथायमस्यच
यमेगौरितिहोमः प्रकीर्तितः कालस्यब्रह्मयज्ञानमितिमंत्रः प्रकीर्तितः ३ चित्रगुप्तस्यचाज्ञातमितिपौराणिकाविदुः
अग्निंदूतंवृणीमहेइतिवन्हेरुदाहृतः ४ उदुत्तमंवरुणेति अपांमंत्रः प्रकीर्तितः भूमेः पृथिव्यांतरिक्षमितिवेदेषु
पठ्यते ५ सहस्रशीर्षापुरुषइतिविष्णोरुदाहृतः इंद्रायेंद्रोमरुत्वतइतिशक्रस्यशस्यते ६ उत्तानपर्णेसुभगेइतिशच्या
समाचरेत् प्रजापतेः पुनर्होमःप्रजापतइतिस्मृतः ७ नमोस्तुसर्पेभ्यइतिसर्पाणांमंत्रउच्यते एषब्रह्मापऋत्विजइ
तिब्रह्मणस्तुदाहृतः ८ विनायकस्यचाम्नूनइतिमंत्रोबुधैःस्मृतः जातवेदसेसुनवामदुर्गामंत्रोत्रउच्यते ९ पूर्णाइति
चमूर्धानंदिवइत्यभिघातयेत् १० स्कांदेनैवेद्यशेषंहुत्वाचहोमंमंत्रादनंतरं अथाष्टोत्तरतिमिर्हुत्वाएकैकस्यपया
क्रमं १ अष्टोत्तरंचसाहस्रंशतमष्टाधिकंतथा अष्टाविंशतिरष्टौवाएकैकस्यतुहोमयेत् २ होतव्यंघृतं तत्र चरुलं
क्षादिकंपुनः मंत्रैर्दशाहुतिर्हुत्वाहोमोव्याहृतिभिःस्मृतः ३ अथेति अथर्ववेदस्यर्थः गृहीत्वातामथाविकामितिवत् म

ग्र॰ स॰ २६

दनस्त्वथ वैसेवयथापाठः तत्तन्मंत्राणां व्याहृतीनां च परस्परं विकल्पः अशोत्तरसहस्रादिसंख्या तु पक्षद्वयेपि नैवेद्य
शेषहोमस्तु शाखाविशेषपद्धत्यपि स एवं लक्षादिकः पुनर्व्याहृतिभिर्होमो मंत्रैर्दशाहुतीर्हुत्वा स्मृतइत्यन्वयः मंत्रै
र्ग्रहमंत्रैर्व्याहृतिभिर्व्यस्ताभिः समस्ताभिश्च तासां चतुरणास्तु अथव्याहृतिभिर्हुत्वेति एयत्वाक्यं एकैकस्येतु प्रतिदैव
तमष्टादिसंख्यान्वयार्थं एकैकस्यतु होमये दित्येकेकपदं तु चर्वादिद्रव्यपरं नदेवतापरं अस्मिन्नेव होमे घृतचरुवि
धिरमेलनादिकर्तव्ये ततु अथव्याहृतिभिर्हुत्वेति विहिते होमे लक्षादिसंख्याविध्यर्थं मंत्रैरित्यादि तु चरुहोमोत्तर
सोमं राजानमिति मंत्रेणायथाप्रकृतिस्विष्टकृद्धुत्वा सूर्यादिभ्यो दशाहुतिः प्रतिदैवतं लक्षहोमादिद्रव्येण हुत्वा व्याहृ
तिभिर्लक्षादिहोमः कार्यइत्याहुः पवाघन्यतमद्रव्येणाग्न्याहादिभ्यः प्रत्येकं दशाहुतीस्तत्तन्मंत्रैर्हुत्वा तेनैव द्रव्येण व्यस्त
समस्तव्याहृतिभिः पुनर्लक्षकोट्यन्यतमसंख्यया जुहुयादिति हेमाद्रिमदनौ तानि च द्रव्याणि देवीपुराणे यवव्रीहि
घृतक्षीरतिलकंगुप्रसातिकाः पंकजोशीरविल्वार्कदलाहोमे प्रकीर्तिताः १ उदङ्मुखः प्रत्सुलावाकुर्युर्गोत्वणां पुत्री
त्वणां पुंगवाः मधुवंतश्च कर्तव्याः चरवः प्रतिदैवतं २ हुत्वा च तांश्चरून्सम्यक् ततो होमं समारभेत् ३ चर्वादिकं चघ
नाक्तं च होतव्यं होतव्यं च घृताभ्यक्तं वचरुभक्ष्यादिकं पुनरिति मात्स्यात् भक्ष्यं द्राक्षादि चरुर्नैवेद्यशिष्टो गुडोदनो विज्ञा

नियुक्तः २ पुत्रवाइत्येतानि हवींषि स्युः समित्संख्या समाहुतीरित्याश्वलायनोक्तेः अधिदेवतादिभ्योपि होमो हेमाद्रौव
ह्यमाणस्य [illegible] स सर्पिषाचतिलैः क्रमात् तत्तन्मंत्रैश्च होतव्याः क्रमादत्राधिदेवताः १ गृह्यपरिशिष्टे प्रधानदशांशेनप्र
त्यधिदैव [illegible] अधिदेवतादिहोमे संख्याविशेषः हित्राश्वेवाधिदैवसायंचानां चेवस्यंचये ति हित्राः पंचपंचानां
गणेशादीनां पंचयाप्रत्येकमित्यर्थः केचित्तु होत्रपोवाहिन्नाः विनायकादीनां पंचधा एकैकामिति केचित् प्रयोगपा
रिजाते इंद्रादिलोकपालांश्च तत्तन्मंत्रैः प्रपूजयेत् तत्तन्मंत्रैः जपंकुर्यात् ततो होमं समारभेत् १ नृसिंहपुराणे ततो व्या
हृतिभिः पश्चाज्जुहुयाच्च तिलादिकं यावत्संपूर्यते संख्या लक्षं वा कोटिरेव वा १ वाशब्दादयुतमपि ग्रहयज्ञश्च न निय
तकालीनः स्वेच्छायज्ञः स उच्यत इति भविष्योत्तरात् ततो व्याहृतिभिः कुर्यात्तिलहोमं प्रयत्नतः प्रथमोयुतहोमस्या
ल्लक्षहोमो द्वितीयकः १ तृतीयः कोटिहोमः स्यात्त्रिविधो ग्रहयज्ञकः एकरात्रं त्रिरात्रं वा पंचरात्रमथापि वा २ शिवगा
याविष्णुगाथाशांतिप्राह्मणभोजनं समापयेत्प्रति दिनं एवं भक्तिसमन्वितः इति वा शिष्टैर्व्येकाह्नादिग्रहणं तिथ्यमा
नादरार्थं अत्र सूक्तादिजपोपि तु ज्ञानादानवदिति केचित् वाशिष्ठे अथाभिषेकमंत्रेण वाद्यमंगलगीतकैः पूर्णकुं
भेन तेनैव होमांते प्रागुदङ्मुखैः १ अव्यंगावयवैर्ब्राह्मणैर्हेमस्रग्दामभूषितैः यजमानस्य कर्तव्यं चतुर्भिः स्नापनं द्विः

श्रो·म जैः २ अभिषेकमंत्राः प्रयोगवक्ष्यंते वशिष्ठः स्वस्तिकं कल्पयेत्पश्चात्कुंडस्येशानभागतः ३ यजमानाभिषेकार्थं तत्र
३७ भद्रासनंन्यसेत् प्राङ्मुखस्योपविष्टस्य यजमानस्य तत्र च ४ अभिषेकं ततः कुर्युः साचार्याः षोडशर्त्विजः विविधैर्मंग
लैर्घोषैः सूतमागधजैः सह ५ ततस्तस्याभिः षिक्तस्य रक्षार्थं बलिमुत्क्षिपेत् दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजये
ततः शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः १ ततो मंडलमागत्य ध्यायेदग्निं ग्रहान्गुरून् प्रत्येकं प्रतिमंत्रैश्च दद्यात्पु
ष्पांजलिं ततः २ इति वामनः आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः समिदाज्यचरूणां च तिलहोमफलं च यत् १
ब्रह्मादिकुंभपूजायां चार्चनस्य फलं च यत् गणपक्षेत्रपाश्रीशदुर्गादिव्यंगदेवताः २ तासां जपफलं सम्यक् गृहीत्वा याज
ल पूर्वकं एतानि च वामनवचांसि निर्मूलानि इति पितामहचरणाः वाशिष्ठगोभिलवचसामपि केचिदाहुः वशिष्ठः
ततो जयादीन् जुहुयात् पूर्णाहुतिमथाचरेत् तत्रैव मंत्रेण समते अग्नेइति पूर्णाहुतिं चरेत् अग्निपुराणे मूर्द्धानं
दिवमंत्रेण सत्रवणाच धारया दद्यादुत्थाय पूर्णां वै नोपविश्य कदाचनेति मत्स्ये पूर्णाहुतिं च मूर्द्धानं दिव इत्यभियातये
त् अत्र श्रिन्मंशाखागतेकादशद्वादशकपालभेदेष्वेदाग्नेये कवदनेकमंत्रयुक्ता या अनेकस्मृत्युक्ता या अपि पूर्णा
हुतिरेकतानमंत्राणां विकल्पः उपांशुयाजइव शाखाभेदभिन्नानां याज्यानुवाक्यानां समुच्चयेन तु परेति वसोर्द्धारां तु पुन

होमेनास्ति [illegible] भावात् ततः शुक्लांबरधरः शुक्लगंधानुलेपनः सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः १ यजमानः
सपत्नीकः [illegible]ः स्नानसमाहितः दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः २ सूर्याय कपिलाधेनुं व पाच्छंखं तपेद्द्वे
रक्तं धुरंधरं दद्याद्भौमाय ककुदाधिकं ३ बुधाय जातरूपं तु गुरवे पीतवाससी श्वेताश्वं दैत्यगुरवे कृष्णां गामर्कसूनवे ४
आयसं राहवे दद्यात्केतवे छागमुत्तमं सुवर्णेन समा कार्या यजमानेन दक्षिणा ५ बुधप्रीत्यर्थदेयहेम्ना सह सर्वमूल्य
तः समा इति केचित् अस्मिन्पक्षे षोडशमाषविशिष्टहेमवाचि सुवर्णपदासामंजस्यापत्तेः स्याद्दशसुवर्णमूल्याः प्रत्ये
कमिति परे वस्तुल्यमूल्येषु तथा हेमापि देयं यथा सर्वाः प्रत्येकं दशमाषसुवर्णेन समा भवंतीति तु सम्यक् सर्वेषामप
वा गावो गुरुर्वा पन तुष्यति स्वमंत्रेण प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः १ स्कांदे केतवे छागमांसानि सर्वेषामेव कांच
नमिति तत्रैव यस्तु पीडाकरो नित्यं स्वल्पवित्तस्य वा ग्रहः तमेव पूजयेद्भक्त्या दक्षिणाभिः स्वशक्तितः १ दानीयोक्तेः
आश्वलायनः यथाशक्ति ततो विप्रान् ऋत्विजश्चेतरानपि एकमेकाहुतौ विप्रं होमे तत्रान्नेन भोजयेत् १ अत्यर्थम
समाश्वापि विप्रमेकं पाताहुतौ सहस्राहुतौ जनेवैकं जघन्यो विप्रभोजयेत् २ तत्रैव तस्मादात्तु मशक्तोपि दक्षिणां
चान्नमेव वा जयैः प्रणामैः स्तोत्रैश्च तोषयेत्तर्पयेद्गुरुं २ स्कांदे यथा ग्रहो द्विजस्तादिष्टि ध्रिस्त्रीवेदपारगः तोषयन्नृ

शां·म दुर्वस्त्वाद्येस्तुष्टमेनंविसर्जयेत् १ अन्नहीनोदहेद्राष्ट्रं मंत्रहीनस्त्वृत्विजः यजमानमदक्षिणोनास्ति यज्ञसमोरि
१८ पुः २ तत्रैव प्रथासमन्त्रिमंपन्नयंत्रेणप्रतिहन्यते एवं संस्तुष्ठितं घोरंशीघ्रंशांत्याविनश्यति १ अहिंसकस्यदांतस्य
धर्मार्जितधनस्यच नित्यंचनियमस्थस्यसदासानुग्रहाग्रहाः २ ग्रहागावोनरेंद्राश्चब्राह्मणाश्चविशेषतः पूजि
ताः पूजयंत्येतेनिर्दहंत्यवमानिताः ३ ग्रहाणामिदमातिथ्यंकुर्यात्संवत्सरादपि आरोग्यबलसंपन्नोजीवेच्छरदां
शतं ४ मात्स्ये एवंसमग्रान्निष्पाद्यसर्वान्देवान्विसर्जयेत् तत्रमंत्रः यांतुदेवगणाः सर्वे पूजामादायपार्थिवीं इ
ष्टकामप्रदानार्थंपुनरागमनायच १ भविष्योत्तरे ततः स्नात्वाथयज्ञेतुकारयेतुमहोत्सवं शंखतूर्यनिनादेनब्रह्मघो
षरवेणच १ मात्स्ये अनेनविधिनायस्तुग्रहपूजांसमारभेत् सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयते १ तदेवायुत
होमोयंनवग्रहमखःस्मृतः विवाहोत्सवयज्ञेषुप्रतिष्ठादिषुकर्मसु २ निर्विघ्नार्थंमुनिश्रेष्ठतथोद्वेगाद्भुतेषुच प्रश्च
कर्माभिचाराद्येतथैवोच्चाटनादिके ३ नवग्रहमखंकृत्वाततःकाम्यंसमारभेत् अन्यथाफलदंपुंसांनकाम्यंजायते
क्वचित् ४ तस्मादयुतहोमस्यविधानंतुसमारभेत् ४ विवाहोत्सवादिनाचविवाहादिषुकाम्येषुचकर्मस्वंगत्वमुक्तं आ
त्रग्रहस्वरूपवर्णादेवागोत्राग्निस्थानमुखाकारस्थापनहोममंत्रचंदनधूपनैवेद्यसमिद्दक्षिणाधिदेवताप्रत्यधिदेव

ताप्रत्य [illegible] शाकवाक्येषुग्रहाणांस्वरूपनिर्देशस्थापनहोममंत्रोपदेशाकवाक्येषुचाधिदेवताविनायकादि
पंचलोक [illegible] नैकस्मृतिपुराणभेदेनभूयोविसंवादादिभिरनेकैः पर्यायशब्दैः रूपस्थितेर्नात्रैकैवेयशब्दनियमःना
पिमंत्रवर्णेन [illegible] पस्थितिः शब्दविशेषैर्देवताअनूद्यतत्स्मारकतयामंत्रविनियोगेनमंत्राणांदेवताप्रापकत्वापे
गात् तेषांबाहुल्येनास्पष्टलिंगत्वाच्च अतोऽयुतयागादिषुस्वरूपादिभिर्देशाकस्मृतिमंत्रवर्णोपस्थितिशब्दानामन्यतमे
नशब्देनोद्देशोग्रहाणामितिशिष्टाचारोप्येवं अत्रआहुतिकरणकेयुतुहोमेग्निवायुसूर्यप्रजापतयएवदेवताःनग्रहा
णांप्रादिवत्तस्यकारणकत्वेनविनियोगाभावात् अतएवपारिजाते ॐ भूर्भुवःस्वश्चेतितिस्रोव्याहृतयोजयेत् आभिश्चहो
मेतिस्रभिश्चतूष्णींस्यात्समस्ताइति समस्ताभिरेवहोमः सचाग्निवायुसूर्यदेवत्यइतितु मदनःसर्वथाहुतिहोमेनग्रका
हादेवताइति प्रधानंचात्रग्रहपूजातद्धोमोयुतहोमादिश्च श्रीकामः शांतिकामोवाग्रहयज्ञंसमाचरेत् इत्यादिनातत्पू
जातद्धोमयोः फलसंबंधात् ग्रहयज्ञाख्यविधेरुत्कामप्रथमोयुतहोमइत्यादिनायुतलक्षकोटिहोमानांग्रहयज्ञविशेषत्वेनो
पक्रमात् तस्मादयुतहोमस्यविधानेतुसमाचरेदित्युपसंहाराच्च ग्रहाग्रहदेवत्यकर्मसमूहेप्राणभृत्तउपदधातीतिव
ल्लिंगसमवायेनग्रहयज्ञशब्दःतात्तचरणात्त्वयुतहोमादिनामेवप्राधान्यंग्रहहोमस्यांगमित्याहुः तदाशयंनजाने योहि

कामशब्देनफलसंबंधः श्रीकामः शांतिकामोवाग्रहयज्ञसमाचरेदित्यादिः सतावद्ग्रहपूजाहोमयोरेवोचितः ग्रहसंबंधप्र
तेर्ग्रहयज्ञशब्दस्यतन्नामत्वात् नचायुतहोमादीनांफलसंबंधेतत्प्रकरणपाठात् ग्रहपूजाहोमयोरंगत्वेतिवाच्यंवैपरी
त्यात् अयुतहोमादिशब्दानांग्रहयज्ञसमानाधिकरण्येनग्रहयज्ञनामत्वंतुलिंगसमवायेननतदंगत्वेनआर्थवादि
कः फलसंबंधस्तु अनेनविधिनायस्तुग्रहपूजांसमाचरेत् सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयते इत्ययज्ञदेवपू
जासंगतिकरणदानेष्विति अनुशिष्टयोः पूजाहोमयोः सदैवायुतहोमोयमित्याद्युपक्रम्यनिर्विघ्नार्थमुनिश्रेष्ठइत्या
दिनात्वयुतहोमादीनामपिस्मृतिषुतुप्रायः आर्थवादिकमेवफलं अत्रकामशब्दोपनीतेफलेसत्यार्थवादिकंसंबध्यते
नवेतितुविचारांतरं किंच याज्ञवल्क्यादिस्मृतिषुनतावदयुतहोमादीनांविधिर्नोप्यनुवादः अतोग्रहपूजाहोमयोःप्र
धान्यमावेतत्रत्येतिकर्तव्यतासंबंधोनस्यात् अतोग्रहपूजाहोमयोरपिप्राधान्यंभाति अत्रएवंकेचिल्लेवलग्रहमखेषु
तदंगकेषुचनृपातिकादिकर्मस्वेकस्मृत्युक्तांगप्रधानादेरणस्मृत्यंतरोक्तप्रधानभूतायुतादिहोमंविनापिशास्त्रतरोक्त
ग्रहयागांतराभ्यासांतरविनैकशास्त्रीयग्रहयागाभ्यासमात्राणामिवपूजाग्रहदेवत्यहोमयोरेवानुष्ठानंकथंचितशिष्टा
नांसंगच्छते ग्रहपूजाहोमयोरंगत्वेत्वंगमात्रानुष्ठानमेवस्यात् अथग्रहादीनांलक्षणानि मात्स्ये पद्मासनः पद्मकरः प

...प्ताश्वरथसंस्थश्चद्विभुजः स्यात्सदारविः १ श्वेतः श्वेतांबरधरोदशाश्वः श्वेतभूषणः गदापाणिर्द्विबाहुः
शशी २ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः चतुर्भुजोमेषगमोवरदः स्याद्धरासुतः ३ पीतमाल्यांबर
हेमद्युतिः खड्गचर्मगदापाणिः सिंहस्थोवरदोबुधः ४ देवदैत्यगुरूतद्वत्पीतश्वेतौचतुर्भुजौ दंडिनौव
रदौकार्यौसाक्षसूत्रकमंडलू ५ इंद्रनीलद्युतिः शूलवरदोगृध्रवाहनः बाणबाणासनधरः कर्तव्योर्कसुतः सदा ६ कराल
वदनः खड्गचर्मशूलीवरप्रदः नीलः सिंहासनस्थश्चराहुरत्रप्रशस्यते ७ धूम्राद्विबाहवः सर्वेगदिनोविकृताननाः गृ
ध्रासनगतानित्यंकेतवः स्युर्वरप्रदाः ८ सर्वेकिरीटिनःकार्याग्रहालोकहितावहाः अंगुलेनोच्छ्रिताःकार्याःशतमष्टो
त्तरंसदेति ९ अथाधिदेवताप्रत्यधिदेवतालक्षणानि विष्णुधर्मोत्तरे पंचवक्त्रोवृषारूढः प्रतिवक्त्रंत्रिलोचनः कपालशूल
खट्वांगीचंद्रमौलिःसदाशिवः १ अक्षसूत्रंचकमलंदर्पणंचकमंडलुं उमाबिभर्तिहस्तेषुपूजितात्रिदशैरपि २ कु
मारः षण्मुखःकार्यःशिखंडकविभूषणः रक्तांबरधरोदेवोमयूरवरवाहनः ३ कुक्कुटश्चतथाघंटातस्यदक्षिणहस्त
योःपताकावैजयंतीस्याच्छक्तिस्यात्तस्यवामयोः ४ विष्णुःकौमोदकीपद्मशंखचक्रधरः क्रमात् प्रदक्षिणदक्षिणाध
करादारभ्यनित्यशः ५ पद्मासनस्थोजटिलोब्रह्माकार्यश्चतुर्भुजः अक्षमालांश्रुवंबिभ्रत्पुस्तकंचकमंडलुं ६ चतुर्दंतग

जारूढोवज्रीकुलिशभृत्करः प्राचीपतिः प्रकर्त्तव्योनानाभरणभूषितः ७ ईषन्नीलोपमः कार्योदंडहस्तोविजाननतार
कद्रूकपाशहस्तश्चमहामहिषवाहनः ८ कालः करालवदनोनीलांगश्चविभीषणः पाशहस्तोदंडधरः कार्योरुष्ट्रिक
रोमवान् ९ अपीच्यवेषस्वाकारंद्विभुजंसौम्यदर्शनं दक्षिणेलेखनीचित्रपुस्तवामेतुपात्रकं १० पिंगलश्मश्रुके
शाक्षः पीनांगजठरोरुणः छागस्थः साक्षसूत्रोग्निः सप्तार्चिः शक्तिधारकः ११ चिन्हितंचामरेणास्यकरमन्यप्रकल्प
येत् आपस्त्रीरूपधारिण्यः श्वेतामकरवाहनाः १२ दधानाः पाशकलशौमुक्ताभरणभूषिताः शुक्लवर्णामहीक
र्यादिव्याभरणभूषिता १३ चतुर्भुजासौम्यवपुश्चंडांशुसदृशांबरा रत्नपात्रंसस्यपात्रंपात्रमौषधिसंयुतं १४ पद्मंक
रेचकर्त्तव्यंभुवोयादवनंदनेदिग्गजानांचतुर्णांसाकार्यापृष्ठगतातथा १५ विष्णोरिंद्रस्यचोक्तंवामेशान्याः करेकार्पासो
ग्यास्ततानमंजरी चरदामंडिताकार्याद्विभुजाचतथाशची १६ यज्ञोपवीतीहंसस्थएकवक्त्रश्चतुर्भुजः असेस्रुवंस्रुवं
बिभ्रत्कुंडिकांचप्रजापतिः १७ अक्षअक्षमालां कुंडिकाकमंडलुं अक्षसूत्रधराः सर्पाकुंडिकापुष्पभूषणाः एक
भोगास्त्रिभोगाश्चसर्वेकार्याविभीषणाः १८ अथलक्षणमुक्तं ग्रहाणांदक्षिणेपार्श्वेस्थाप्यपेदधिदेवताः ग्रहाणामुत्तरे
पार्श्वेन्यसेत्प्रत्यधिदेवता १९ अथविनायकादिलक्षणानि चतुर्भुजस्त्रिनेत्रश्चकर्त्तव्योत्रगजाननः नागयज्ञोपवीत

शेखरः १ दंतंकरेदद्याद्द्वितीयेचाक्षसूत्रकं तृतीयेपरशुंदद्याच्चतुर्थेमोदकंतथा २ शक्तिबाणौतथा
चदक्षिणे चंद्रबिंबमधोवामेखेटमूर्ध्वंकपालकं ३ मुकुंदकंचबिभ्राणासिंहारूढाचतुर्भुजाएषादेवी
समुद्दिष्टादुर्गादुर्गार्त्तिहारिणी ४ धावद्धरिणपृष्ठस्थोध्वजधारीसमीरणः वादानकरोधूम्रवर्णः कार्योविजाननताध
नलोत्पलाभंगगनंतद्वर्णांबरधारिच चंद्रार्कहस्तंकर्त्तव्यंद्विभुजंसौम्यरूपवत् ६ द्विभुजौदेवभिषजौकर्तव्यौरूप
संस्थितौ तयोरोषधयः कार्यादिव्यादक्षिणहस्तयोः ७ वामयोः पुस्तकौकार्यौदर्शनीयौतथाद्विजाः एकस्यदक्षिणे
पार्श्वेवामेचान्यस्ययादव ८ नारीयुगंप्रकर्त्तव्यमुरूपंचारुदर्शनं रत्नभांडकरेकार्यंचंद्रभुक्तावरेतथा ९ अथलोकपा
लरूपाणि तत्रेंद्राग्नियमरूपाणिप्रत्यधिदेवतोक्तानि खड्गचर्मधरोवालोनिऋतिर्नरवाहनः ऊर्ध्वकेशोवि
रूपाक्षः करालः कालिकाप्रियः १ नागपाशधरोरक्तभूषणः पद्मिनीप्रियः वरुणोवुपतिः स्वर्णवर्णोमकरवाहनः
२ वास्तुर्विनायकादिपंचकेउक्तः सोमोग्रहेषु अनंतः सर्पः सप्रत्यधिदेवतासुइत्युयुतहोमः अथलक्षहोमः तत्रग्र
हपीडादौनिनिमित्तान्युक्तान्ययुतहोमारंभेदेवीपुराणेपि लक्षहोमंप्रवक्ष्यामियथाप्रोक्तंतुशंभुना भूमिकंपेदिशा
दाहेपहयुद्धउपस्थिते १ केतुसंदर्शनेचैवआदित्यस्यचकंपने क्षत्रवर्णोथवासूर्यंतथाछिद्रसमन्विते २ रक्तवृष्टिस

थानचो विपरीतावहंतिच निर्गते गगनाद्रूमे वारिमध्येचपत्थितं ३ उपसर्गास्तथालोकेरक्षंतुक्षयकारकाः यस्यराशौः
ग्रहाः पंच अथसप्तसुराधिप ४ ग्रहणांचेंद्रसूर्यस्यग्रहैर्वाष्टमसंस्थितैरित्यादितथाकंपनेस्वेदनंगात्रे अंबुपानार्थंज
ल्पनं ५ देवतानांसुराध्यक्ष उत्पाताः क्षयकारकाः लक्षहोमंप्रकुर्वीतकोटिहोममथापिवेति ६ मात्स्ये अस्मादृशगुणाः
प्रोक्तो लक्षहोमः स्वयंभुवा आहुतीभिः प्रयत्नेन दक्षिणाभिस्तथैवच ७ द्विहस्तविस्तृतंतद्वच्चतुर्हस्तायतंपुनः लक्षहो
मेभवेत्कुंडयोनिवक्त्रंत्रिमेखलं ८ व्यासतो द्विहस्तंविस्तृतंफलतश्चतुर्हस्तायतंभवतीत्यर्थः तथा तस्यचोत्तरपूर्वेणावित
स्तित्रयसंमितंप्रागुदक्प्रवणंतद्वच्चतुरस्रंसमंततः १ विष्कंभार्द्धोच्छ्रितंप्रोक्तंस्थंडिलंविश्वकर्मणा संस्थापनायदेवानांव
प्रत्रयसमावृतं २ तस्मिंस्तावाहयेद्देवान्पूर्ववत्पुष्पतंडुलैः गरुत्मानधिकस्तत्रसंपूज्यःश्रियमिच्छता ३ सामध्वनि शरीरस्त्वं
वाहनं परमेष्ठिनः विषपापहरोनित्यमतः शांतिंप्रयच्छमे ४ अयंगरुडवाहनमंत्रः पूर्ववत्कुंभमामंत्र्यतद्वद्धोमंसमाचरेत्
सहस्राणांशतंहुत्वासमित्संख्यादिकंपुनः २ पूर्ववद्देवसमिदाज्यचरुहोमंपूर्वोक्तैरेवमंत्रैः कुर्यात् गरुत्मनस्तुसुपर्णोसि
गरुत्मान्त्रिवृत्तेशिरइतिवामंत्रः घृतकुंभवसोर्द्धारांपातयेदनलोपरि उदुंबरीमथार्द्रांचऋज्वींकोटरवर्जितां १ बाहु
मात्रांस्रुचंकृत्वाततः स्तंभद्वयोपरि घृतधारांतथासम्यगग्नेरुपरिपातयेत् २ श्रावयेत्सूक्तमाग्नेयंवैष्णवंरुद्रमैदवं महावै

श्वानरंसाम्यकृज्येष्ठसामचपाठयेत् ३ स्नानंचयजमानस्यपूर्ववत्स्वस्तिवाचनं दातव्यायजमानेनपूर्ववद्दक्षिणापृथक् ४
कामक्रोधविहीनेनऋ [illegible] ःशांतचेतसा तद्वद्दशचाष्टौवालक्षहोमेपिऋत्विजः ५ कर्तव्याश्चतुरस्तद्वच्चतुरोवाविम
त्सराः ब्रह्माचार्यसहि[illegible]वेयंसंख्येतिकेचित् ६ नवग्रहमखात्सर्वंलक्षहोमेदशोत्तरं दद्याच्चमुनिशार्दूलभूषणान्य
पिशक्तितः १ शयनानिसवस्त्राणि हेमानिकटकानिच कर्णांगुलीपवित्राणिकंठसूत्राणिशक्तितः २ नकुर्याद्दक्षिणा
हीनंवित्तशाठ्येनमानवः अददल्लोभमोहाद्वाकुलक्षयमवाप्नुयात् ३ अन्नदानंयथाशक्त्यादातव्यंभूतिमिच्छताअ
न्नहीनंकृतोयस्माद्दुर्भिक्षफलदोभवेत् ४ तस्मात्पीडांकरोतीवयएवभवतिग्रहः तमेवपूजयेद्भक्त्याद्वौवात्रीन्वायथा
विधिः ५ तथापूज्यतेशिवलोकेचवस्वादित्यमरुद्गणैः यावत्कल्पशतान्यष्टौअथमोक्षमवाप्नुयात् ६ तथापुत्रार्थी
लभतेपुत्रंधनार्थीलभतेधनं भार्यार्थीलभतेभार्यांकुमारीलभतेपतिं ७ भ्रष्टराज्यस्तथाराज्यंश्रीकामः श्रियमाप्नुया
त् यंयंप्रार्थयतेकामंतंतंप्राप्नोतिपुष्कलं ८ निष्कामः कुरुतेयस्तुपरंब्रह्मसगच्छति इतिलक्षहोमः अथकोटिहोम
तत्राप्ययुतहोमलक्षहोमप्रकरणएवनिमित्तान्युक्तानि भविष्योत्तरेपि संवरणउवाच भगवन्महदुत्पातसंभवेभू
प्रकंपने निर्घाते यांसुवर्षेचग्रहभंगेतथैवच १ जन्मनक्षत्रपीडासुअनावृष्टिभयेषुच क्रूरासुग्रहपीडासुदुर्भिक्षेरा

शां म शृविद्दूरे ऽव्याधीनांसंभवेजातेशरीरेचातिपीडिते लोकेशोमहतिचोत्पन्नेकिंकर्तव्यंनरोत्तमैः ३ स्वर्गस्यसाधनंयत्तत्की
२२ र्तिदंधनदंतथा प्रब्रूहित्वंद्विजश्रेष्ठतथारोग्यप्रदंनृणां ४ सनत्कुमारउवाच शृणुराजन्प्रवक्ष्यामिशांतिकर्मण्यनुत्तमं
कोटिहोमाख्यमतुलंसर्वकामफलप्रदं ५ ब्रह्महत्यादिपापानियेन नश्यंतितत्क्षणात् उत्पाताःप्रशमंयांतिसहस्रं
यच्छतेसुखं ६ विधानंतस्यवक्ष्यामिशृणुष्वैकमनाभव देवागारेचभवनेतीर्थेवाशिवसन्निधौ ७ पर्वतेवाथकुर्वीत
यद्वेष्टेसममात्मनः शुभनक्षत्रयोगेचवारेसर्वगुणान्विते ८ यजमानस्यानुकूलेकोटिहोमंसमाचरेत् पूजयित्वाप्र
यत्नेनब्राह्मणंवेदपारगं ९ वस्त्रैर्विभूषणैश्चैवगंधमाल्यानुलेपनैः प्रणम्यविधिवत्तस्मैचात्मानंविनिवेदयेत् १०
तमानसैः ६ इतिः ० अथ बुधशांति ० विशाखासु बुधं गत्य सप्तनक्तान्यथाचरेत् बुधं हेममयं कृत्वा स्थापितं कांश्यभाज
ने १ शुक्लवस्त्रयुगच्छन्नं शुक्लमाल्यानुलेपनं गुडौदनीय संहारं ब्राह्मणाय निवेदयेत् २ बुधत्वं बुद्धिजननो वोधवान्सर्वः
दा नृणां तत्वाववोधं कुरु मे सोमपुत्र नमो नमः ३ होमं घृततिलैः कुर्याद्बुधनाम्ना च मंत्रवित् समिधाष्टोत्तरशतमष्टाविंशति
रेव वा ४ होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन च बुधशांतिरियं प्रोक्ता बुधवैकृतिनाशिनी ५ बुधदोषेषु कर्तव्या तथा शां
तिक पौष्टिके ६ इतिः अथ गुरुशांतिः गुरुं चैवानुराधासु पूजयेद्भक्तितो नरः पूर्वोक्तविधियोगेन सप्तनक्तान्यथाचरेत् १ हैमे
हेममये पात्रे स्थापयित्वा बृहस्पतिं पीतांवरयुगच्छन्नं पीतयज्ञोपवीतिनं २ पादुकोपानहच्छत्रकमंडलुविभूषितं पूज

जयेत्पीतकुसुमैः कुंकुमेन विलेपितं ३ धूपदीपादिभिर्दिव्यैः फलैः श्चंदनतंडुलैः खंडखाद्योपहारैश्च गुरोरग्ये निवेदयेत्
४ धर्मशास्त्रार्थतत्वज्ञानविज्ञानपारग विबुधार्तिहर चिंत्य देवाचार्य नमोस्तु ते ५ होमं घृततिलैः कुर्याद्गुरुनाम्ना च मं
त्रवित् शमिधोष्टोत्तरशतमष्टाविंशतिरेव वा ६ होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन च समिधो त्राश्वत्थस्य एतद्व्रतं
महापुण्यं सर्वपापहरं शुभं ७ तुष्टिपुष्टिकरं नृणां गुरुवैकृतिनाशनं विषमस्थे गुरौ कार्या महाशांतिरियं नृभिः ८ इति ० अ
थ गुरुपूजा स्त्र्यादेः कन्याविवाहकाले तु शुद्धिर्यस्या न विद्यते बाह्यस्योपनयने यस्य स्याद्दुःस्थितं गतः १ दुःस्थितं प्राप्तः एभिः पूजा
गुरोः कार्या विधिवद्भक्तिभावितैः मदंतीकामपुष्यारिष्टापत्रं पालाशसर्षयाः २ मदंती पूथिका कामोदमनहक्षाख्यः गुडुची
वान्यपामार्गो विडंगं शंखिनी वचा सहदेवी विष्णुक्रांता सर्वौषध्यः सतावरी ३ कुष्टं मांसी हरिद्रे द्वे मुरा शैलेय चंदनं वचा
कर्चूरमुस्तं च सर्वौषध्यः प्रकीर्तिताः ४ तथैवाश्वत्थमृत्तां गां च पंचगव्यं जलं तथा नूतनं सोदकुंभं च पीतवस्त्रसमन्वितं ५ पं
चरत्नैः समायुक्तं ईशान्यां स्थापितेन स्नात या ःउषधीतिमंत्रेण सर्वास्त्वस्मिन्विनिःक्षिपेत् ६ कुंभस्योपरि भागे तु स्थापयि
त्वा बृहस्पतिं सुवर्णपात्रे सौवर्णां प्रतिमां तु युधिष्ठिर ७ कारयेत्तु यथाशक्त्या वित्तशाठ्यविवर्जितः पीतवस्त्रयुगच्छन्नां पी
तयज्ञोपवीतिनं ८ पूजयेद्गंधपुष्पाद्यैस्ततो होमं समाचरेत् समिधोश्वत्थवृक्षस्य होतव्याष्टोत्तरं शतं ९ तिलव्रीहियवोन्मि

श्रेहोतव्यंचयथाक्रमं वृहस्पतेतिमंत्रेणऋषिच्छदः समन्वतः १० मंत्रेणानेनजुहुयात्ह्यान्यपूर्वंचयत्नतः ततोहोमावसानेतु
पूजयेच्चवृहस्पतिं ११ पीतगंधैस्तथापुष्पैर्धूपदीपैश्चशक्तितः दध्योदनंचनैवेद्यं फलतांबूलसंयुतं १२ मंत्रेणानेनकौंतेय
समभ्यर्च्यपुनःपुनः नमस्तेगिरसांनाथवाक्पतेथवृहस्पते १३ क्रूरग्रहैःपीडितानाममृतायनमोनमः पूजयित्वासुरणचा
र्यंपश्चादर्घ्यांनिवेदयेत् १४ गंभीरदृढरूपांगदेवेज्यसुमतेप्रभो नमस्तेवाक्पतेशांतग्रहाणार्घ्यंनमोस्तुते १५ अर्घ्यमंत्रःअ
र्घ्यंदत्वासुरेशायजपहोमंसमापयेत् भक्त्यापतेसुराचार्यहोमपूजादिसंस्कृतं १६ तत्वंग्रहाणशांत्यर्थंवृहस्पतेनमोन
मः संकल्पमंत्रः मंत्रेणानेनसंकल्प्यपश्चात्संप्रार्थयेन्नृप १७ जीवोवृहस्पतिःसूरिराचार्योगुरुरंगिराःवाचस्पतिर्देवम
त्रीशुभंकुर्यात्सदाममः १८ प्रार्थनामंत्रः एवंसंप्रार्थयेद्देवंआचार्यंचप्रपूजयेत् सर्वोपचारसंयुक्तांप्रतिमांतांयुधिष्ठिर १९
प्रणम्यचगवायुक्तामाचार्यायनिवेदयेत् अथाचार्यस्तुनियतोवेदवेदांगपारगः २० यजमानंसपत्नीकंशांतचित्तंजितेंद्रि
यं कुंभोदकंग्रहीत्वानुमंत्रैरेतैःप्रसिंचयेत् २१ इदमापोयमंत्रेणतामपिश्वकृत्वस्तथायाओषधीरम्बावतीकूष्मांडैश्चा
भिषिंचयेत् २२ पश्चात्संभोजयेद्विप्रान् यथाशक्त्यायुधिष्ठिर एवंकृत्वागुरोःपूजां सर्वान्कामानवाप्नुयात् २३ संक्रांतावपि
कौंतेययस्यास्वाभ्युदयेषुच कुर्वन्वृहस्पतेपूजांअभीष्टफलमाप्नुयात् २४ संक्रांतौगुरुसंक्रांतौ ० इतिगुरुपूजा ० अथशु

क्रंतुकारयेत् वंशपात्रेचसंस्थाप्यपूजयेत्सितपंकजैः २ तदभावेसितैःपुष्पैस्तांबूलैःचंदनेनच अग्रेतस्यप्रदातव्यंपायसंघृत
संयुतं ३ दधादनेनमंत्रेणब्राह्मणायकुटुंबिने भार्गवोभर्गशुक्रस्यशुचिःश्रुतिविशारदः ४ हित्वाग्रहकृतान्दोषान् आयु
रोग्यदोस्तुसः होमंघृततिलैःकुर्यात् शुक्रनाम्नाचमंत्रवित् ५ समिधोश्वत्थरत्नातमष्टाविंशतिरेवच होतव्यामधुसर्पिर्भ्यां
दध्नाचैवघृतेनच ६ अथप्रतिशुक्रादिशांतिः तत्रैवमात्स्ये अथातःशृणुभूपालप्रतिशुक्रस्यशांतये यात्रारंभेवसानेचतथा
शुक्रोदयेशाति शुक्रपूजाप्रकर्तव्यातानिशामयभारत राजतेवाथसौवर्णेकांस्यपात्रेथवापुनः २ शुक्लपुष्पांबरयुते श्वेतंतंडु
लपूरिते निधायराजतंशुक्रं शुचिमुक्ताफलान्वितं ३ महाश्वेतसमायुक्तं सामगायनिवेदयेत् नमस्तेसर्वलोकेशनमस्ते
भृगुनंदन ४ देवसर्वार्थसिध्यर्थंग्रहाणार्घ्यंनमोस्तुते दत्वैवमर्घ्यंकौंतेयप्रणिपत्यविसर्जयेत् ५ एवंशुक्रोदयेकुर्यात्पश्चात्
दिशुचभारत तद्वद्वाचस्पतेःपूजांप्रवक्ष्यामियुधिष्ठिर ६ सौवर्णपात्रेसौवर्णममरेशपुरोहितं पीतपुष्पांबरधरंकृत्वाह
त्वाथसर्षपैः ७ पालाशाश्वत्थभंगेनयवगव्यतिलेनतु भंगःपल्लवःपीतांगरागवसनोघृतहोमंतुकारयेत् ८ प्रणम्यतां
गवासहब्राह्मणायनिवेदयेत् नमस्तेगिरसांनाथवाक्पतेतेवृहस्पते ९ क्रूरग्रहैःपीडितानाममृतायनमोनमः संक्रां
तावपिकौंतेययात्रास्वभ्युदयेषुच १० कुर्वन्वृहस्पतेःपूजांसर्वान्कामानवाप्नुयात् अथवामौक्तिकान्येवसुरत्नानिहंतिवा

११भार्गवांगिरसौचिंत्यतान्येवप्रतिपादयेत् इतिभुक्तादिशांति ० अथशनिराहुकेतुशांतयः ० भविष्ये शनैश्चरंराहुकेतूंलोह
पात्रेषु निःक्षिपेत् कृष्णागरुस्मृतोधूपोदक्षिणाचस्वशक्तितः १ यथाक्रमंशमीदूर्वाकुशानांसमिधः स्मृताः सप्तमेतु यसंप्राप्ते
तुवर्णान्वाथकारयेत् २कृष्णवर्णायुगच्छन्नमेकैकंकारयेद्बुधः मृगनाभ्यासमालभ्यकृशराान्विनिवेदयेच ३ होमावसानेतत्स
र्वंब्राह्मणायोपपादयेत् शनैश्चरनमस्तेस्तुनमस्तेराहवेतथा ४ केतवेचनमस्तुभ्यंसर्वेशांतिंप्रयच्छत एवंकृतेभवेयत्तु
तन्निबोधनृपोत्तम ५ यदिमेमारतिस्तुतोभास्करोराहुणासह केतुश्चमूर्तौतिष्ठति सर्वेपीडाकराग्रहाः ६ अनेनकृतमा
त्रेणसर्वेसौम्यंतुपद्मवाः इतिशन्यादिशांतिः ० भविष्योत्तरेततोमंदस्यदिवसेस्नानमभ्यंगपूर्वकं कार्यंदेयंचविप्रायतैल
मभ्यंगहेतवे १ यस्तुसंवत्सरंयावत्प्राप्तेशनिदिनेनरः तैलंददातिविप्राणांस्वशक्त्याभ्यज्यतेपिवा २ ततःसंवत्सरस्यांते
माशेतस्यदिनेपुनः लौहंघटार्पितंसौरिंतैलकुंभे विनिःक्षिपेत् ३ लौहेवाम्रमयेवाथकृष्णवस्त्रयुगान्वितं कृष्णगो
दक्षिणायुक्तंकृष्णकंबलशोभितं ४ स्वयमभ्यंगतःस्नात्वाकृष्णपुष्पैःसमर्चयेत् सुगंधिगंधपुष्पैश्चकृशरान्नैस्तिलोदनैः
५ पूजयित्वास्तवंपुनःक्षमस्वेतिपुनःपुनः कृष्णायद्विजमुख्यायतदभावेनरायच ६ देयः शनैश्चरोभक्त्यामंत्रेणानेनवैद्विज
७ नूनावलोकनवशाद्भवनेनाप्नोतियोग्रहोरुष्टः तुष्टोधनकसुखंददातिसौम्यान् शनैश्चरःपातु ८ यःपुनर्नष्टराज्यायनल
ष्यपरितोषितःस्वप्नेददौनिजंराज्यंसमेसौरिःप्रसीदतु ९ कोणंनीलांजनप्रख्यंमंदचेष्टाप्रसारिणं छायामार्तंडसंभूतंन
मस्यामिशनैश्चरं १० नमोर्कपुत्रायशनैश्चरायनीहारवर्णांजनमेचकाय श्रुत्वारहस्यंभवकामदस्त्वंफलप्रदोमेभव
सूर्यपुत्र ११ नमोस्तुप्रेतराजायकृष्णदेहायवैनमः शनैश्चरायक्रूरायशुद्धबुद्धिप्रदायिने १२ यएभिर्नामभिस्तौतितत
स्यपुष्टिंददात्यसौ तदीयंतुभयंतस्यस्वप्नेपिनभविष्यति १३ स्कांदेश्रावणेमासिसंजातेशोभनेशनिवासरे लोहरूपं
शनिंकृत्वास्नाप्यपंचामृतेनवै १४ पुष्पैरष्टविधैर्धूपैःफलैश्चैवविशेषतः नामभिःपूजयेदेतैःक्रमेणाग्रहसत्तमं १ध्वको
णस्तुपिंगलोवभ्रूःकृष्णोरौद्रोंतकोयमः शौरिःशनैश्चरोमंदःपिप्पलादेनसंस्तुतः १६ शन्नोदेवीतिसर्वत्रवैदकेनव
पूजयेत् पूजयित्वाचनैवेद्यंततःकुर्यात्क्रमेणतु १७ समाषभक्तंप्रथमेद्वितीयेपायसंशुभं तृतीयेत्वंविलीकार्याचतु
र्थेपूरिकाशुभा १८ अंविलीतक्रतंडुलपिष्टादिनिर्मितोलेह्यविशेषः ० इतिशनिव्रतं ० अथशनिस्तोत्रं ० ततःकृतांज
लिर्भूत्वास्तुतिंचक्रेसबालकः पिप्पलादोद्विजःश्रेष्ठःप्रणिपत्यमुहुर्मुहुः १नमस्तेकोणसंस्थायपिंगलायनमोस्तुते
नमस्तेवभ्रुरूपायकृष्णायचनमोस्तुते २नमस्तेरौद्रदेहायनमस्तेचांतकायच नमस्तेयमसंज्ञायनमस्तेसौरयेविभो३
नमस्तेमंदसंज्ञायशनैश्चरनमोस्तुते प्रसादंकुरुदेवेशदीनस्यप्रणतस्यच ४शनैश्चरउवाच परितुष्टोस्मितेवत्सलो

शां.मं.
४५

त्रेणानेनसांप्रतं वरं वरयभोवत्सयेनपश्यामिवांछितं ५ पिप्पलादउवाच अद्यप्रभृतिनोपीडाबालानांरविनंदन त्वयाका
र्यामहाभागनस्वकीयाकथंचन ६ यावद्वर्षाष्टकंजातंममवाक्येनसूर्यज स्तोत्रेणानेनयोन्यस्त्वां ब्रूयात्मातरुपस्थितः॥
तस्यपीडानकर्तव्यात्वयाभास्करनंदनतस्यपीडानकर्तव्यारेयोलाभोमहाभुज अर्द्धाष्टमिकयायोगेतावकेसंस्थितेनरः७
मादिसप्तवर्षपर्यंतंद्वादशजन्मद्वितीयराशिभिर्यःशनैश्चरयोगःसोर्द्धाष्टमिकयोगइत्युच्यते ८ तववारेतुसंप्राप्तेपक्तिलान्
लोहसंयुतान् शक्त्याददातिनोतस्यपीडाकार्यात्वयाविभो ९ कृष्णांगांयस्तुविप्रायतवोद्देशेनयच्छति अर्द्धाष्टमिकपापी
डातस्यकार्यात्वयानघ १० शमीसमिद्भिर्होमोपितवोद्देशेननिर्वपेत् तथाकृष्णतिलैश्चैववस्तुथाकृष्णानुलेपनैः ११ पूजांकरो
तियस्तुभ्यंधूपंवागुग्गुलंदहेत् कृष्णवस्त्रेणसंवेष्ट्यत्याज्यातस्यत्वयान्यथा १२ सूतउवाच एवमुक्तःशनिस्तेनवाढमित्येवज
ल्पच नारदसमनुज्ञाप्यजगामनिजसंश्रयं १३ इतिशनैश्चरशांतिः ० अथार्कविवाहः प्रयोगरत्ने तृतीयांमानुषींनैवचतुर्थीं
यः समुद्वहेत्पुत्रपौत्रादिसंपन्नःकुटुंबीसात्विकोनरः १ उद्वहेदितिसिध्यर्थंतृतीयांनकदाचन मोहादज्ञानतोवापियदिगच्छे
तुमानुषी २ नश्यत्येवनसंदेहोगर्गस्यवचनंयथेति तत्रैवसंग्रहे तृतीयांयदिचोद्वाहेत्तर्हिसाविधवाभवेत् ३ चतुर्थ्यादि
विवाहार्थंतृतीयेर्कंसमुद्वहेत् आदित्यदिवसेवापिहस्तर्क्षेवाशनैश्चरे ४ शुभेदिनेवापूर्वाह्णेकुर्यादर्कविवाहकं आसःस्ना

तालंकृतवासाःस्त्रक्गंधादिभूषितं ५ सपुष्पफलशाखैर्वाअर्कगुल्मंसमाश्रयेत् सत्त्वक्षरोनसंयुक्तं अर्कंसंस्थाप्ययत्नतः ६
अर्ककन्याप्रदानार्थमाचार्यंकल्पयेद्गुरुं अर्कसंनिधिमागत्यतत्रस्वस्त्यादिवाचयेत् ७ नांदीश्राद्धंहिरण्येन अष्टवर्गान्प्रपूज
येत् पूजयेन्मधुपर्केणवरंविप्रस्यहस्ततः ८ यज्ञोपवीतंवस्त्रंचहस्तकर्णादिभूषणं उष्णीषंगंधमाल्यादीवरायास्मैप्रदा
पयेत् ९ स्वशाखोक्तप्रकारेणमधुपर्कंसमाचरेत् वाह्येग्रामात्प्राच्यांवासुपुष्पफलसंयुतं १० परीक्ष्ययत्नतोधस्तात्स्थंडि
लादियथाविधि कुर्यादितिशेषः कृत्वार्कंपुरतस्तिष्ठन्प्रार्थयेत्तद्द्विजोत्तमः ११ त्रिलोकवासिन्सप्ताश्वछाययासहितोरवे तृ
तीयोद्वाहजंदोषंनिवारयसुखंकुरु १२ तत्राध्यारोप्यदेवेशंछाययासहितंरविं वस्त्रैर्माल्यैस्तथागंधैस्तन्मंत्रेणैवपूजयेत् १३
तत्रैवश्वेतवस्त्रेणतथाकार्यास्ततंतुभिः १४ गंधपुष्पैःसमभ्यर्च्यततोलिंगैरभिषिंचयेत् २४ गुडोदनेनतुनैवेद्यंताम्बूलंचसमर्प
येत् आसःअर्कंप्रदक्षिणीकुर्वन्जपेन्मंत्रमिमंबुधः १५ ममप्रीतिकरायेयंमयासृष्टापुरातनी अर्कजाब्रह्मणासृष्टाअस्मा
कंपरिरक्षतु १६ पुनःप्रदक्षिणीकुर्यान्मंत्रेणानेनमंत्रवित् नमस्तेमंगलेदेविनमःसवितुरात्मजे १७ त्राहिमांकृपयादेविप
तीत्वंमेद्दहागता अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहितायच १८ वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः तृतीयोद्वाह
जंपापंमृत्युंचाशुविनाशय १९ ततश्चकन्यावरयोस्त्रिपुरुषंकुलमुच्चरेत् आदित्यःसवितावार्कःपुत्रीपौत्रीचनप्त्रिका २० गो

ग्रंकाश्यपमित्युक्तं लोके लौकिकमाचरेत् सुमुहूर्ते निरीक्षेतु स्वस्तिसूक्तमुदीरयन् २१ आशीर्भिः सहितैः कुर्यादाचार्यप्रमुखैर्द्वि
जैः अथाचार्यं समाहूय विधिनातन्मुखाश्च ताः २२ परिगृह्य ततो होमं गृह्योक्तविधिनाचरेत् आसः अर्ककन्यामिमां विप्रयथाशक्ति
विभूषितां २३ गोत्राय शर्मणे तुभ्यं दत्तां विप्रसमाश्रयेत् अंजल्यक्षतकर्माणि कृत्वार्ककरणपूर्वकं २४ यावत्पंचावृता सूत्रं ताव
दर्कं प्रवेष्टयेत् स्वशाखोक्तेन मंत्रेण गायत्र्या वाथ वाजयेत् २५ पंचीकृत्य पुनः सूत्रं स्कंधे वध्नाति मंत्रतः बृहत्सामेति मंत्रेण सू
त्रे रक्षां प्रकल्पयेत् २६ अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा कुंभांश्च निक्षिपेत्पश्चादाग्नेयादिचतुष्टये २७ सवस्त्रं प्रतिकुंभं
च निस्तंतेनैव वेष्टयेत् हरिद्रागंधसंयुक्तं पूरयेच्छीतलं जलं २८ प्रतिकुंभं महाविष्णुं संपूज्य परमेश्वरं पाद्यार्घ्यादिनिवेद्यां
तं कुर्यान्नाम्नैव मंत्रवित् २९ अत्र शौनकोक्तहोमप्रकारः ॐ तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु अर्कविवाहं वक्ष्यामि शौ
नकोऽहं विधानतः १ अर्कसंनिधिमागत्य तत्र स्वस्त्यादि वाचयेत् नांदीश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत् २ अर्कमभ्य
र्च्य सौर्यं च गंधपुष्पाक्षतादिभिः सौर्यां सूर्यदेवत्यां यामृचा आकृष्णेनेत्यनया स्वयं वालंकृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः ३
अर्कस्योत्तरदेशे तु समन्वारब्धया तया एतयाऽर्ककन्याया उल्लेखनादिकं कुर्यादाघारांतमतः परं ४ आज्याहुतीश्चजुहुया
त्संगोभिरनयैकया कस्मै त्वा काम कामायेत्येतनयचांततः परं ५ मस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत् परिषेचनपर्य

तं त्याश्चैत्यादिकं क्रमात् प्रार्थनादिमंत्रादिविशेषमाह व्यासः पुनः प्रदक्षिणां कृत्वा मंत्रमेतमुदीरयेत् यथाकृतमिदं कर्म स्थावरे
षु जरायुष्ण अर्कायत्वानिनोदं हितत्सर्वं क्षंतुमर्हसि इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसृजेत्पुनः गोयुग्मं दक्षिणां दद्यादा
चार्याय च भक्तितः इतरेभ्यश्च विप्रेभ्यो दक्षिणां चापि शक्तितः ततः सर्वं गुरवे दद्यादंते पुण्याहमाचरेत् अथ प्रयोगः तृती
यविवाहात्प्राग्दिनचतुष्टयाधिकव्यवहिते रविवारे शनिवारे हस्तनक्षत्रे शुभे दिनांतरे वा ग्रामात्प्राच्यामुदीच्यां वा पुष्पफल
युतार्कादधस्तात्स्थंडिलं कृत्वार्कपश्चिमतउपविश्य मासपक्षाद्युल्लिख्य मम तृतीयमानुषीविवाहजदोषापनुत्त्यर्थं अर्कविवा
हं करिष्ये इति संकल्प्य गणेशपूजा स्वस्तिवाचन मातृपूजन वृद्धिश्राद्धाचार्यवरणानि कुर्यात् तत्र वृद्धिश्राद्धे हेम्ना अथा
चार्येण पूजितो वरः त्रिलोकवासिन् सप्ताश्वछायया सहितो रवे तृतीयोद्वाहजं दोषं निवारय सुखं कुर्वित्यर्कं संप्रार्थ्यार्कं
आकृष्णेनेति छायासहितं रविमावाह्य श्वेतवस्त्रसूत्राभ्यामावेष्ट्य संपूज्यापो हिष्ठेत्यादिभिरभिरमिषिंच्य गुडोदनतां
बूलादि समर्प्य प्रदक्षिणां कुर्वन् मम प्रीतिकराये यं मया सृष्टा पुरातनी अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षत्विति
पठेत् द्वितीयप्रदक्षिणायां तु नमस्ते मंगले देवि नमः सवितुरात्मजे ॥ त्राहि मां कृपया देवि पत्नीत्वं मे इहागता अ
र्के त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विना

ग्रयेति तत आचार्येणामासपक्षाद्युल्लिख्य काश्यपगोत्रामादित्यस्य पुत्रीं सवितुः पौत्रीं अर्कस्य प्रपौत्रीं इमां अर्ककन्यामिमु
के. वरः स्वस्तिन इंद्रो वृद्धश्रवा इति सूक्तं पठन्नर्कं निरीक्षेत तत आचार्यो विप्रैः सहाशिषो दत्वामुकगोत्रायामुकशर्मणे
संप्रददे इत्यर्ककन्यां दत्वार्ककन्यामिमां विप्र यथाशक्ति विभूषितां गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति पठेत् वर
स्तु यज्ञोमेकामः समृद्ध्यतामिति प्रथमो धर्मो मे इति द्वितीयो यशो इति तृतीयामिति त्रीन्सलाजलीनर्कोपरि क्षिपेत् तंतु
पत्या परिवेष्ट्य विनाम्ना पंचावृत्तसूत्रेणार्कं समावेष्ट्य ततस्तूत्रं पंचगुणं कृत्वार्कस्य स्कंधे बध्वा ।। बृहत्सामेति रक्षां परिकल्प्य
अर्कस्य दिक्षु विदिक्षु शकुनान् संस्थाप्य वस्त्रयुग्मसूत्रेणावेष्ट्य हरिद्रागंधाद्यैः ततः स्विष्टाते विष्णुनाम्ना विष्णुमावाह्य षोडशो
पचारैः संपूज्य स्थंडिले ऽग्निं प्रतिष्ठाप्य आघारावाज्यभागांत्ये नत्वंतमुक्त्वात्र प्रधानं बृहस्पतिमग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेण
त्याद्युक्त्वा पारंते संगोभिरांगिरसो बृहस्पतिस्त्रिष्टुप् अर्कविवाहहोमे विनियोगः ॐ संगोभिरांगिरसो नक्षमाणो भग इवे
दर्यमणं निनाय जनेमित्रो न दंपती अनक्ति बृहस्पते वाजयाशूरिवाजौ स्वाहा बृहस्पतय इदं न मम इति त्यजेत् यस्मै त्वा
मदेवो ऽग्निस्त्रिष्टुप् विनियोगः प्राग्वत् ॐ यस्मै त्वा कामकामाय वयं सम्राड्यजामहे तमस्मभ्यं कामं दत्वाथेदं घृतं पि
बस्वाहा अग्नय इदं ततो व्याहृतिभिर्हुत्वा स्विष्टकृदादिकर्मशेषं समाप्यार्कं प्रदक्षिणीकृत्य मया कृतमिदं कर्म स्थावरे

पुनरपुरां अर्कापत्यानि नो देहि तत्सर्वं क्षंतुमर्हसीति प्रार्थ्याचार्याय गोयुग्ममन्येभ्यश्च विप्रेभ्यो यथाशक्ति दक्षिणां दत्वा
शांतिसूक्तं जपित्वा पूजोपकरणान्याचार्याय दत्वा दिनचतुष्टयमपि कुंभांश्च रक्षेत् कुंभेषु महाविष्णुं पूजयेच्च पंचमदिने
कृतसंस्नानः चतुर्थे दिवसे तीते पूर्ववत्तां प्रपूज्य च विसृज्य होमं अग्निं च विधिना मानीषीयां उद्वहेत्स तथा नैव पुत्रपौत्रस
मृद्धिमान् इति श्रीभट्टनीलकंठकृते भास्करे शांतिमयूखे अर्कविवाहः अथ रजोदर्शनशांति नारदः कुलीरवृषभेचाप
लनृयुकन्यातुलाघटाः राशयः शुभदा स्त्रीणां प्रथमार्तवे कुलीरः कर्कटः चापः धनुः अंत्यो मीनः नृयुग्मिथुनं घटः कुं
भः स्मृतिचंद्रिकायां शुक्लपक्षे सुशीला स्यात्कृष्णे सा कुलटा भवेत् कृष्णस्य दशमी यावन्मध्यमं फलमादिशेत् तथा तत्रैव ।।
अमारिक्ताष्टमी षष्ठी द्वादशी प्रतिपत्स्वपि परिघस्य च पूर्वार्धे व्यतीपाते च वैधृतौ संध्यासूपप्लवे विष्ट्यामशुभं प्रथमार्तवं
रोगी पतिव्रता दुःखी पुत्रिणी भोगभोगिनी पतिव्रता क्लेशयुक्ता सूर्यवारादिषु क्रमात् कश्यपस्तु अष्टमी षष्ठ्यमारिक्ताद्वा
दशीसंक्रमे पि वा वैधृतौ व्यतीपाते ग्रहणे चंद्रसूर्ययोः विष्ट्यां संध्यासु निद्रायां दुर्भगा प्रथमार्तवे नक्षत्रफलमाह गर्गः ।।
सुभगा चैव दुःशीला वंध्या पुत्रसमन्विता धर्मयुक्ता व्रतस्थी च परसंतानमोदिनी सुपुत्रा चैव दुःपुत्रा पित्रे वेश्मरता स्वपादी
नाम   शावती चैव पुत्राढ्या चित्रकारिणी साध्वी पतिव्रता नित्या सुपुत्रा कष्टकारिणी स्वकर्मनिरता हिंसा पुण्या यो

त्रादिसंयुता नित्यंवनकथासक्तापुत्रधान्यसमन्विता मूर्खोर्थाढ्यागुणावतीदस्रक्षादेः क्रमात्फलं स्मृतिरत्ने शुभंचैवतुपू
र्वाह्नेमध्याह्नेमध्यमंफलं अपराह्णेतुवैधव्यंपूर्वरात्रेशुभंभवेत् मध्यरात्रेतुमध्यंस्यात्पररात्रेशुभान्विता कश्यपः मलिना
मंदवारेस्याद्रात्रावपितथैवचेति स्मृत्यंतरे मध्याह्नेतुभवेत्संध्यानिशीथेविधवाभवेत् तथा अमासंक्रांतिविष्ट्यांवव्यती
पातेचवैधृतौ परिघस्यतुपूर्वार्द्धेषट्‌षड्‌गंडालिगंडयोः व्याघातेनवशूलेतुनार्यःपंचतुदर्शने वैधव्यमर्थहानिंचसुतना
शंमहद्भयं वैधव्यंशत्रुवृद्धिंचदारिद्र्यंक्षीणजीवनं तेजोहानिंसमापातिसदापुष्पवतीक्रमात् स्थानभेदेफलभेदमाह
श्लिष्टः ग्रामाद्बहिःपरग्रामेचेत्स्याद्व्यभिचारिणी पतिव्रतापतिस्थानेसुशीलागृहमध्यके ग्राममध्येतुवृद्धिश्चविधवाच
दिगंबरा परागारेत्वदुःशीलाआयुष्यंजलसंनिधौ वनमध्येतुकन्यायाधनधान्यसमृद्धिदा परागारइत्यनेनैवपितृगृह
निषिद्धं तथाचशिष्टाचारः विशेषनिषेधस्तुनदृश्यते तथा चंद्रेसद्गुणसंयुक्तेदेवराजमताच्छुभं शावाशौचेपिअशु
भमितिगुरवः वस्त्रफलमाहवसिष्ठः सुभगाश्वेतवस्त्रास्यात् दृढवस्त्रापतिव्रता क्षौमवस्त्राक्षितीशस्यान्नववस्त्रासुखा
न्विता दुर्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवाससा नीलांबरधरानारीविधवापुष्पितायदि मलिनांबरतोनारिदरिद्रा
स्याद्रजस्वला रजोबिंदुफलमाहसएव वस्त्रेस्युर्यदिचमारक्तबिंदवःपुत्रमाप्नुयात् समाश्चेत्कन्यकाचेतिफलंस्यात्प्रथमार्त्त

वे देवराजः संमार्जनीकाष्ठतृणाग्निशूर्पान्हस्तेदधानाकुलटायदास्यात् तुल्योपभोगेनपतिस्थितावेदृष्टरजोभाग्यवतीतदा॥
त् नारदः नीच्यर्क्षवारागिधात्र्येत्तदोषफलनिवारयेत् दोषाधिकेगुणाल्पत्वेतत्तथापिनकारयेत् दोषाल्पत्वेगुणाधिको॥
दोषंकर्मसमाचरेत् निंद्यर्क्षतिथिवारेषुयदिपुष्पंप्रदृश्यते तत्रशांतिं प्रकुर्वीतघृतदूर्वातिलाक्षतैः प्रत्येकंशतमष्टौच
गायत्र्याजुहुयात्ततः स्वर्णंगोभूतिलान्दद्यात्सर्वदोषापनुत्तये भर्तातत्राभिगमनंवर्जयेत् शास्त्रदर्शनात् वसिष्ठोपि प्र
भूतदोषयदिदृश्यतेतत्पुष्पंततः शांतिककर्मकार्यं विवर्जयेदेवतदेकशय्यांयावद्रजोदर्शनमंत्यघस्ते शौनकः आर्तवानां
तुनारीणांशांतिंवक्ष्याभिशौनकः तिथिवारर्क्षयोगेभ्योलग्नेचसनवांशके ग्रहेभ्योदुःस्थितेभ्यःश्चतत्तद्दोषक्षयायच अ
न्नपुत्रपुत्रस्यलाभायदंपत्योरभिवृद्धये पंचमेन्हिचतुर्थेवाग्रहयज्ञपुरस्सरं तस्मिन्नहनिकर्तव्यमृतुहोमविधानतः आ
चार्यंवरयेत्प्रातर्भुवनेश्वरितुष्टये होमार्थंवज्रयार्थंचवरयेदृत्विजोबहून यजमानोद्विजैः सार्धंशांतिहोमंसमाचरेत्॥
गृहादीशानदिग्भागेदेवतापूजनायच द्रोणप्रमाणधान्येनव्रीहिराशित्रयंभवेत् कुंभत्रयंन्यसेत्तासौ तंतुवस्त्रादिवेष्टितं
पूरयेत्तीर्थसलिलैःप्रतिकुंभंपृथक्पृथक् सूक्तेनाथनवर्चेनप्रसुवआपइत्यथ ऋचापाः मावतस्तद्वदायन्माचततःक्र
मात् मध्यकुंभेक्षिपेद्धान्यंऔषधानिचहेमच ततश्चपंचरत्नानिगंधपुष्पाक्षतायुतान् औषधानिचवक्ष्यंतेमुनिभिः शां

शां॰ म॰
४८

तिकारणात् औदुंबरं कुशादूर्वा शमीकं चंपविल्वकाः विष्णुक्रांताथतुलसीवर्हिषं शंखपुष्पिका शतावर्याश्वगंधा च निर्गुंडिस
र्षपद्वयं अपामार्गपलाशाश्च पनसोजीवकस्तथा प्रियंगवाश्च गोधूमा व्रीहयोश्वत्थएव च क्षीरं च दधिसर्पिश्च श्रीपर्णी च
वतथोत्पलं कुरंटकश्च गुंजा च वचा मुस्तकमेव का इति द्वात्रिंशदोषधानीह गायत्र्या सर्वमाहरेत् गजाश्वरथ्यवल्मीकसं
गमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्च मृदमानीयनिक्षिपेत् कुंभस्थापनमित्याह ततस्मंत्रेणकारयेत् मृत्तिकाचौषधादी
निमंत्रैःप्रक्षिपेत्क्रमात् कुंभोपरिन्यसेत्पात्रं कांस्यं वाताम्रमेव वा मृण्मयं वेणुपात्रं वा स्ववित्तानुसारतः पात्रोपरिन्यसेद्धेमप्रतिमां
भुवनेश्वरीं तन्मध्येवान्यसेत्तत्रेंद्राणीं च पुरंदरं आचार्यःपूजयेद्देवीमंगाद्यावरणानि च अन्यो वा पूजनं कुर्याद्गायत्र्या
मंत्रसारया इंद्राणीं पूजयेद्देवीमिंद्राणीमासुनारिषु क्रमेणपूजयेदिंद्रमिंद्रत्वा वृषभं वयं अनेन विधिना चाथ पूजयेद्देवता
त्रयं आवाहनादिसकलैरुपचारैःपृथक्पृथक् तन्मध्यमस्पृशन्कुंभं मंत्रेणभुवनेश्वरीं जपेदाचार्य आहोमाद्बुधस
त्तं च जपेत्ततः स्पृशन्वैदक्षिणंकुंभं ऋत्विगेकोजपेदथ चत्वारि रुद्रसूक्तानि चतुर्मंत्रोत्तराणि च संस्पृशन्नुत्तरं कुंभं श्री
रुद्रं रुद्रसंख्यया शन्नइंद्राग्नीसूक्तं च तत्रैवस्पृशन्जपेत् कुंभस्य पश्चिमे देशे शांतिहोमं समाचरेत् अन्वाधानं ततः कुर्या
द्धोमतंत्रं समारभेत् पूर्णपात्रनिधानांतं कृत्वा कार्यं द्विजैः सह दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च पायसं श्रपयेत्तत्र स

मित्रं चरु विश्वतः कृत्वाज्यभागपर्यंतं हविरुद्वासनादिकं तिसृभिश्चैव दूर्वाभिरेकैकाचाहुतिर्भवेत् अभिमंत्रप्रयुक्ताभिर्गा
यत्र्याजुहुयात्क्रमात् अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तु वा तिलमिश्रैश्च गोधूमैर्द्रव्येणाज्याहुतीर्हुनेत् जुहुयात्पायसेनै
व आज्येन चहुनेत्क्रमात् हविश्चतुष्टयेनैव प्रत्येकं शतसंख्यया गायत्र्यैव तु होतव्यं हविरत्र चतुष्टयं ततः स्विष्टकृतं हुत्वा
रज्जुप्रहरणं तथा अपाश्चेत्यादिभिर्हुत्वा समुद्रादूर्मिसूक्ततः सततामाज्यधारां तां पूर्णाहुतिं तत आचरेत् परिषेचनपर्यंतं
होमशेषं समापयेत् महौषधिस्थितैस्तत्र प्रतिकुंभस्थितोदकैः ऋतुमत्याः स्त्रियाः पाणिं दंपतिभ्यां सुखायच अथाभिषेक
मंत्राश्च प्रोच्यंते शौनकादिभिः त्र्यंबकेण च मंत्रेण जातवेदस एकया समुद्रज्येष्ठ इत्यादि चतुर्भिश्च प्रसिद्धकैः त्रायंतामिति
मंत्रैश्च त्रिभिश्चापि यथाक्रमं इमा आपस्तथैवैनं देवस्यत्वेति मंत्रतः मंत्रेणायतमीशानं त्वमग्ने रुद्र इत्यथा तमुष्टुहीति मं
त्रेण भुवनस्य पितुस्तथा या ते रुद्रमंत्रेण शिवसंकल्पमंत्रतः इंद्रत्वा वृषभं वयं मंत्रैश्चैवाभिषेचयेत् साचवस्त्रांतरं धृत्वापु
नश्चैवोपवासिनी उपवासोत्र समीपावस्थानं विप्रानभ्यर्च्य विधिवद्गंधपुष्पाक्षतादिभिः धेनुं पयस्विनीं दद्यादाचार्याय
च भूषणैः सदक्षिणमनड्वाहं प्रदद्याद्रुद्रजापिने ऋत्विग्भ्यश्चाथ सर्वेभ्यो दद्याद्दक्षिणां ततः महाशांतिं प्रजप्ताथ विप्रा
शीर्वाचनं ततः ब्राह्मणान्भोजयेच्चैव भुंजीयात्स्वजनैः सह स्मृतौ ब्राह्मणान्भोजयित्वा तद्दैवतं भोजयेत्ततः एवं यः कुरुते शांति

शां म शौनकोक्तप्रकारतः तदानिष्टं सकलं सर्वं वापि विनश्यतीति इति शौनकोक्तरजोदर्शनशांतिः अथ प्रयोगः कर्ता देशकाली
४९ स्मृत्वा मम पत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासादिसूचितारिष्टनिरसनार्थं शांतिं करिष्य इति संकल्प्य गणेशपूजनं
स्वस्तिवाचनमातृकापूजनाभ्युदयिकाचार्यत्विग्वरणानि कुर्यात् अथाचार्यो गृह्योक्तविधिना प्रत्येकं मंत्रावृत्त्या पदार्थानु
समयेन कुंभत्रयं स्थापयेत् तद्यथा महीद्यौरिति मध्ये तद्दक्षिणोत्तरतश्च स्पृष्ट्वा ॐ यथायदिति स्पर्शक्रमेणा तेषु स्था
नेषु द्रोणप्रमाणान् व्रीहीन् राशीकृत्य तेनैव क्रमेण राशित्रये आकलशेष्विति कुंभत्रयं संस्थाप्य मध्ये प्रसुव आप इति न
वर्चोभिः तद्दक्षिणाः प्रवत इति वा तदुत्तरे गायत्र्या जलं क्षिप्त्वा त्रिष्वपि गंधद्वारामिति गंधं ॐ यौषधीरिति सर्वौष
धीः ओषधयः समिति यवान् क्षिप्त्वा मध्यम एव यवव्रीहितिलमाषकंगुश्यामाकमुद्गान् क्षिप्त्वोदुंबरकुशदूर्वा
रक्तोत्पलचंपकविष्णुक्रांतातुलसीबर्हिषशंखपुष्पी शतावर्यश्वगंधानिर्गुंडीरक्तपीतसर्वपापाणांगपलाशपुत्रेन
सजीवकप्रियंगुगोधूमबीजपूरवत्सदधिदुग्धघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरंटकगुंजावचाभद्रकमुस्तकाख्या
नि द्वात्रिंशदौषधानि यथासंभवं वा गायत्र्या क्षिप्त्वा त्रिषु दूर्वापंचपल्लवसप्तमृत्तिकाफलपंचरत्नसुवर्णानि क्षिप्त्वा युवा
सुवासा इति सूत्रेणावाससा वा कुंभकंठान् वेष्टयित्वा गंधादिभिरलंकृत्य पूर्णादर्वीति यवादिपूर्णपात्राणि निधाय तेषु

सौष्टदलपद्मे तवस्त्रत्रयं न्यस्य मध्यमे गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री भुवनेश्वर्यावाहने विनियोगः तत्सवितुरिति
भुवनेश्वरीं तद्दक्षिणकुंभे इंद्राणीं वृषाकपिरिंद्राणी पंक्तिः इंद्राण्यावाहने० इंद्राणीमासुविति इंद्राणीं उत्तरकुंभे इंद्र
त्राविश्वामित्र इंद्रो गायत्री इंद्रावाहने० इंद्रत्रेतारमिंद्र प्रतिमा सुस्थाप्य षोडशभिः पंचभिर्वोपचारैरभ्यर्च्य मध्यमे ष्टसहस्र
मष्टशतं वा गायत्रीं श्रीसूक्तं च जपेत् ततः एकत्विग्दक्षिणकुंभे रुद्रसूक्तानि जपेत् तानि च कद्रुद्रायेति नवर्चो इमारुद्रा
यतवस इत्येकादशर्चो इमारुद्राय स्थिरधन्वन इति पंचर्चं आते पितरिति पंचदश र्चं तमुष्टुहीत्येका भुवनस्यपितर इ
त्येका त्र्यंबक इत्येका आवोराजानं इत्येका अथान्यस्त्विगुत्तरकुंभे एकादशावृत्त्या रुद्रसूक्तं शंन्न इंद्राग्नीति पंचदश र्चं सूक्तं
जयेत् कद्रुद्रायेति नवर्चस्य घोरः कण्वो गायत्री जपे० इमारुद्राय तवस इत्येकादशर्चस्य कुत्सो रुद्र आद्यानवजगत्योन्ते
द्वे तु ष्टभौ जपे० आते पितरिति पंचदशर्चस्य गृत्समदो रुद्रस्त्रिष्टुप् ० इमारुद्राय स्थिरधन्वन इति चतसृणां वसिष्ठो रु
द्रस्त्रिष्टुप् जपे विनियोगः तमुष्टुहि भौमो रुद्रस्त्रिष्टुप्० भुवनस्य पितेत्यत्रिरुद्रस्त्रिष्टुप्० त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्० आ
वोराजानं वामदेवो रुद्रस्त्रिष्टुप् जपे विनियोगः अथाचार्यः कुंभपश्चिमे स्थंडिले संस्थाप्य तदीशान्यां ग्रहस्थापनादि पूजांतं कृ
त्वा तदीशान्याम् एकं कुंभं स्थापयित्वा वरुणमावाहनादि पूजांतं कृत्वान्वादध्यात् तत्रास्मिन्नन्वाहिते त्वावित्यादि चक्षुषी आज्येनेत्य

शां म.
५०

तमुक्त्वा भुवनेश्वरी मिंद्राणी मिंद्रं च प्रत्येकममुकं संख्यया दूर्वातिलमिश्रगोधूमपायसाज्यैर्ग्रहांश्चामुकसंख्यया समिच्चरुतिला
ज्यैः । प्रोषेणास्विष्टकृत्तमित्यादि यक्ष्य इत्यंतमुक्त्वा परिस्तरणाद्याघाराज्यभागान्तं कृत्वा यजमानेनागप्रधानदेवता उद्दिश्य
एताभ्य इदं न मम इत्युक्ते ऋत्विग्भिः सहान्वाधानोक्तक्रमेण जुहुयात् अन्ये तु गायत्र्यैव तु होतव्यं हविरत्र चतुष्टय
ततः स्विष्टकृतं हुत्वोत्सत्रैंद्राणींद्रयो होमानभिधानात् न तयोर्होमो न्वाधाने वा कीर्तनमित्याहुः परे तु भुवनेश्वरी तत्स
न्यूनं संख्यया होम इति ततः स्विष्टकृदादि वलिदानांतं कृत्वा समुद्रादूर्मिरिति तृचेन पूर्णाहुतिं हुत्वा प्रणीता विमो
कं कृत्वा ऋग्भिः सह सभार्यं यजमानं कुंभोदकै रभिषिंचेत् तत्र मंत्राः आपो हिष्ठेति नव ऋचः य एकद्विपद य इति
त्रिभिष्टुं देवेति च उभयं शृणुवच्च न स्वस्तिदा विशी य इति त्र्यंबकमिति जातवेदस इति समुद्रज्येष्ठा इति ४ ऋचः
त्रार्यता मिति ३ ऋचः इमा आप इति ३ ऋचः देवस्य त्वेति तिस्रः तमीशानं जगतः त्वमग्ने रुद्र इत्येकं यजुः तमुष्टु
हीति भुवनस्य पितरं या ते रुद्र प्रजाग्रत इति दश एतैर्याजुषा इंद्र त्वा वृषभं वयमित्यृचः सुराः त्वामभिषिंचं तु त्या यो
पौराणाः एवमभिषिक्तः सुस्नातो धृतशुक्लवासाः सपत्नीको यजमानोग्निमाचार्यादींश्च संपूज्याचार्याय धेनुं ब्रह्मणे
ऋत्विग्भ्यश्च यथाशक्ति दक्षिणां रुद्रजापिने सदक्षिणमनड्वाहं च भूयसीं दत्त्वा ग्रहपीठदेवतानां भुवनेश्वर्यादीनां चोत्त

रपूजां कृत्वा यांतु देवगणा इति विसृज्याचार्याय प्रतिपाद्य गच्छ गच्छेत्यग्निं विसर्जयेत् ततो ब्राह्मणाः शांतिं पठेयुः तत्र मंत्राः अ
नो भद्रा इति १० स्वस्ति नो मिमीतामिति १५ ऋचः त्वं सूक्तमिति ३ ऋचः तच्छंयोरिति च ततो यजमानो द्वादश ब्राह्मणान् भोजयित्वा
संकल्प्य वा विप्राशिषो गृहीत्वा सुहृद्युतो भुंजीत अथ चंद्रार्कोपरागकाले आद्यरजोदर्शने विशेषमाह कर्तोक्तकाले मा
सपक्षाद्युल्लिख्य मम पत्न्याश्चंद्रस्य सूर्यस्य वा उपरागे प्रथमरजोदर्शनसूचितारिष्टनिरासार्थं शांतिं करिष्य इति संकल्प्य प्राग्व
दग्निकृपूजां तं कुर्यात् अथाचार्यो गोमयेनोपलिप्ते देशे पंचवर्णै रष्टदलं कृत्वा तत्र श्वेतवस्त्रमुदग्दशं प्रसार्य तत्राप्याय
स्वेति राजतचंद्रप्रतिमां सूर्योपरागे तु आकृष्णेनेति सौवर्णं सूर्यप्रतिमामावाह्य तदुत्तरतः स्वर्भानोरिति सैसां प्रतिमायां
राहुमावाह्य यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्रदेवतां सौवर्णप्रतिमां स्थापयेत् तत्तन्मंत्रैः प्रणवादिनमोंतैर्नाममंत्रैर्वावाह्य
कांडानुसमयेन षोडशोपचारैः पूजयेत् तत्र चंद्राय हानक्षत्रदेवतायसे ग्रन नक्षत्रदेवताभ्यः श्वेतानि गंधादीनि सूर्याय र
क्तानि राहवे कृष्णानि ततः पश्चिमतोग्निं प्रतिष्ठाप्य पक्षे ग्रहावाहनादि पूजां तं कृत्वान्वादध्यात् तत्र चक्षुषी आज्येनेत्यंत
मुक्त्वा चंद्रसूर्ये राहूंश्चामुकसंख्यया समिदाज्यचरुतिलाहुतिभिः प्रोषेणेत्यादि समित्सु विशेषः चंद्रनक्षत्रदेवतयोः पालाशः
सूर्यस्यार्कः राहोर्दूर्वा तांश्च तिस्र एकाहुतिः अथाज्यभागान्तं कृत्वा यजमानेनद्रव्यं त्यक्ते न्वाधानक्रमेणर्त्विग्भिः सह हुत्वा स्वि

श्कृदादिपूर्णाहुत्यंतंप्राग्वत्कृत्वैकस्मिंकुंभेजलेपंचगव्यपंचरत्नत्वक्पल्लवसर्वौषधिकल्कदूर्वांकुराणिनिक्षिप्यमऋत्विक्दं
पंतीपूर्ववदभिषिंचेत् तत्रमंत्राः आपोहिष्ठेतितृचः इमंमेगंगेत्येकातत्वायामीत्येक अन्येपिसमुद्रज्येष्ठा सुराल्वामि
त्यादयश्चशेषंपूर्ववत् इतिदुष्टरजोदर्शनशांतिप्रयोगः अथगोमुखप्रसवः गर्गः पितृरिष्टेसुतारिष्टेमातृरिष्टेतथैवच
प्रायश्चित्तंतदाकुर्यात्तत्दोषस्यशांतये॰ तादृशनक्षत्रोत्पत्त्यासूचितेपित्राद्यरिष्टेप्रायश्चित्तमित्यन्यापितत्दित्यन्वेति देह
लीदीपवत् तत्तद्दोषशांत्यैतत्तत्प्रायश्चित्तंकुर्यादित्यर्थः पूषाश्विनौगरीसार्यमघाचित्रेंद्रमूलभे एषुऋक्षेषुजातस्यकुर्याज्जे
ज्ञनंतथा जन्मर्क्षेवानिजन्मर्क्षेशुभवारेशुभेदिने कृत्वाभ्यंगादिकंसर्वंगृहालंकारपूर्वकं गोमयेनोपलिप्याथगृहस्येशा
नभागके पंकजंकर्णिकायुक्तंरजोभिःश्वेतवर्णकैः व्रीहींस्तत्रविनिक्षिप्ययथावित्तानुसारतः नवशूर्पेतुतन्मध्येरक्तव
स्त्रंप्रसारयेत् स्थापयित्वाशिशुंतत्रपुनःसूत्रेणवेष्टयेत् प्राङ्मुखंतमवाक्पादंतिलगर्भगतंशिशुं गोमुखंदर्शयित्वातुपु
नर्जातंतुगोमुखात् विष्णुर्योनीतिसूक्तेनगव्येनस्नपयेच्छिशुं गवामंगेषुमंत्रेणगवांमेगेषुसंस्पृशेत् विष्णोःश्रेष्ठेनमंत्रेणगो
प्रसूतंतुबालकं आचार्यस्तुसमादायपश्चान्मात्रेददेत्तदा माताजघन्यभागस्थाशिशुमानीयतन्मुखात् ततः पित्रेतदाद
द्यात्ततोमात्रेप्रदापयेत् वस्त्रेस्थाप्यपितापास्यपुत्रस्यमुखमीक्षयेत् गोमूत्रंगोमयंक्षीरंदधिसर्पिश्चसंयुतं आपोहिष्ठादि

भिर्मंत्रैरभिषिंचेत्ततःशिशुं मूर्ध्निचाघ्रापयेत्पुत्रंतन्मंत्रेणतदापिता अंगादंगात्संभवसिहृदयादधिजायसे आत्मावैपुत्रन
मासिसजीवशरदः शतं मूर्धनित्रिरवघ्रायतंशिशुंस्थापयेत्ततः पुण्याहंवाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः दक्षिणार्थंपय
स्विनींगामभ्यर्च्यदापयेत् गोवस्त्रस्वर्णधान्यानिदद्यादर्कादितःक्रमात् यथाशक्तिधनंदद्याद्ब्राह्मणेभ्यस्तदापिता ततोहो
मंप्रकुर्वीतस्वस्वशाखोक्तमार्गतः उल्लेखनादिकंकृत्वाज्यभागांतमाचरेत् होमस्यैशानदिग्भागेधान्योपरिशुभंघटं पंच
गव्यघटेस्थाप्यतिलांस्तत्रविनिक्षिपेत् क्षीरद्रुमकषायांश्चपंचरत्नानिनिक्षिपेत् वस्त्रयुग्मेनसंछाद्यगंधादिभिरथार्चये
त् विष्णुवरुणाभ्यर्च्यप्रतिमांचविधानतः प्रतिमायस्मिण अग्नेतद्देवत्यहोमविधानात् चकाराच्च यत्तदृद्रादिभि
मंत्रैःकुंभस्यचाभिमंत्रयेत् दधिमध्वाज्ययुक्तेनहोमंकुर्याद्विधानतः आपोहिष्ठेतितिसृभिरस्तुमेसोमइत्यर्थे नद्वि
ष्णोःपरमंपदमसीभ्यांतेयसूक्ततः ऋग्भिरेभिःप्रत्यृचंचाष्टाविंशतिसंख्यया अष्टोत्तरशतंसंख्यंवादधिमध्वाज्यसंयु
तं दधिमध्वाज्येतिपुनर्ग्रहणात् आदित्यादिग्रहेभ्यश्चेति आदित्यादिग्रहाणांचहोमंकुर्यात्समंत्रकं इतिगोमुखप्रस
वविधिः अथप्रयोगः मासपक्षाद्युल्लिख्यास्यशिशोरमुकर्क्षोत्पत्तिसूचितारिष्टशांत्यर्थंगोमुखप्रसवंकरिष्यइत्युक्त्वा
गणेशपूजनाचार्यवरणंकुर्यात् आचार्योगोमयेनोपलिप्तगृहस्यैशानदिग्भागेश्वेताष्टदलगतव्रीहिस्थशूर्पेरक्तवस्त्रंप्र

ा·म·
५२

सार्पतिलान्विकीर्यतत्र प्राङ्मुखंदक्षिणादिग्गतपादंशिशुंसंस्थाप्यसूत्रेणावेष्ट्यगोमुखेसंयोज्यमुखात्प्रणवंविविंत्यविष्णु
र्योनिमितिसूक्तेनपंचगव्येनशिशुंसंस्नाप्यगवांमगोष्विति गोस्तत्स्नाविष्णोःश्रेष्ठेनेतिशिशुंगृहीत्वामात्रेदद्यात् मातागोमु
खप्रदेशाच्छिशुमानीयगोपृष्ठदेशेपित्रेदद्यात् पितात्वमात्रेदत्वाभूमौवस्त्रेसंस्थाप्यतन्मुखंदत्वापंचगव्येनापोहिष्ठेतितृचेनरं
मिषिंच्यागादंगादितित्रिमूर्ध्न्याघ्रायपुण्याहंवाचयित्वामामाचार्यायदत्वाग्रहप्रीत्यर्थंगोवस्त्रस्वर्णधान्यानिदत्वाभू
यसींदक्षिणांदद्यात् अथवाचार्योऽग्निंप्रतिष्ठाप्यचक्षुषीआज्येनेत्यंतेवरुणंआपोहिष्ठेतितृचेनअग्नेसोमंइत्यवाविष्णुन
र्हिसोरित्यवायस्महणामंसोम्यामितियहांश्चप्रत्यृचमष्टाविंशत्यष्टास्त्यतमसत्व्यपादघिमध्वाज्यैःशेषेणस्विष्टकृतमित्या
हुत्वाज्यभागांतंकृत्वाग्नेरीशान्यांकुंभंसंस्थाप्यतत्रपंचपल्लवानिसर्वौषधींक्षीरद्रुमकषायान्क्षिप्त्वावस्त्रयुग्मेनावेष्ट्यपूर्णपात्रो
परितद्विष्णोरितिविष्णोर्न्नुकंवीर्याणिप्रवोचमितिवरुणं स्याक्षीभ्यामितिपृष्टम्प्रतिमारभ्यर्च्य यमंइंद्रेतिपंचभर्गःप्रगायद्रुद्रोवी
हृतप्रगायच्छंदःजपेविनियोगःयतइंद्रेतिषडृचंचोतस्मान्वाधानक्रमेणहुत्वाकर्मशेषंसमापयेदितिगोमुखप्रसवप्रयो
गः अथसदंतोत्पत्ति विष्णुधर्मोत्तरे उपरिप्रथमंयस्यजायंतेचशिशोर्द्विजाः द्विजाःदंताःदंतैर्वासहयस्यस्याज्जन्मभा
र्गवसत्तम मातरंपितरंवाथखादेदात्मानमेवच तत्रशांतिंप्रवक्ष्यामितांमेनिगदतःशृणु गजपृष्ठगतंबालंनौस्थंवापि

पयेद्द्विज नदभावेवसर्वज्ञकांचनेचवरासने सर्वौषधैःसर्ववीजैःसर्वपुष्पैःफलैस्तथा पंचगव्येनरत्नैश्चमृत्तिकाभिश्चभर्गव सु
र्वौषधानिसर्वगंधाश्चविनायकस्नपनविधौदर्शिताः स्थालीपाकेनधातारंपूजयेत्तदनंतरं सप्ताहंचात्रकर्तव्यंततोब्राह्मणभो
जनं अष्टमेहनिविप्राणांतथादेयाचदक्षिणाः कांचनंरजतंगाश्चभुवमागारमेवच दंतजन्मनिसामान्येशृणुस्नानमतःपरं
भद्रासनेनिवेश्यैनंमूर्ध्निमूलैःफलैस्तथा सर्वौषधैःसर्वगंधैःसर्ववीजैस्तथैवच स्नापयेत्पूजयेच्चात्रवन्हिंसोमंसमीरणं प
र्वतांश्चतथाख्यातान् देवदेवंचकेशवं एतेषामेवजुहुयात्घृतमग्नौयथाविधि ब्राह्मणानांतुदातव्यायथाशक्त्यातुदक्षि
णा तत्रस्वलंकृतंबालंमासनेचोपवेशयेत् आसीनसूर्पसंतानवीजैःसुस्नापयत्ततःसविप्रवालकानांवत्तैश्चकार्यंचपू
जनं पूज्यश्चविधिनाचार्योब्राह्मणाःसुहृदःस्तथा इतिसदंतोत्पत्तिशांतिः अथकृष्णचतुर्दशीजननशांतिः गर्गः कृष्ण
पक्षेचतुर्दश्यांप्रसूतेस्तद्विधेःफलं चतुर्दशींचषड्भागांकुर्यादाद्यशुभंमतं द्वितीयेपितरंहंतितृतीयेमातरंस्मृतं चतुर्थेमा
तुलंहंतिपंचमेवंशनाशनं षष्ठेतुधनहानिःस्यादात्मनोवंशनाशनं तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः आचार्यंव
रयेद्धीमान्सुत्रसारसमन्वितं स्वकर्मनिरतंशांतंश्रोत्रियंवेदपारगं सर्वालंकारसंयुक्तंसर्वलक्षणसंयुतं वृषभेचसमासीनं
वरदानपपाणिनं शुद्धस्फटिकसंकाशंश्वेतमाल्यांवरावृतं त्र्यंबकेनचमंत्रेणपूजांकुर्याद्विधानतः स्थापयेच्चतुरःकुंभ

न् चतुर्दिक्षु यथाक्रमं पुण्यतीर्थजलोपेतान् धान्यस्योपरि विन्यसेत् तन्मध्ये स्थापयेत्कुंभं ह्यातच्छिद्रसमन्वितं पंचमृत्सं
चरत्नानि पंचत्वक्पंचपल्लवान् पंचधान्यं सुवर्णं च तत्तन्मंत्रैर्विनिक्षिपेत् सर्वौषधानि निक्षिप्य श्वेतवस्त्रेणावेष्टयेत्॥
सुरभीणि च पुष्पाणि श्वेतानि परिवेष्टयेत् सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आयांतु यजमानस्य दुरितक्षयका
काः आवाह्य वारुणैर्मंत्रैरनेन विधिना ततः इमं मे वरुणेत्यनया तत्त्वायामि ऋचा तथा त्वन्नो अग्न इत्यनया सत्वन्न इति मं
त्रतः आग्नेयकुंभमारभ्य पूजां कुर्याद्यथाक्रमं आनो भद्रा इत्यसूक्तं च भद्रा अग्नेश्च सूक्ततः जप्त्वा तु पौरुषं सूक्तं कद्रुद्रं तु क्रमा
ज्जपेत् ईश्वरस्याभिषेकं च ग्रहपूजां समाचरेत् पूजाकर्म सुनिर्वर्त्य होमं कुर्याद्विधानतः गृहादीशानदिग्भागे कुंडं कुर्या
द्विधानतः विस्तारायामखातं च अरत्निद्वयसंमितं समिदाज्यचरूंश्चैव तिलमाषांश्च सर्षपैः अश्वत्थप्लक्षपालाशास
मिद्भिः खादिरैः शुभैः अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा अष्टाविंशतिमेतैश्च होमं कुर्यात्पृथक्पृथक् त्र्यंबकेनं
च मंत्रेण तिलाव्याहृतिभिः पृथक् कृत्वा होमांश्च कर्तव्या अस्मदुक्तविधानतः एवं क्रमेण कर्तव्यं होमशेषं समापयेत् स
र्वालंकारयुक्तानां त्रयाणामभिषेचनं त्रयाणां मातापितृशिशूनां चतुर्भिः कलशैरद्भिर्द्वहत्कुंभसमन्वितं धौतांबरेणाच्छ
द्याथ कुर्यादाज्यावलोकनं पूर्णाहुतिं च जुहुयाद्यजमानः समाहितः तत्सर्वं परया भक्त्या ईश्वराय निवेदयेत् सर्वालंकारसंयु

कां धेनुं सांगां पयस्विनीं प्रतिमां वस्त्रयुग्मं च आचार्याय निवेदयेत् अन्येषां चैव सर्वेषां कुर्याद्ब्राह्मणवाचनं तस्मादेतेन विधि
ना वित्तशाठ्यविवर्जितः एवं यः कुरुते शांतिं सर्वपापैः प्रमुच्यते सर्वान्कामानवाप्नोति स्थिरजीवी सुखी भवेत् इतिकृष्णच
तुर्दशीशांतिः अथ सिनीवालीकुहूशांतिः गार्ग्यः सिनीवाल्यां प्रसूतास्यात्तस्य भार्या पशुस्तथा गजाश्वमहिषी चैव शक्र
स्यापि श्रियं हरेत् ये संति सकलाः पश्चात्तत्प्रसादोपजीविनः वर्जयेत्तानशेषांस्तु पशुपक्षिमृगादिकान् कुहूप्रसूतिरत्यर्थं सर्व
दोषकरी स्मृता यस्य प्रसूतिरेतेषां तस्यायुर्धननाशने सर्वं गंडसमस्तं च दोषस्तु प्रबलो भवेत् शांतिं विना विशेषेण परि
त्यागो विधीयते परित्यागात्तत्र शांतिं कुर्याद्धीमान् विचक्षणः परित्यागादिति त्यक्त्वा लोपे पंचमी परित्यागं कृत्वेत्यर्थः तत्का
लं तत्क्षणाद्धैनं पुनरेवानुपालने न सजेत्पंडितो मोहाद्दर्थाद्वा ज्ञानतोऽपि वा तद्योगान्नाशयेत्किंचित्स्वपर्वानामभ्युते क
लोकशांतिः कर्तव्या सर्वदोषापनुत्तये रुद्रः शक्रश्च पितरः पूज्यास्तु देवताः क्रमात् कर्षमात्रसुवर्णेन तदर्धार्धेन वा पुनः
अथवा शक्तितः कुर्याद्वित्तशाठ्यविवर्जितः प्रतिमां कारयेत्कुंभोश्चतुर्भुजसमन्विता त्रिशूलखड्गवरदाभयहस्ता यथा
क्रमं श्वेतवर्णाः श्वेतपुष्पा श्वेतांबरवृषस्थिता त्र्यंबकेन मंत्रेण पूजां कुर्याद्यथाविधि इंद्रश्चतुर्भुजो वज्रांकुशपाशायः
सशायकः रक्तवर्णो गजारूढो यत इंद्रेति मंत्रतः पितरः कृष्णवर्णाश्च वतुर्हंसा विमानगाः गदाक्षसूत्रकमंडलभय

स्येवधारिणः येरुत्साइतिमंत्रेणपूजांकुर्यादनंतरं आग्नेयींदिशमारभ्यकुंभान्कोणेषुविन्यसेत् येरुत्सासोहविरंदंतइ
सादिमंत्रऋग्वेदेप्रसिद्धः तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसमन्वितं निक्षिपेत्पंचगव्यादीन्तन्मंत्रैश्चनिक्षिपेत् कल्पो
क्तशांतिः कर्तव्याकुर्याच्छीघ्रंस्वशक्तितः गोदानंवस्त्रदानंचसुवर्णंचोर्वरांशुभां दशदानिचोक्तानिक्षीरमाज्यंगुडंतथा
आज्यावेक्षणयानारीतत्तन्मंत्रैश्चकारयेत् समिदाज्यंचहोमंचतिलहोमंचसर्षपैः अश्वत्थप्लक्षपालाशसमिद्भिः खा
दिरैःशुभैः अष्टोत्तरशतंसुम्यप्रत्येकंजुहुयाद्द्विजः त्र्यंबकेनमंत्रेणतिलान्व्याहृतिभिःपुनः चतुर्भिःकलशैर्युक्तंरु
द्रकुंभसमन्वितं शांतिवत्सकलंकार्यंअभिषेकंचकारयेत् शांतिवपूर्वोक्तशांतिवत् पितृमातृशिशूनांचअभिषिंचेच्च
वारुणैः शंकरस्याभिषेकंचकुर्याद्ब्राह्मणभोजनं अन्येषांचैवसर्वेषांब्राह्मणानांचतर्पणं यथाशक्त्यानुसारेणद्विजवाक्य
पूर्वकं अथप्रयोगः तत्रचतुर्दश्याःषडंशेषुद्वितीयतृतीयषष्ठांशेषुजन्मचेत् गोप्रसवोपिकार्यः कर्तामासपक्षाद्युल्लि
ख्यास्यशिशोश्चतुर्दश्याद्यभागादिषुसिनीवालीकुह्वोर्वोत्पत्त्यासूचितस्यानिष्टस्यनिरासार्थंशांतिंकरिष्यइतिसंकल्प्या
गणेशपूजास्वस्तिवाचनमातृपूजावृद्धिश्राद्धाचार्यादिवरणानिकुर्यात् ततः आचार्यःसर्षपविकिरणादिकृत्वापीठादौ
वरदाभयहस्तंवृषभस्थंहैमीरुद्रप्रतिमांत्र्यंबकमंत्रेणसंपूजयेत् सिनीवालीकुह्वोस्तुरुद्रेंद्रपितरः तत्ररुद्रईशानोर्ध्वं

करक्रमात्त्रिशूलखड्गवरदाभयहस्तोवृषस्थस्त्र्यंबकमंत्रेणइंद्रोवज्रांकुशधनुःशरकरऐरावतगजस्थोपतद्इंद्रइतिमंत्रेणपितरः
कृष्णवर्णागदाक्षसूत्रकमंडलभयकराविमानस्थायेसत्यासइतिमंत्रेस्थापयेत् पूज्याइति विशेषः ततः तस्याःप्राचीमीशान्य
मुदीच्यांवाआग्नेयादिषुचतुरःकुंभान्मध्येचशतच्छिद्रंसंस्थाप्यतेषुपंचमृदः पंचरत्नपंचत्वक् पंचपल्लवधान्यानिसुवर्णंसर्वौ
षधीश्चक्षिप्त्वाअन्येनवस्त्रपुष्पमालाभिरावेष्ट्यसर्वेसमुद्राइत्यभिमृश्यइमंमेवरुणतत्त्वायामित्वन्नोअग्नेसत्वन्नइतिक्रमेण
वरुणमावाह्यसंपूज्यक्रमेणआनोभद्राअग्नेसहस्रशीर्षाकद्रुद्रायेतिसूक्तानिजपित्वायथाशक्तिरुद्राध्यायादिनाभिषिं
च्यग्रहाणावाह्यसंपूज्यगृहेशान्यामग्निंसंस्थाप्यान्वादध्यात् तत्रचक्षुषीआज्येनेत्यंतेचतुर्दशीशांतौरुद्रमश्वत्थप्लक्षपा
लाशखदिरसमिद्भिराज्यचरुतिलमाषसर्षपैःप्रत्येकममुकसंख्ययाव्यस्तसमस्तव्याहृतिभिस्तिलैश्चामुकसंख्य
यायक्ष्यइत्यादिशिनीवालींकुह्वींचरुद्रइंद्रपितरश्चप्रधानदेवताःत्र्यंबकमंत्रेणचशक्तितस्तिलहोमोधिकःइति
विशेषः ततआज्यभागांतेअन्वाधानक्रमेणहोमःसिनीवालीकुह्वोस्तुगोवस्त्रसुवर्णभूक्षीराज्यगुडान्दत्वागोभूतिल
हिरण्याज्यवस्त्रधान्यगुडरूप्यलवणदानानिचदशकृत्वाहोमःकार्यइतिविशेषः ततोबलिदानांतेकलशोदकैःशत
च्छिद्रेणाद्वैवत्यमंत्रैरभिषिक्तःपत्नीशिशुसहितोयजमानःआज्यमवेक्ष्यपूर्णाहुतिंहुत्वागुरवेधेनुंवासोयुग्मंच्च(?)त्विग्भ्य

ा·भ श्वदक्षिणांचदत्वास्वस्तिवाच्यकर्मेश्वरार्पणंकुर्यादितिचतुर्दशीसिनीवालीकुहूशांतिप्रयोगः अथदर्शजननशांतिः नार
५५ दः अथातोदरिद्रता तद्दोषपरिहाराणशांतिंवक्ष्यामिनारदः पुण्याहंवाचयित्वादौकृतुसंकल्पपूर्वकं कुंडवामंडलंकुर्या
न्देशेस्थापयेद्बुद्धे मंडलेस्थंडिलेतत्कुंभेनिक्षिपेद्बुधंदधिक्षीरघृतादिकं न्यग्रोधोदुंबराश्वत्थाःसचूताःप्लक्षकास्तथा॥
एतेषांवृक्षमूलनांत्वचादीन्पल्लवांस्तथा पंचरत्नानिनिक्षिप्यवस्त्रयुग्मेनवेष्टयेत् सर्वेसमुद्राःसरितस्तीर्थानिजलदा
नदाः आयांतुयजमानस्यदुरितक्षयकारकाः आयोहिष्ठात्वेनाथकयानश्चित्रइत्यृचा यत्किंचेदमृताचैवसमुद्रज्येष्ठइ
त्यृचा अभिमंत्र्योदकंपश्चादग्नेःपूर्वप्रदेशके हारिद्रंरक्तकंचैवकृष्णश्वेतंचजीरकं एतेषांतंदुलैश्चैवसर्वतोभद्रमुद्धरेत्
दर्शस्यदेवतापश्चात्सोमसूर्यस्वरूपकं प्रतिमांस्वर्णजांनित्यंराजतींताम्रजांतथा सर्वतोभद्रमध्येतुस्थापयेद्दर्शदेवता
ग्रहवर्णंवस्त्रयुग्मंतद्दुर्गागंधपुष्पकं आप्यायस्वेतिमंत्रेणसवितापश्चात्तथैवच उपचारैःसमाराध्यततोहोमंसमा
चरेत् कृत्वावह्निंप्रतिष्ठाप्यकृतुसंकल्पमीदृशं आयुरारोग्यसिध्यर्थंसर्वारिष्टप्रशांतये पुत्रस्यदोषजननदोषनि
हरणायचामातापित्रोःकुमारस्यसर्वारिष्टप्रशांतये तेषामायुःश्रियंचैवशांतिहोमंकरोम्यहं समिधश्चचरुद्रव्यं
क्रमेणजुहुयात्कृती हुनेत्सवित्रिमंत्रेणसोमोधेनुवमंत्रतः एतैर्मंत्रैश्चप्रत्येकंहुनेदष्टोत्तरंशतं दर्शस्यदेवताहोम

मष्टाविंशतिसंख्यया सवित्रिमंत्रत्वाकृस्नेनेति अत्रैतैरितिवहुवचनंदर्शदेवतामंत्राभिप्रायेण होममेवंतुकृत्वातुकु
र्याद्वाराभिषेचनं श्रीसूक्तमापुण्यसूक्तंसमुद्रज्येष्ठइत्यृचा एतैर्मंत्रैरभिषेकंमातापित्रोःशिशोस्तथा ततःस्विष्टकृतंद
याद्धोमशेषंसमाचरेत् हिरण्यंरजतंचैवकृष्णांधेनुंसदक्षिणां अन्येभ्योपियथाशक्त्यादातव्यादक्षिणातथा ब्राह्मण
भोजयेदत्रकारयेत्स्वस्तिवाचनं इतिदर्शजननशांतिः अत्रसिनीवालीकुह्वोर्दर्शेचोक्तयोःशांत्योर्व्यवस्थोक्तानंदेभाप
रिशिष्टभाष्ये चतुर्दश्यांश्चसोमापाश्चाष्टौइतिनवप्रहराश्चंद्रक्षयकालः चतुर्दश्यष्टमेयामेक्षीणोभवतिचंद्रमा अमावा
स्याष्टमेभागेपुनःकिलभवेदणुरितिवाक्यात् अत्रेंदुराद्येप्रहरेवतिष्ठतेचतुर्थभागेनकलावशिष्टः तदंतमेवक्षयमेतिकृत्स्न
मेवंज्योतिश्चक्रविदोवदंतीतिवाक्यात् एवंचतुर्दश्यामंत्यायामेवोरणुश्चंद्रः शास्त्रचक्षुषोगोचरीभवतीसकालोदृष्टचंद्र
त्वात्सिनीवाली अमावास्यायाःसप्तमयोःशास्त्रचक्षुषोरगोचरोइतिक्षीणश्चंद्रः सकालःकुहूर्मध्यमाःपंचयामादर्शइतिव्य
वस्थाप्रशांतिव्यवस्थेति परेतुचतुर्दशीमात्रयुक्तेहोरात्रेवर्तिन्यमासिनीवाली प्रतिपन्मात्रयुतेतुकुहूःचान्यस्पर्शिम
ध्यमाहोरात्रावर्त्तिन्यमादर्शः तस्मिंश्चतुर्दशीप्रतिपदोरभावेनोभयलक्षणानाक्रांतत्वात् तथावमवतीचामादर्शःकेवलचतुर्द
शीकेवलप्रतिपद्युक्तत्वाभावात् अतस्त्रिस्पर्शिन्यामवमवत्यांवासिनीवालीकुहूशांतिप्राप्त्यभावात् दर्शशांतिप्राप्तिरितियुक्त

माहुः अथदर्शजननशांतिप्रयोगः कर्तास्यकुमारस्यकुमार्यावादर्शजन्मसूचितानिष्टनिवृत्त्यर्थं शांतिंकरिष्यइतिसंकल्प्य गणेश
पूजास्वस्तिवाचनाचार्यादिवरणानिकुर्यात् अथाचार्यः सर्षपविकिरणप्रोक्षणादिकृत्वा शुद्धभूमौजलपूर्णपंचगव्यपल्लव
त्वकरत्नयुक्तंवासोयुग्मवेष्टितंकुंभंधान्योपरिसंस्थाप्यसर्वेसमुद्राइतितीर्थान्यावाह्यापोहिष्ठेतितृचेनकेपानश्विनइति
ऋचायत्किंचेदमित्यृचासमुद्रज्येष्ठाइतितृचेनमंभिमंत्र्यतन्नैऋत्यदेशेपंचरंगरंजितैस्तंडुलैः सर्वतोभद्रंकृत्वातत्रस्वर्ण
प्रतिमायांयेसत्यासइतिपितृन्नद्दक्षिणेरूप्यप्रतिमायामाप्यायस्वेतिसोमंतदुत्तरेताम्रप्रतिमायांसवितापश्चादितिसूर्यंचावा
ह्यसंपूज्यआयुरारोग्यसिध्यर्थंसर्वारिष्टप्रशांतये पुत्रस्यदर्शजननदोषनिर्हरणायचमातापित्रोः कुमारस्यसर्वारिष्टप्र
शांतये तेषामायुः श्रियंचैवशांतिहोमकरोम्यहं इतिउक्त्वा तत्पश्चिमेकुंडेस्थंडिलेवाग्निंप्रतिष्ठाप्यतदीशान्यांग्रहा
न्संपूज्यान्वाधानेआघारावाज्येनेत्युक्त्वापितृन्समिच्चरुभ्यामष्टाविंशतिवारंसोमंसूर्यंचाष्टोत्तरशतवारंशेषेनेत्याज्यभा
गांतेन्वाधानक्रमेणपूजामंत्रैर्हुत्वामातापित्रोःशिशुनिर्हिरणपवर्णामितिचन्वदर्शवेन आयुष्यंचर्वसमितिदर्शवेनस
मुद्रज्येष्ठाइत्यृचाचजलधारयाभिषिच्यस्विष्टकृदादिसमापयेत् यजमानोबलिदानपूर्णाहुत्यंतेहेमरूप्यकृष्णधेनु
रत्वार्यायऋत्विग्भ्यश्चयथाशक्तिदक्षिणांदत्वाविप्रान्संपूज्यस्वस्तिवाचनंकुर्यात् इतिदर्शशांतिः अथज्येष्ठाशांतिःवृद्ध

गार्ग्यः घटिकैकाचमेत्रांतेज्येष्ठादौघटिकाद्वयं तयोःसंधिरितिज्ञेयंशिशुगंडंसमीरितं प्रथमेचद्वितीयेचज्येष्ठर्क्षेचतृतीयके पा
दत्रयेजातनरोज्येष्ठोप्यत्रप्रजायते ज्येष्ठांत्यपादजातस्यपितुस्तस्यविनाशकः जायतेनात्रसंदेहोदशाहभ्यंतरेपिवा ज्येष्ठर्क्षे
कन्यकाजातांहंतिशीघ्रंधवायजं तच्छांतिंतस्यवक्ष्यामिगंडदोषप्रशांतये ।। शुदिनेशुभनक्षत्रेचंद्रताराबलान्विते स्व
स्त्यंतेतथाकुर्याज्ज्येष्ठाशांतिंविधानतः वज्रांकुशधरंदेवमैरावतगजान्वितं कुर्याच्छचीपतिंरम्यांदेवेंद्रंसुरनायकं ।।
कर्षमात्रसवर्णेनकर्षार्धेनाथवाततः तद्विधानंप्रकुर्वतिवित्तशाठ्यंनकारयेत् शालितंदुलसंपूर्णकुंभस्योपरिपूजयेत्
इंद्रायेंद्रोमरुत्वतइतिमंत्रेणवाग्यतः गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः पूजयेत्तुविधिनाविप्रलोकपालगणान्वितं
रक्तवस्त्रद्वयोपेतंपूजयेत्सुरनायकं तत्रसंस्थापयेत्कुंभांश्चतुर्दिक्षुविशेषतः तन्मध्येस्थापयेत्कुंभंशतछिद्रसमन्वि पुष्पो
दकसमायुक्तान्वस्त्रयुग्मेनवेष्टितान् कुंभेषुविन्यसेद्देसान्पंचगव्यसमंत्रकं पंचामृतंप्रवरत्नमृत्तिकाः पंचसंख्यया ।।
पंचवृक्षकषायांश्चपंचपल्लवकांस्तथा सुवर्णंकुशदूर्वाश्चशतौषधिविनिक्षिपेत् पूजयेद्वारुणैर्मंत्रैः कुंभान्धीमान्प्रय
त्नतः त्वन्नोअग्नेजपेदादौसत्वन्नोपिद्वितीयकं समुद्रज्येष्ठाइति इमंमेगंगेचतुर्थकं पूजयेद्ग्रहयुग्मार्येश्चतुरःकलशा
नपि जपंकुर्युःप्रयत्नेनमंत्रैरेभिर्द्विजोत्तमा आनोभद्राजपेचादौभद्राअग्नेद्वितीयकं तृतीयंपौरुषसूक्तंकद्रुद्रायचतु

 र्थकं आचार्यो मूलमंत्रेण जपं कुर्याद्विशेषतः ॥ इंद्रसूक्तं रुद्रजाप्यं जपन्मृत्युंजयं तथा इत्थं संपूज्य देवेशं वरुणं कुंभसंस्थितं
 सुसंकल्पविधानेन होमकर्म ततश्चरेत् समिद्भिर्बिल्ववृक्षस्य शतमष्टोत्तरं तथा सर्पिषा चरुणा चैव मूलमंत्रेण वाग्यतः ॥
हुनेज्जाप्यं च तेनैव यतइंद्र भयेति च तिलान्व्याहृतिभिर्हुत्वा शतमष्टोत्तरं तथा भार्याशिशुसमोपेतं यजमानं विशेषतः अभि
षेकं प्रकुर्वीत मंत्रैर्वारुणसंज्ञिकैः समुद्रज्येष्ठादिभिर्मंत्रैरिमं मे वरुणस्तथा घोषांतरिक्षादिभिर्मंत्रैरभिषेकं समाचरेत्
अभिषेके निवृत्तौ तु यजमानः समाहितः शुक्लांबराणि धृत्वाथ कृत्वा आज्यावलोकनं रूपेणवेति मंत्रेण चित्रेण चित्रं तच्च
क्षुरेव च देवतापुरतः स्थित्वा धूपदीपनिवेदनं दद्याच्चाचमनं सम्यक् कृत्वा पूजार्घ्यं तथैव च नमस्ते सुरनाथाय नमस्तुभ्यं शची
पते गृहाणार्घ्यं मया दत्तं गंडदोषप्रशांतये कार्यं तत्पूजकादीनां कारितं यत्फलं शुभं जप्त्वा तु तत्फलं सर्वं देवेंद्राय समर्पयेत्
आचार्याय च गां दद्यात् सुशीलां च पयस्विनीं रक्तवर्णां वस्त्रयुतां सर्वालंकारभूषितां वस्त्रयुग्माभिधानां च यथावित्तानुसा
तः यक्षगंधर्वसिद्धैश्च पूजितोसि शचीपते दानेनानेन देवेश गंडदोषं विनाशय अष्टोत्तरशतं संख्या कुर्याद्ब्राह्मणभोज
नं तेभ्योपि दक्षिणां दत्त्वा प्रत्यक्षमापयेत् इमां कृत्वा शांतिं ज्येष्ठायथाविधयुक्तमार्गतः गंडदोषं विनिर्जित्य आयुष्मान्
यतेनरः इत्युक्तं वृहद्गार्ग्येण शौनकाय विशेषतः ज्येष्ठानक्षत्रसंभूतगंडदोषप्रशांतये अज्ञानाद्वाथ ज्ञानाद्वा यैः कस्या

द्धाधनस्य च यन्न्यूनमतिरिक्तं वा ततः क्षंतुमर्हसि अथ प्रयोगः गोमुखप्रसवं कृत्वास्य शिशोः ज्येष्ठाजननसूचितस
कलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिं करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचननांदीश्राद्धाचार्य
ऋत्विक्चतुष्टयवरणानि कुर्यात् ततः आचार्यः सर्षपविकिरणभूमिप्रोक्षणं कृत्वा माहिषीरित्यादिविधिना शालित
डुलपूर्णकुंभं संस्थाप्य पूर्णपात्रोपरि हैमीमिंद्रप्रतिमां इंद्रायेंद्रो मरुत्वत इति मंत्रेण रक्तवस्त्रद्वयेगंधादिभिश्च वाग्यतः
पूजयेत् ततइंद्रभिन्नान् लोकपालान् समंतादावाह्य पूजयेत् ततः पूर्वादिदिक्षु चतुरः कुंभान्मध्ये शतच्छिद्रपुण्योदकवत्
स्त्रमाल्यादियुतं संस्थाप्य दिक्कुंभेषु पंचगव्यपंचामृतपंचरत्नपंचमृत्तिकापंचक्षकषायपंचपल्लवसुवर्णकुशदूर्वाः शतौष
धीश्च दत्वा पूर्वकलशे त्वन्नो अग्न इति सत्वन्नो अग्न इति दक्षिणे समुद्रज्येष्ठा इति पश्चिमे इमं मे गंगे इति उत्तरे वरुणमावाह्य
वस्त्रपुष्पाद्यैः पूजयेत् ततश्चत्वारो ऋत्विजः आनो भद्रा भद्रा अग्ने पुरुषसूक्तं कद्रुद्राय सूक्तानि जपेयुः आचार्योष्टशत
दिसंख्यया इंद्राय होमं कुर्यात् इति मूलमंत्रेण इंद्रं विश्वा अवीवृधन्नित्यष्टवं इंद्रसूक्तं रुद्रं मृत्युंजयं यथाशक्त्या जपेत् न
वापि ग्रहांश्च संस्थाप्यान्वादध्यात् तत्राग्नीषोमौ च सुषीश्च आज्येनेत्यंते अत्र प्रधानं इंद्रं पलाशसमिदाज्यचरुद्रव्यैरष्टश
तसंख्यया अष्टसहस्रसंख्यया वा इत्यनेन प्रजापतिं तिलद्रव्येणाष्टशतसंख्यया व्याहृतिभिः शेषेण स्विष्टकृतमित्यादि

वल्यंते पूर्णाहुतिं पूर्णपात्रदानं प्रणीताविमोकं च कृत्वा सभार्यं सशिशुं यजमानं वारुणैः सूक्तैः समुद्रज्येष्ठा इमं मे वरुण यो
वां तेस्मादिभिरभिषिंचेत् ततो रूपमिति आज्यमवलोक्य तत्पात्रं सदक्षिणं ब्राह्मणाय दत्वा इंद्रं संपूज्य नमस्ते सुरनाथाय न
मस्तुभ्यं शचीपते गृहाणार्घ्यं मया दत्तं गंडदोषप्रशांतये इत्यर्घ्यं दत्वा आचार्याय ऋत्विग्भ्यः श्रेयो गृहीत्वा इंद्राय समर्प्य
चार्घ्यं पंचपत्ति नीं गौरं चक्ष्वस्त्रद्वयं च दत्वा त पूजांते इंद्रं वि सर्ज्य प्रतिमां यक्षगंधर्वसिद्धैश्च पूजितो मित्रशचीपते दानेनाने
न देवेश गंडदोषप्रशांतये अज्ञानाद्वाथ ज्ञानाद्वा वैकल्याद्वा धनस्य च यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसीति मंत्रेण
दत्वा ऋत्विग्भ्यो यथाशक्ति दक्षिणां दत्वाग्निं विसृज्याष्ट शतं ब्राह्मणान्भोजयेत् अथ मूलशांतिः शौनकः अथातः संप्र
वक्ष्यामि मूलजातहिताय वै। मातापित्रोर्धनस्यापि कुलस्यापि हिताय च त्यागो वा मूलजातस्याद् दशाब्दाद्वा प्रदर्शने अ
भुक्तमूलजातानां परित्यागो विधीयते अदर्शनाद्वापि पितुः सतु तिष्ठेत्समाष्टकं एवं दुहितरि प्रोक्तं मूलजातां फलं बुधैः
कन्यायां तु विशेषः न वा लाहंति मूलर्क्षे मातरं पितरं तथा मूलजा श्वसुरं हंति व्यालजा तु तदंगना महेंद्रजाग्रजं हंति दे
वरं च द्विदेवजा व्याल आश्लेषा महेंद्र ज्येष्ठा द्विदैवं विशाखा शांतिर्वा पुष्कला चेत् स्यात्तर्हि दोषो न कश्चनेति मुख्यका
लं प्रवक्ष्यामि शांतिहोमं जपेत्ततः जातस्य द्वादशाहे वा जन्मर्क्षे वा शुभे दिने समाष्टके द्वादशाब्दे कुर्याच्छांतिं [illegible]॥

चदैव शांतिकं कुर्यात् कर्म तत्र प्रचक्ष्महे संस्कृते पुण्यदेशे तु मंडपं कारयेद्बुधः पुण्याहं मे च तैस्तोयैः प्रोक्षितायां क्षितौ ततः
तत्रोदकुंभं सुश्लक्ष्णं रक्तं व्रणविवर्जितं सुवर्तुलं च निर्मितं पूरयेन्निर्मलांभसा वस्त्रावगुंठितं कुर्यात्सूत्रेणैतौ च वारिणा। कुं
भं हेमसमायुक्तं चूतपल्लवसंयुतं स्वस्तिकोपरि विन्यस्य सक्षीरद्रुमपल्लवैः द्रोणव्रीहींश्च निक्षिप्य ईशाने च निधापयेत् प
चरत्नानि निक्षिप्य सर्वौषधिसमन्वितं अर्चितं गंधपुष्पाद्यैः श्रीरुद्रं च पृथक् जपेत् षडंगसहितं सम्यक् जपेद्वै रुद्रसंख्य
या वह्वृचा रुद्रसूक्तैर्वा छंदोगा रुद्रसामभिः सूक्तानि सामानि चत्रीण्येव कथिंजलव्याप्यात् एकादशाष्टत्रिषेक संख्यया ण
त्ति तो जपेत् तत्राप्रतिरथं सूक्तं शतरुद्रानुवाककं रुद्रानुवाकं तथा पुण्यं रक्षोघ्नं च रशान् जयेत् त्रैयंबकं जपेत्सम्यक् च्चष्टो
त्तरसहस्रकं एकवारं तथा चापि पावमानीः स्पृष्टान् जपेत् जपस्य पंचकुंभास्तु हृदयं रात दत्वा भतः श्रीरुद्रस्यैककुंभश्च सर्व
सूक्तानि तत्र तु तथान्यं च शुभं कुंभं पूर्वोक्तैर्लक्षणैर्युतं चतुः प्रश्रवणं कुर्यात्संचयं च त्कृतं तु वेत् अन्ये संप्रदायकोर्थः आ
दावस्येष कुंभाः एको रुद्रस्य तस्मिन् शतरुद्रीयं रुद्रसूक्तानि सामानि जप्यानि अभिषेकार्थं पंचकुंभाः तत्र पूर्वादिकुंभ चतु
ष्टये तत्राप्रतिरथमित्यादिना क्रमात्सूक्तचतुष्टयं विधिः मध्ये त्र्यंबकं मंत्रं पावमानीं जपेद्विधिः एवं पंचकुंभाः शतीचतुः प्र
स्रवणं एव द्वयमिति स्थलं तु रुद्रकुंभमादाय अत एव श्रीरुद्रस्येति श्लोकार्थेन रुद्रकुंभ एव पूर्वोक्तो द्वितीयस्तु पूर्णपात्रं च

तोचतुः प्रश्रवणएवतुपंचकुंभस्थानेविधीयते एवंपंचवक्त्रोत्तुनन्दिरितिपंचवक्त्रेतोतिरपिपंचकुंभस्थानान्यस्यापगच्छते वस्त्र
वगुंठितंकुर्यात्सूत्रयेत्तीर्थवारिणा पंचरत्नसमायुक्तमाम्रपल्लवसंयुतं गजाश्वरथ्यावल्मीकात्तेनसंगात्हृदगोकुलात् राजद्वा
रप्रदेशाच्चमृदमानीयनिक्षिपेत् कुंभस्यनैरृत्ये देशेहोमदेशंप्रकल्पयेत् गोमयालेपितेदेशेकुर्यात्स्थंडिलमुत्तमं कृत्वाग्नि
मुखपर्यंतमुल्लेखादिस्वशक्तितः पूर्णपात्रनिधानांतंकृत्वापूजांसमाचरेत् नक्षत्रदेवतास्तस्सुवर्णेनप्रयत्नतः निष्कमात्रे
णवार्द्धेनपादेनाथस्वशक्तितः प्रतिमांलक्षणोपेतांकारयित्वाविचक्षणः पद्मामूलंसुवर्णस्यस्थापयित्वाप्रपूजयेत् मूलंमूला
कारमूल्यमितिविचित्ताहः तदाप्रतिमामूल्यमित्यर्थः सुवर्णस्यवर्णस्यस्थापयित्वाप्रपूजयेत् सुवर्णसर्वदेवत्यंसर्व
देवत्यंसर्वदेवात्मकोनलः सर्वदेवात्मकोविप्रः सर्वदेवात्मकोहरिः संस्मरेन्निरृतिंशर्वासमुखनरवाहनं रक्षोधिपंखड्ग
हस्तंदिव्याभरणभूषितं प्रतिमापूजनार्थायवस्त्रयुग्मंप्रकल्पयेत् पंकजंकारयेद्भूमौरक्ताभिर्व्रीहितंडुलैः चतुर्विंशद्दलो
पेतंमुक्तैर्वाकर्णिकान्वितं तस्योपरिन्यसेत्पात्रंसौवर्णंरूप्यमृण्मयं शुद्धवस्त्रेणसंस्थाप्यतत्रमूलानिनिक्षिपेत् मूल
निद्रातमूलानितानिच स्वयमुत्पाटयेत्प्राज्ञोमूलानांचशतंपिता मंगल्याश्चपवित्राश्चओषध्यःकथयाम्यहं लक्ष्म
णाशतमूलाचशिरीषोवेतसस्तथा सहकाश्वेतमूलाचविष्णुक्रांतातथाशंखिनी सर्पाक्षीमीननेत्राचपुत्र[illegible]

पाल्लाशोविप्रकश्चैवरोचनाचंदनद्वयं कृष्णामांसीमुशीरंबालकंचतथामला गोजिव्हातुलसीदूर्वाशतपुष्पीसलांगली
ब्रह्मदंडीद्रोणपुष्पीप्रियंगुश्वेतसर्षपा पिप्पलीकाकजंघाचत्रायमाणाहुहूतथा ज्योतिष्मतीचगंधारीनिर्गुंधापूर्णकोशि
का भृंगक्षमासुभद्राचगुडूचीसेंद्रवारुणी अलंबुकारुदतीवकदलीकेतकीतथा गोक्षुरशतपर्वाचअरिष्टाकापराजि
ता छिन्नरुहाशतपत्रीनिकुंभाचसुवर्चला अश्वगंधाहस्तिकर्णीहरिद्राद्वितयंतथा उदुंबरोमधुकारश्चअश्वत्थोवकुल
स्ततथा नष्टक्षीरत्वपामार्गोमंदारश्चातिमुक्तकः मालतीस्वर्णपुष्पाचश्रीपर्णीश्रीफलंतथा दर्भमूलंकरवीरंमदयंतीवि
कंकतः पाटलासुरदारुश्चअर्धसूदनिकस्तथा फलमन्मथमूलस्यपलाशस्यचपल्लवाः रास्नानदीवृक्षमूलंसुरदारु॥
विदारिका श्वेतवीर्याश्वेतपाकानीलोत्पलंतथैवच नागकेशरमंदारीकुमारीचैवनिक्षिपेत् तीर्थांबुपंचगव्यंचगव्यंचसर्वौ
षध्यश्चकांचनं यथासंभवतोवापिग्राह्यंमूलशतंशुभं क्षीरत्वचासमेतंचशतछिद्रघटेन्यसेत् शतमूलाशतावरी वेतसो
वंजुलः सहकारसहदेवीचश्वेतमूलापुनर्नवा मीननेत्रामत्स्याक्षीपुत्रपाऐपुत्रजीवाः कृतांजलिनाह्याजोडाइति
प्रसिद्धाविल्वकोविल्वः चंदनद्वयेश्वेतपीतेच आमलाभूम्यामलकी गोजिव्हागजजीभीतिप्रसिद्धालांगलीकलिहारी
तिप्रसिद्धाब्रह्मदंडीअधःपुष्पाद्रोणपुष्पीकरंबुकः काकजंघाकाकांगी ज्योतिष्मतीमकंगुलागांधारीदेवगांधारीपूर्ण॥

कोशिकाकोशातकी मगधस्तमाशिग्रुः सुभद्रासारिका अलंबुकातुंबीशतपर्वावचा अरिष्टिकानागवल्लीछिन्नरुहापिंडगुडु
चो शतपत्राकमलिनी निकुंभादंतिभिदः सुवर्चलासूर्यभक्ता हस्तिकर्णएरंड उरुबुकः पीलुः मधुकारोमधुकः सर्जरवो
जकः अतिमुक्तकोमाधवी मालतीजाती स्वर्णपुष्पाकुशलीमदंतीपूथिकाः वैककः तश्रुवावृक्षः श्रीफलविल्वः आ
र्यस्रूरनिकापालकी मन्मथवृक्षः आम्रः सुरदारुदेवदारुः विदारिकामूष्माडी श्वेतवीर्यागिरिकर्णी श्वेतपाकागुंजा
रोमाणिप्रसिद्धानि विष्णुकांतासहदेवीतुलशीतुशतावरी मूलानिमानिगृह्णीयाच्छतालामेविशेषतः स्थापयेत्कर्णि
कामध्येवस्त्रगंधाद्यलंकृतंकूर्चहेमजलोपेतंकुंभमौषधीसंयुतं कुंभोपरिन्यसेद्विद्वान्मूलनक्षत्रदैवतं अधिप्रत्यधिदैवौ
चदक्षिणोत्तरदेशयोः अधिदेवंयजेदादौज्येष्ठानक्षत्रदैवतं उत्तराषाढऋक्षादि अनुराधांतमर्चयेत् इंद्रादीशानपर्यंतं
पूजयेत्स्वस्वनामतः स्वलिंगोक्तैश्चमंत्रैश्चप्रधानादीन्प्रपूजयेत् पंचामृतेनसंस्नाप्यआवाह्याथसमर्चयेत् उपचारैः षो
डषभिर्यद्वापंचोपचारकैः रक्तचंदनगंधाद्यैः पुष्पैः कुसुमसितादिभिः मेषशृंगादिधूपैश्चघृतदीपैस्तथैवच सुरापोलिक
मांसाद्यैर्नैवेद्यैरोदनादिभिः मत्स्यमांससुरादीनिब्राह्मणानांविवर्जयेत् सुरास्थानेप्रदातव्यंक्षीरंलवणमिश्रितं पाय
संलवणोपेतंमांसस्थानेप्रकल्पयेत् उक्तगंधाद्यलाभेतुयथालाभंसमर्चयेत् पुष्पांतंतुसमभ्यर्च्यहोमं[illegible]यथोदितं

निर्वापप्रोक्षणादीनिचरोः कुर्याद्यथाविधिः हविर्गृहीत्वाविधिवन्नैर्ऋत्यैवऋचाहुनेत् मोषुनः परापरेतिपतंदेवीतिवा
पुनः पायसंघृतसंमिश्रंहुनेदष्टोत्तरंशतं समिदाज्यचरून्हुत्वा यथाशक्तिश्चसंख्यया अधिदेवतयोश्चापिजुहुयात्त
त्स्वमंत्रतः चतुर्थ्यंतैर्नमोंतैश्चस्वाहांतैः स्वस्वमंत्रकैः नक्षत्रदेवताभ्यश्चपायसेनतुहोमयेत् कण्वेतिपंचदशा
भिर्जुहुयात्कपरेततः गायत्र्याजातवेदसेत्रियंबकमितिक्रमात् सीरांयुंजेतिताममिवासोभ्यस्तनिमेवच क्षेत्रस्यपति
नाम्रणानामग्निंदूतंतथैवच श्रीसूक्तेनतथाविद्वान् समिदाज्यचरूनुक्रमात् अष्टोत्तरशतैर्वापि अष्टाविंशतिभिः क्रमा
त् अष्टाष्टसंख्ययावापिजुहुयाच्छक्तितोबुधः त्वंनः सोमेतिजुहुयात्सायसंतुत्रयोदश चतुर्गृहीतमाज्यंचजातेरुद्रे
तिमंत्रतः स्रुवेणजुपादाज्यमहाव्याहृतिभिः क्रमात् हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्ताहुतीर्हुनेत् आचार्योयजमानो
वाअग्नौपूर्णाहुतिंहुनेत् समुद्रादितिसूक्तेनप्राजापत्यऋचातथा पूर्णादर्वीसप्ततेरणैः पूर्णाहुतिंहुनेत् होमशेषं
समाप्याथवन्हिमारोपयेद्बुधः कुंभाभिमंत्रणंकुर्याद्दक्षिणेनाभिमर्शयेत् मृत्युप्रशमनार्थायजपेत्रिपंचकंशतं रुद्रकुंभो
कमार्गेणरुद्रमंत्रंस्पृशंजपेत् धूपंदीपंचनैवेद्यंकुंभपुग्मेनिवेदयेत् प्रसादयेत्ततोदेवमभिषेकार्थमादरात् तस्मि
न्कालेगृहात्तिथ्यंकर्तंप्रभूतिमिच्छता पृथक्प्रयासंतेनैवनक्षत्रेष्वासहैवतु अभिषेकविधिंवक्ष्येपूर्वाचार्येरुदाहृतं

शां॰ स॰ भद्रासनोपविष्टस्य यजमानस्य ऋत्विजः दारपुत्रसमेतस्य कुर्युः सर्वेभिषेचनं अक्षीभ्यामिति सूक्तेन पावमानीभिरेवव
६१ आपोहिष्ठेति नवभिर्यन्तदुद्धद्वयेन च सहस्राक्ष ऋचेनापि देवस्यत्वेति मन्त्रकैः शिवसंकल्प मंत्रेणाप्याप्यमारोश्चमंत्र
कैः योसौ वज्रधरो देवो महेंद्रो गजवाहनः मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु योसौ शक्तिधरो देवो हुतभुक्
मेषवाहनः सप्तजिह्वः स देवोग्निर्मूलदोषं व्यपोहतु योसौ दंडधरो देवो धर्मो महिषवाहनः मूलजातशिशोर्दोषं व्य
पोहतु यमस्तथा योसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः योसौ पाशध
रो देवो वरुणश्च जलेश्वरः नक्रवाहः प्रचेता स्वो मूलोत्थं च व्यपोहतु योसौ देवो जगत्प्राणो मारुतो मृगवाहनः प्र
शामयतु मूलोत्थं दोषं गंडांतमूलकं योसौ निधिपतिर्देवो गदाभृन्नरवाहनः मातापित्रोः शिशोश्चैव मूलदोषं व्य
पोहतु योसौ पशुपतिर्देवो पिनाकी वृषवाहनः आश्लेषामूलगंडांतदोषमाशु व्यपोहतु ॥ विशेषः क्षेत्रपो देवः ॥
पिनाकी वृषवाहनः अश्लेषामूलगंडांतदोषमाशु व्यपोहतु सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदः नवयोरभिषे
कं तु सर्वदोषोपशांतिदः सर्वकामप्रदं दिव्यं मया ज्ञानां च मंगलं वस्त्रांतरितकुंभाभ्यां पश्चात्तु स्नपयेद्बुधः ततः शु
क्लांबरधरः शुक्लमाल्यानुलेपनः यजमानो दक्षिणाभिस्तोषयेदृत्विगादिकान् ॥ धेनुं पयस्विनीं दत्वा आचार्या

यसवत्सकां निर्ऋतिप्रतिमां वस्त्रं कुंभं हेम च दापयेत् ग्रहार्थवस्त्रप्रतिमां यद्दहोतृषु दापयेत् श्रीरुद्रजापिने देयः कलशोनड्वान् प्रय
लतः तत्कुंभवस्त्रप्रतिमास्तस्मै दद्यात्प्रयत्नतः इन्द्रादिभ्योपि विप्रेभ्यो शत्या दद्याच्च दक्षिणां उक्तालाभे ततो दद्यात् आचार्यब्रह्म
ऋत्विजः तत्तन्मूल्यं प्रदातव्यं ज्ञात्वा वाथ प्रदापयेत् आचार्याय च यद्दत्तं तदर्द्धं ब्रह्मणे भवेत् सदस्याय ब्रह्मणोर्द्धं ऋत्विग्भ्यश्च तद
र्द्धकं गृहीत्वा पादाशिषस्तेभ्यः प्रणम्याथ क्षमापयेत् दद्यादन्नं पायसादि ब्राह्मणान् भोजयेत्ततः अलाभे शांतिपंचाशद्दशाकं तत्र भ्रा
त्रतः सर्वशांतेश्च पठनं ब्राह्मणेराशिषस्तथा गृह्यसमायये हिप्राप्निर्ऋतिः प्रिपतमितिः विधाने वर्तितेस्मिंस्तु ततः शांतिर्भवेत्ध्रुवं गं
डांते चैवमेव स्यात्तु व्याघेखे वमेव तु समाष्टके द्वादशाहे कुर्यादै शांतिमादरात् अश्लेषाशांतावप्येवं विधिः मूलशांतिप्रकारेण कुं
भे निक्षिप्य पूजयेत् कुंभोपरिस्थपात्रे तु आश्लेषा प्रतिमा यजेत् मूलोक्तेन विधानेन कुंभयोरभिमंत्रणमित्यादिभिरतिदेशात् अ
श्लेषाप्रतिमा सर्पाख्या अथ मूलाश्लेषाशांत्योः प्रयोगः तत्रकर्ता उक्तकाले मासपक्षाद्युल्लिख्य ममास्य शिशोः कुमार्या वा मूलाद्य
पादादिष्वाश्लेषायां वा जन्म नासूचित पित्राद्यरिष्टशांत्यर्थं शांतिकरिष्ये इत्युक्त्वा गणेशपूजनं स्वस्तिवाचनं मातृकापूजाभ्युदयिका
दिकृत्वाचार्य ब्रह्मसदस्यान् ऋत्विजश्चाष्टौ षट् चतुरो वा वृत्वा यथाविभवमर्चयेत् अथाचार्यश्चाचार्यकर्म करिष्य इति संकल्पः यद
त्र संस्थितमिति सर्षपान्विकीर्य आपोहिष्ठेत्यादिभिर्भुवं प्रोक्ष्येशान्यां महीद्यौरिति स्थलं आओषधयः समिति द्रोणपरिमितव्रीह्यादिभि

मितिगंधं ॐ षधीरितिौषधीरोषधयः संमितियवान् कांडादितिदूर्वा अश्वत्थेवइतिपंचपल्लवान् रुचनोभिमइति
पंचत्वचः स्योनापृथिवीतिसप्तमृदोयाः फलिनीरितिफलंसहिरण्यानोतिपंचरत्नानिहिरण्यरूपइतिहिरण्यं गायत्र्यां
गोमूत्रं पुनर्मनेतिगोमयमाप्यायस्वेतिपयः दधिक्राव्णइतिदधितेजोसीत्याज्यंदेवस्यत्वेतिकौशकूर्चंमधुवातेतिमधुस्वा
दुरितिशर्करांक्षिप्त्वायुवासुवासाइतिवस्त्रेणसूत्रेणवाकुंभकंठमावेष्ट्यपूर्णादर्वीनिपूर्णपात्रेणपिधायततः प्रागुदग्वाचतु
र्दिक्षुचतुरःकुंभान्मध्येचैकंप्रत्येकुंमंत्राहत्त्यापदार्थानुसमयेनजपार्थंसंस्थाप्यरौद्रकुंभेसौवर्णप्रतिमायांत्र्यंबकंवसिष्ठोरु
द्रोनुष्टुप्रुद्रावाहनेविनियोगः त्र्यंबकमितिरुद्रमावाह्यपूजयेत् ततरुद्रकुंभस्पृष्ट्वैकर्त्विक् याजुषश्चेद्रुद्रैकादशिनीं
ह्वृचश्चेत्रीणिरुद्रसूक्तानिछंदोगश्चेद्रुद्रसामानिजपेत् सूक्तसाम्नाज्यामकद्विऋग्ष्टैकादशावृत्ति शक्तितोज्ञेया कद्रुद्रा
येतिनवर्चस्यघोरकण्वोरुद्रोगायत्रीजपेत् २ इमापरुद्रायतवसेइत्येकादशर्चस्यकुत्सोरुद्रो आद्यानवजगत्योत्यत्रिष्टुभौ
आतेपितरितिपंचदशर्चस्यगृत्समदोरुद्रस्त्रिष्टुप्जपेविनियोगः सामानितुआवोराजानंवामदेवोरुद्रस्त्रिष्टुप्तमुष्टुहिभ
मीत्रीरुद्रस्त्रिष्टुप्भुवनस्यपतिमृजिश्वारुद्रस्त्रिष्टुप्जपेविनियोगः ततोन्यस्पऋत्विक्नपार्थंकुंभयंचकेप्राक्क्रमेणजपे
त् आशुःशिशानोइतित्रयोदशर्चस्यैंद्रोप्रतिरथऋषिरिंद्रोदेवताचतुर्थ्याबृहस्पतिस्त्रिष्टुप्अंत्यानुष्टुप्जपेविनियोगः द

क्षिणे त्वमग्ने त्वमग्नेरुद्रइत्यनुवाकस्यहव्यवाहऋषिः अग्न्यात्मारुद्रोजगतीजपे० पश्चिमेरक्षाणोअग्नइत्यस्यवामदेवो
ग्निस्त्रिष्टुप्जपेवि० उत्तरेरक्षोहणमितिपंचविंशत्यांगिरसः वायुरग्निस्त्रिष्टुप् ततोमध्यकुंभेजपेत् त्र्यंबकंवसिष्ठोरु
द्रोनुष्टुप् अत्रैवपावमानमपिसकृज्जपेत् एवषट्कुंभासत्कोरुद्रकुंभचतुःप्रस्रवणेचेतिकुंभद्वयंसंस्थाप्यरुद्रैकादश्यन्या
दिरुद्रकुंभेजपित्वा प्रतिरथ्यादीनिचत्वारिप्रस्रवणेषुत्र्यंबकमंत्रंपावमानीश्चमध्यमुखेजपेत् अथाचार्योरुद्रकुंभाग्नेर्नै
ऋत्यांस्थंडिलेग्निंप्रतिष्ठाप्य तदीशान्यांनवग्रहस्थापनंकृत्वान्वादध्यात् तद्यथा समिधद्वयमादायास्मिन्मूलशांतौदेवता
परिग्रहार्थंअन्वाधास्ये ॥१॥ स्मिनन्वाहितेग्नौइत्यादिचक्षुषी आज्येनेत्यं तमुक्तानवग्रहानधिदेवताप्रत्यधिदेवतालोक
पालान्विनायकादींश्चप्रत्येकममुकसंख्ययासमिच्चर्वाज्यैर्निऋतिंप्रतिद्रव्यमष्टोत्तरशतसंख्यायैंद्रमपश्चप्रत्येकमष्टाविंश
तिसंख्याभिघृताक्तपायससमिदाज्यचरुभिर्विश्वेदेवाद्याश्चतुर्विंशतिऋक्षदेवतासापाश्चरुद्रजापिनेकल्पस्पृष्टंधेन्वाद्यलाभे
तन्मूल्यंवादत्वास्वशक्त्याऋत्विग्भ्योदक्षिणांभूयसींदत्वोत्तरपूजांकृत्वापांत्विति विसृज्याचार्योपनिर्ऋतिग्रहप्रतिमाकुंभा
दिरुद्रजापिनेरुद्रप्रतिमांकुंभादिसंकल्पपूर्वकंदत्वाग्निंसमभ्यर्च्यगच्छगच्छेतिविसृज्यशांतंतदर्थंदशावाब्राह्मणानभोजयि
त्वाशांत्याशीर्वाचयित्वापस्यस्मृत्यैत्तुम्कासस्वजनोभुंजीतः इतिभट्टनीलकंठकृतभास्करेशांतिमयूखेमूलाश्ले शांतिप्रयो

गः अथवैधृतव्यतीपातसंक्रांतिशांतयः शौनकः कुमारजन्मकालेतुव्यतीपातश्चवैधृतौ संक्रमश्चरवेस्तत्रजातोदारिद्य
कारकः दरिद्रताणीमहादुःखमाधिपीडासमुद्भवं अश्रियोमृत्युमाप्नोतिनात्रकार्याविचारणा स्त्रीणांचशोकदुःखंचसर्वेषा
शाकरमवेत् शांतिर्वापुष्कलाकार्यातस्यदोषोनकश्चन गोमुखप्रसवंकुर्याच्छांतिकुर्यात्प्रयत्नतः जपाभिषेकदानैश्च
होमादपिविशेषतः नवग्रहमखंकुर्यात्तस्यदोषोपशांतये प्रथमेगोमुखंजन्मततः शांतिसमारभेत् गृहस्यपूर्वदिग्भा
गेगोमयेनानुलिप्यच अलंकृतेसुदेशेतु व्रीहिराशिंप्रकल्पयेत् पंचद्रोणमितंधान्यंतदर्धंतंदुलेनच तदर्धंतुतिलैः
कुर्यादन्योपिपरिकल्पयेत् दुःखात्रितयराशौतुअष्टपत्रंलिखेद्बुधः पुण्याहंवाचयित्वातुआचार्यंवृणुयात्सुरा आचार
वंतंधर्मज्ञंकुलीनंचकुटुंबिनं मंत्रतत्वार्थतत्वज्ञंशांतिकर्मणिकोविदं पंचांगभूषणंदद्यात्सदवस्त्रांगुलीयकं राशौप्र
तिष्ठितंकुंभमव्रणंसमनोहरं तीर्थोदकेनसंपूर्णंसमृदौषधीपल्लवं सगंधगंधरत्नंचवस्त्रयुग्मेनवेष्टमुख्यमेव तत्रा
श्चतुर्विंशद्दलेषुप्रागादितोविश्वेदेवाः १ विष्णुः २ वसवः ३ वरुणः ४ अजैकपात् ५ अहिर्बुध्न्यः ६ पूषा ७ अश्विनौ
८ यमः ९ अग्निः १० प्रजापतिः ११ सोमः १२ रुद्रः १३ अदितिः १४ बृहस्पतिः १५ सर्पाः १६ पितरः १७ भगः १८ अर्यमा
१९ सविता २० त्वष्टा २१ वायु २२ इंद्राग्नी २३ मित्रः २४ इंद्रः २५ निर्ऋतिः २६ आपः अश्लेषाशांतौ २७ इत्येताश्चतुर्थ्यंतै

नमोंतैर्नामभिः क्रमेणावाह्यपूजयेत् आश्लेषाशांतौतुसर्पप्रतिमानमोस्तुसर्पेभ्यइत्यावाह्य सर्पोरक्तस्त्रिनेत्रश्चद्विभुजः
पीनवक्षकः फलकासिधरस्तीक्ष्णोदिव्याभरणभूषितइतिध्यात्वातद्दक्षिणतोबृहस्पतेअतत्यमदोबृहस्पतिस्त्रिष्टु
पइतिबृहस्पतिं नदुत्तरतश्चोदीरतामवरउदीरतांपराखस्वधात्रिष्टुबितिपितृनावाह्यचतुर्विंशतिदलेषुप्रागादितोभागे
यदित्येतत्र्क्षदेवता आवाह्यपूजयेत् ततोन्वाधानक्रमेणायायसंचरुछसरान् अपपित्वाज्यभागांतंकृत्वायजमानेनो
क्तसर्वदेवतोद्देशेनद्रव्येत्यक्ते सर्तिगन्वाधानक्रमेणार्क्षदेवताततन्मंत्रैर्हुत्वारक्षोहाघान्वक्ष्यमाणैर्भिर्जुहुयात् नाश्च
कृणुष्वेतिपंचदशर्चस्यवामदेवोरक्षोहात्रिष्टुप्कृणुष्व रहोमेविनियोगः एवंसर्वत्र गायत्र्या विश्वामित्रः सविता गायत्री
जातवेदसेकश्यपोदुर्गात्रिष्टुप् त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् सीराणुजंतिबुधक्रत्विकस्तुतिगायत्री नामग्निवर्णासौभरिदु
र्गात्रिष्टुप् वास्तोष्पतिवसिष्ठोवास्तोष्पतिस्त्रिष्टुप् अग्नेनयागस्त्योग्निस्त्रिष्टुप् क्षेत्रस्यवामदेवः क्षेत्रपालोनुष्टुप् गणाना
जमदग्निर्मित्रावरुणोगायत्री अग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्रीः हिरण्यवर्णामितिपंचदशर्चस्यकर्दमानंदचिक्लिते
दीराःसुताऋषयः श्रीदेवता आद्यास्त्रिष्टुभः तुर्याप्रस्तारपंक्तिः पंचमीषष्ठ्यौत्रिष्टुभौसप्ताष्टावनुष्टुभौत्याप्रस्तारपंक्तिः मस्तूचंस
मिदाज्यचरुहोमेविनियोगः त्वंनः सोमविश्वतोवयोधाइत्यस्यप्रगाथः सोम त्रिष्टुप्पायसहोमेवि० त्वंनः सोमविश्वतोर

क्षावजन्निति वा यत्ते रुद्रेति कश्यपो रुद्रः स्वराडनुष्टुप् चतुर्गृहीताज्यहोमे॰ सप्तमहाव्याहृतीनां विश्वामित्रादयऋषयोऽग्न्याद
यो देवता गायत्र्यादिनि छंदांसि आज्यहोमे॰ भूः भुवः स्वः महः जनः तपः सत्यं एवं हुत्वा स्विष्टकृदादि प्रायश्चित्तान्तं हुत्वा तं ह
त्वा लोकपालनवग्रहविनायकादिभ्यो निर्ऋतीन्द्रादिभ्यो रुद्रक्षेत्रपालयोश्च बलीन्दत्वा पूर्णाहुतिं जुहुयात् तत्र मंत्रः समुद्रादू
र्मिरित्येकादशर्चस्य वामदेव आद्यस्त्रिष्टुप् अंत्या जगती प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् पूर्णादर्वि विश्वेदेवाः पं
क्त्यनुष्टुप् सप्तते अग्ने सप्तवान् पिजगती पूर्णाहुतिहोमे वि॰ एवं सर्वत्र ततो होमशेषं समाप्य प्रधानकुंभदक्षिणतः स्थ
श्वा शतवारं त्र्यंबक मंत्रं जपित्वा तथैव रुद्रकुंभं च स्पृष्ट्वोक्तरीत्या रुद्रैकादशिन्यादि जपित्वा गंधादिभिः कुंभद्वयगतनि
र्ऋतिरुद्रावभ्यर्च्य ऋत्विगाचार्यः सर्वकुंभोदकैर्भद्रासनोपविष्टं सापत्यकलत्रं यजमानं अभिषिंचेत् तत्र मंत्राः अक्षीभ्यां
मिति षण्णां काश्यपो यक्ष्महानुष्टुप् अभिषेके वि॰ एवमुत्तरत्र पवस्व विश्वचर्षण इति त्रिर्शार्चस्य शांते वैखानसाः पवमानः सो
मो गायत्री आपो हिष्ठेति नवर्चस्याम्बरीषः सिंधुद्वीप आपो गायत्री अंतोद्वे त्रिष्टुभौ पंचमी वर्धमाना सप्तमी प्रतिष्ठा यत इंद्रे
ति द्वयोः सप्तऋषयो विश्वेदेवा अनुष्टुप् सहस्राक्षेति तृचस्य प्राजापत्यः यक्ष्मनाशनो यक्ष्महा त्रिष्टुप् द्वयोरंत्यानुष्टुप् देवस्य
त्वेति त्रिभिर्यजुर्भिश्च यज्जाग्रत इति षण्णां शिवसंकल्पमंत्राणां प्रजापतिर्भर्गस्त्रिष्टुप् योसौ वज्रधरो देवो महेंद्रो [illegible]वाहनः

मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु योसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः सप्तजिह्वश्च देवोग्निर्मूलदोषं व्यपोहतु॥
योसौ दंडधरो देवो धर्मो महिषवाहनः मूलजातशिशोर्दोषं व्यपोहतु यमो मम योसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः प्रशाम
यतु मूलोत्थं दोषं गंडांतसंभवं योसौ पाशधरो देवो वरुणश्च जलेश्वरः नक्रवाहः प्रचेता नो मूलोत्थाघं व्यपोहतु यसौ
देवो जगत्प्राणो मारुतो मृगवाहनः प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः योसौ निधिपतिर्देवो खड्गभृद्वाजिवाहनः
मातापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु योसौ पशुपतिर्देवः पिनाकी वृषवाहनः अश्लेषादोषगंडांतदोषमाशु व्यपह
तु विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः सर्वदुःखप्रशमनं सर्वे कुर्वंतु शांतिदाः आश्लेषार्शांतौ तु आश्लेशाऋ
क्षजातस्य मातापित्रोर्धनस्य च भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु योसौ वागीश्वरो नाम अधिदेवो बृहस्पतिः माता
पित्रोः शिशोश्चैव गंडांतं सव्यपोहतु पितरः सर्वभूतानां दोषं सर्वं व्यपोहतु सर्पनक्षत्रजातस्य वितं च ज्ञातिबांधवानित्यादि इति
विशेषः ततः तच्छंयोः शंयुर्विश्वेदेवाः शक्वरी अभिषेके ततो वस्त्रांतरितनिर्ऋतिरुद्रकुंभोदकेन स्नापितो यजमानो धृत
धौतवस्त्रो सापत्यकलत्रः कांस्यपात्रस्थाज्ये रूपं रूपमिति अवेक्ष्य विप्राय दत्वाचार्यादीन् अभ्यर्च्य आचार्याय गां ब्रह्मणे वृषं
सदस्याय श्वेताश्वं सखपापापसेन रक्षोहणं कृणुष्वेति पंचदशभिः कृणुष्व पाजोग्ने न सविता रं दुर्गा रुद्रं ऋत्विक् स्तुतिं वासो ष्यति अधि

क्षेत्राधिपतिं मित्रावरुणौ अग्निमेतान्यष्टसंख्यया कृशानेनाग्निं यं हिरण्यवर्णामिति पंचदशाभिः प्रत्यृचमष्टसंख्यया स
मिदाज्यचरुभिः सोमंत्रपोदशावारं पायसेन रुद्रं चतुर्गृहीतेनाज्येन अग्निं वायुं सूर्यं बृहस्पतिं वरुणमिंद्रं विश्वान्देवान् म
हाव्याहृतिराज्येन शेषेण स्विष्टकृतमित्यादि सद्योपक्षेप इत्येतमुक्त्वा समस्तव्याहृतिभिः सुमितद्वपमग्नावादध्यात् अ
श्लेषाशांतौ तु सर्पान् प्रधानदेवतामधिदेवतां बृहस्पतिं प्रत्यधिदेवतां पितॄन् भगाद्यदित्यंतर्क्षदेवताश्चेति विशेषः ततः प
रिसमूहनादि पूर्णपात्रनिधानांतं कृत्वाग्नेः प्रागुदग्वा रक्तैः शुक्लैर्वा तंदुलैश्चतुर्विंशद्दलं पद्मं कृत्वा तत्र प्रागवत् कुंभं सं
स्थाप्य तस्मिन् ओं षधीरिति शतमूलानि तदलाभे विष्णुक्रांता सहदेवी तुलसी शतावरी कुशमूलं निक्षिप्य पूर्णपात्रं नि
धाय तत्र साष्टदलं वा सौवित्तस्य तत्कर्णिकायां निष्कं तदर्धं तदर्धं मितां प्रतिमां निर्ऋतिं अग्न्युत्तारणपूर्वकं पंचामृत स्ना
पितां मोषु णो घोरः करावे निर्ऋति गायत्री मोषुण इति संस्थाप्य संस्मरेन्निर्ऋतिं श्यामं सुमुखं नरवाहनं रक्षोधिपं खड्गह
स्तं दिव्याभरणभूषितमिति ध्यात्वा तद्दक्षिणतः इंद्रं वो मधुच्छंदा इंद्रो गायत्री तोइंद्रस्य तद्युत्तरतश्चाप्युभेमेधातिथिरापो नु ष्टुवि
त्यपां च सौवर्णप्रतिमां संस्थाप्य पदार्थानुसमयेन स्वस्वमंत्रैः स्नापूजयेत् तत्र वस्त्रयुग्मं रक्तचंदनकुसुमपुष्पाणि मेषशृंगस्य
धूपः आज्यस्य दीपः पौलिकौदनादि नैवेद्यं ब्राह्मणानां सुरास्थाने सघृतमिश्रक्षीरं मांसस्थाने लवणमिश्रपायसं निपा...

तुयेत् तस्योपरि न्यसेत् पात्रं सूक्ष्मसव्रणेसंयुतं प्रतिमां स्थापयेद्विमान् साधिप्रत्यधिदेवतां चंद्रादित्याकृतौ पार्श्वे मध्ये वै ध्रुति
मर्चयेत् एवमेव व्यतिपाते शांतौ संक्रमणस्य च भानोर्ज्वरतो हृद्रमग्निदक्षिणतो यजेत् निष्कमात्रेण वार्धेन पादेनापि स्व
शक्तितः प्रतिमां कारयेद्धीमांस्ततश्छत्रसुलक्षितां प्रतिमां पूजनार्थाय वस्त्रयुग्मे निवेदयेत् अधिदेवो भवेत्सूर्यश्चंद्रः प्रत्यधि
देवता ततो व्याहृतिपूर्वेण तत्तन्मंत्रेण पूजयेत् त्रैयंबकेन रामंत्रेण प्रधानप्रतिमां यजेत् तत्सूर्यमिति मंत्रेण सूर्यपूजां समा
चरेत् आप्यायस्वेति मंत्रेण सोमपूजां समाचरेत् उपचारैः षोडशभिर्यद्वा पंचोपचारकैः अर्चितां गंधपुष्पाद्यैः फलेनैव घ समर्प
येत् मृत्युंजयेन मंत्रेण प्रधानप्रतिमां स्पृशेत् अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा अष्टाविंशतिवाथ पूजायां च स्व
शक्तितः सर्वसौरं प्रजप्याथ सौम्यं सोममंत्रतः आनो भद्रेति सूक्तं च भद्राग्ने च सूक्तकं जपेत् पौरुषं सूक्तं त्रैयंबकं ततः
परं कुंभस्य च चतुर्दिक्षु जपं कुर्युस्तथर्त्विजः कुंभस्य पश्चिमे देशे स्थंडिलेग्निं प्रकल्पयेत् स्वगृह्योक्तविधानेन कारयेत्संल
ग्नानलं त्रैयंबकेन मंत्रेण समिदाज्यचरून् हुनेत् अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तथा अष्टाविंशतिवा कुर्यात् स्वस्य शक्त्या
नुसारतः मृत्युंजयेन मंत्रेण तिलहोमं समाचरेत् ततः स्विष्टकृतं हुत्वा अभिषेकं तु कारयेत् समुद्रज्येष्ठा मंत्रेण आपो हि
ष्ठादृचेन च अक्षीभ्यामिति सूक्तेन पावमानीभिरेव च त्रैयंबकेन तत्सूर्यं आप्यायस्वेति मंत्रतः सुरास्त्वामिति मंत्रेण अभि

शां·म
६६

षेकं समाचरेत् सुरास्त्वामभिषिंचंतीत्यादिकोभिषेकमंत्रसमुदायोयुतहोमविधानेद्रष्टव्यः अभिषेकाप्लुतेवस्त्रमाचार्याया
निवेदयेत् श्वेतवस्त्रधरोभूत्वाभूषणैरलंकृतः यजमानः स्त्रियायुक्त आज्यावेक्षणमाचरेत् आचार्यंपूजयेत्पश्चाद्वस्त्रहे
मांगुलीयकैः गोदानेवस्त्रदानंचस्वर्णदानंविशेषतः तद्दोषपरिहाययाचार्यायप्रदापयेत् प्रछादनपरंदद्यात्ततःशांतिर्भवे
दिति जापकेभ्योब्राह्मणेभ्योदक्षिणाः प्रतिपादयेत् दीनांधकृपणेभ्यश्च प्रदद्याद्भूरिदक्षिणां ब्राह्मणान् शत
संख्याकान् मिष्टान्नैर्भोजयेच्चतान् बंधुभिःसहभुंजीतयथाविभवसारतः एवंयःकुरुतेमर्त्योनैवदुःखमवाप्नुया
त् आयुरारोग्यमैश्वर्यंमातापित्रोःशिशोरपि अथप्रयोगः कर्तागोमुखप्रसवंकृत्वामासपक्षाद्युल्लिख्यास्यशिशोर्वै
धृतिव्यतीपातसंक्रांत्यावाउत्पत्त्यासूचितस्यारिष्टनिरासार्थं शांतिकरिष्यइतिसंकल्प्य गणेशपूजास्वस्तिवाचनमातृका
पूजावृद्धिश्राद्धाचार्यादिवरणानिकुर्यात् अथाचार्यः सर्षपविकरणानिकृत्वाप्राच्यांगोमयोपलिप्तभुविपंचद्रोणात्
दर्धार्धमितानुक्रमात् व्रीहितंदुलतिलानन्योन्योपरिराशीकृत्यतत्राष्टदलंविरच्यतत्कर्णिकायांकुंभंसंस्थाप्यतीर्थोदकेना
पूर्यतत्रसप्तमृत्संचपल्लवपंचरत्नपंचगव्याष्टगंधसर्वौषधीःक्षिप्त्वावस्त्रयुग्मेनावेष्ट्यपूर्णपात्रंनिधाय वैधृतव्यतिपातशां
तौमध्येत्र्यंबकमितिरुद्रंतद्दक्षिणेतत्सूर्येतिसूर्यमुत्तरतश्चाप्यायस्वेतिसोमं संक्रांतिशांतौमध्येसूर्यंतद्दक्षिणतो [illegible]

तश्चोत्तरतोरुद्रंतत्प्रतिमास्थापयित्वाषोडशभिःपंचभिर्वोपचारैःसंपूज्यरुद्रसोमसूर्यप्रतिमाःस्पृष्ट्वाष्टसहस्राष्टशताष्टविं
शतिअन्यतमसंख्ययामृत्युंजयमंत्रमुपन्ययेत्यादिसर्वंसौरमंत्रानाप्यायस्वेतिचक्रमाज्जपेत् संक्रांतिशांतौतु पूर्वंसौरज
पस्ततोमृत्युंजयजपः ततः ऋत्विजःप्रागादिदिक्क्रमेणानोभद्राभद्राश्चश्रेसहस्रशीर्षाकद्रुद्रायेतिसूक्तानिजपितारं
भासश्चिमेभिंसंस्थाप्यग्रहावाहनादिपूजांतंकृत्वा वारध्यात् तत्रचस्रुचीआज्येनेत्यंतेरुद्रसूर्यसोमान्समिच्चर्वाज्यैस्त
न्मंत्रैर्मृत्युंजयमंत्रेणचतिलाहुतिभिरष्टसहस्राष्टशताष्टविंशत्यान्यतरसंख्ययाशेषेणस्विष्टकृतमित्यादिसंक्रांतिशांतौ
तुसूर्याग्निरुद्राग्नितिविशेषः ततः आज्यभागांतेन्वाधानक्रमेणहुत्वाबलिदानानंतरकलशोदकैःसमुद्रज्येष्ठाइतिसूक्तेना
पोहिष्ठेतितिसृभिर्यानाशीभ्यामितिसूक्तेनपावमानीभिः प्रधानाधिप्रत्यधिदेवतामंत्रैः सुरास्त्वेत्यादिपौराणिकमंत्रैश्चाभिषि
क्तोयजमानोभिषेकवस्त्रमाचार्यायनिवेदयेत् आज्यमवेक्ष्यपूर्णाहुतिंहुत्वा आचार्यायधेनुंवस्त्रयुग्मांगुलीयकादिऋत्विग्
भ्यश्चदक्षिणांदत्वान्येभ्यश्चभूरिदक्षिणांदत्वाशतंयथाशक्तिवाब्राह्मणान्भोजयित्वाबंधुभिःसहभुंजीतेति वैधृतव्यतिपात
संक्रांतिशांतयः अथैकनक्षत्रजन्मशांतिः गार्ग्यः एकस्मिन्नेवनक्षत्रे भ्रात्रोर्वापितृपुत्रयोः प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य
निश्चयःतद्दोषनाशायतदाप्रशस्तांशांतिंचकारयेत् अभिषेचनंवासंपूज्यऋक्षप्रतिमांतदग्रेदानंचकुर्याद्विभवानुरूपं तत्रशां

त्तिंप्रवक्ष्यामिसर्वाचार्यमतेनतु शुभर्क्षेशुभेवारेचंद्रताराबलान्विते रिक्तारविष्टीवर्ज्येतुप्रारंभेदिवसेसुधी आचार्यंवरये
त्पूर्वंचतुरश्चद्विजोत्तमाः पुण्याहंवाचयित्वातुशांतिकर्मसमाचरेत् अग्नेरीशानदिग्भागेनक्षत्रप्रतिमांततः तत्तन्नक्षत्रमं
त्रेणअर्चयेत्कलशोपरि रक्तवस्त्रेणसंछाद्यवस्त्रयुग्मेनवेष्टयेत् स्वगृह्योक्तमार्गेणकुर्यादग्निमुखंततः तन्नक्षत्रमंत्रे
णहुनेदष्टोत्तरंशतं प्रत्येकसमिदन्नाज्यैः प्रायश्चित्तांतमेवच ॥ अभिषेकंततःकुर्यादाचार्यः पितृपुत्रयोः वस्त्रालंकारगो
दानैराचार्यंपूजयेत्पुनः ऋत्विजांदक्षिणांदत्वानाक्षत्रयसुवर्णकं देवताप्रतिमादानंधान्यवस्त्रादिभिः सह यानशय्या
सनादीनिदद्यात्तद्दोषशांतये भोजयेद्ब्राह्मणान्सर्वान् वित्तशाठ्यविवर्जितः अथप्रयोगः कर्तामासपक्षाद्युल्लिख्यास्य
शिशोः पित्राद्येकर्क्षोत्पत्तिसूचितारिष्टशांत्यर्थंएकनक्षत्रशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनस्वस्तिवाचनेऽभ्यु
दयिकाचार्यर्त्विक्वरणानिकुर्यात् अथाचार्योग्नेरैशान्यांकुंभसंस्थाप्यरक्तवस्त्रयुग्मेनसंछाद्यतस्मिन्पूर्णपात्रोपरि
तत्तन्नक्षत्रदेवतामावाह्यरक्तवस्त्रद्वयेनाछाद्यसंपूज्यप्रतिष्ठाप्यान्वाधायाज्यभागांतंकृत्वातत्तन्नक्षत्रमंत्रेणसमिच्चर्वा
ज्यानिप्रत्येकंअष्टोत्तरशतंहुत्वाहोमशेषंसमाप्यशिशुंतत्पित्रादींश्चाभिषिंचेत् ततः कर्तोत्तरपूजांकृत्वाविसृज्यप्र
तिमादिकंगवादिकंचाचार्यायदत्वाऋत्विग्भ्यश्चप्रत्येकंसौवर्णमापत्रपात्मिकांयथाशक्तिर्वादक्षिणांदत्वायथाविभवं

यानशय्यासनादीनिचदत्वाब्राह्मणान्भोजयित्वास्वयंभुंजीतइतिएकनक्षत्रशांतिप्रयोगः अथग्रहणोत्पत्तौशांतिः
शौनकः ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते व्याधिपीडातदास्त्रीणामादौतुऋतुदर्शनात् इत्थंसंजायतेयस्तुतस्यमृ
त्युर्नसंशयः व्याधिपीडाचदारिद्र्यंशोकंचकलहोभवेत् शांतितेषांप्रवक्ष्यामिनराणांहितकाम्यया यस्मिन्नृक्षेवि
शेषणग्रहणंसंप्रजायते तदृक्षाधिपतेरूपंसुवर्णेनप्रकल्पयेत् यथाशक्त्यानुसारेणविजनाल्पंनकारयेत् सू
र्यग्रहेसूर्यरूपंसुवर्णेनविशेषतः इंदुंचंद्रग्रहेधीमानरजतेनविशेषतः राहुरूपंप्रकुर्वीतनागेनैवविशेषतः ना
गेनसीसेन शुचौदेशेप्रयत्नेनगोमयेनप्रलेपयेत् तस्योपरिन्यसेद्धीमान्नववस्त्रंसुशोभनं त्रयाणांचैवरूपाणांस्थाप
नंतत्रकारयेत् रक्ताक्षतंरक्तगंधंरक्तपुष्पाबराणिच सूर्यग्रहेप्रदातव्यंसूर्यप्रीतिकरायच श्वेतवस्त्रंश्वेतमाल्यंश्वेतगं
धाक्षतादिभिः चंद्रग्रहेप्रदातव्यंचंद्रप्रीतिकरायच राहवेचैवदातव्यंकृष्णंपुष्पांबराणिच दद्यान्नक्षत्रनाथेभ्यःश्वेत
गंधानुलेपनं सूर्यंसंपूजयेद्धीमान् आकृष्णेनेतिमंत्रतः ॥ चंद्रग्रहेचपालाशैः समिद्भिर्जुहुयान्नरः दूर्वाभिर्जुहुयाद्धी
मान् राहोःसंप्रीणनायच समिद्भिर्जन्मनक्षत्रेधिदैवेशायजुहुयाद्बुधः भेशायनक्षत्राधिपतये आज्येनचरुणाचैवतिलैश्चा
जुहुयात्ततः पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः जलैरौषधकल्कैश्चसहितैःकलशोदकैः ५ औषधकल्कैःसर्वौष

शां·म घकल्कैः अभिषेकंप्रकुर्वीतयजमानोप्रयत्नतः मंत्रैर्वारुणदेवत्यैरापोहिष्ठादिभिः इमंमेगंगेपितरस्तत्वायामीतिमंत्र ॥
६८ अभिषेकेनिवृत्तेतुयजमानः समाहितः आचार्यंपूजयेत्पश्चात्सुशांतोनियतेंद्रियः तस्मैदद्यात्प्रयत्नेनभक्त्याप्रतिकृतित्रयं दक्षि
णाभिश्चसंयुक्तंयथाशक्त्यानुसारतः ब्राह्मणान्भोजयित्वातुपरिशेषंसमापयेत् तेभ्योपिदक्षिणांदद्याद्यजमानः समाहितः
अनेनविधिनाशांतिंकृत्वासम्यग्विधानतः अकालमृत्युशोकंचव्याधिपीडांचमाप्नुयात् सौख्यंसौमनस्यंनित्यंसौभाग्यंलभ
तेनरः इत्थंग्रहणजातानांसर्वारिष्टविनाशनं कथितंभार्गवेणेदंशौनकायमहात्मने इतिचंद्रसूर्यग्रहणप्रसूतिशांतिः
अथविषघटिकाशांतिः तत्रवृद्धगार्ग्यः विषनाडीषुसंजातः पितृमातृधनात्मनां नाशकृद्विषशस्त्राद्यैः क्रूरलग्नेष्टमेपिवा
तद्दोषपरिहारार्थंशांतिकर्मसमारभेत् रुद्रोयमोग्निमृत्युश्चदेवताःपरिकीर्तिताः सुवर्णेनयथाशक्त्यातत्तल्लक्षणसंयुताः
प्रतिमाःकारयित्वातुआढकव्रीहिभिः स्थलेः स्थंडिलेपरिकल्प्याथकुंभमोषधसंयुतं जलैः सपूर्यसंस्थाप्यमृदादिप्र
क्षिपेत्ततः वस्त्रद्वयेनसंवेष्ट्यपंचरत्नाविनिक्षिपेत् कुंभोपरितुसंस्थाप्यचतस्रः प्रतिमास्तथा ततस्तंत्रैश्चसंपूज्यगंध
पुष्पोपहारकैः कद्रुद्रायेतिमंत्रेणयमायसोममित्यथ अग्निर्मूर्द्धेतिमंत्रेणपरमृत्योइतित्वथ एतैश्चतुर्भिर्मंत्रैस्तुक्रमा
द्वेद्वेहुनेत्तथा समिच्चरुघृतद्रव्यैःप्रत्येकंचयथाक्रमं ऋत्विग्भिश्चसहाचार्योहुनेदष्टसहस्रकं अष्टोत्तरशतंवापिअष्टा

विंशतिमेववातत्तिलैर्होमंस्तत्तन्मंत्रैश्चकल्पवित् ततोभिषिंचेदेनंमंत्रैः पौराणिकैःक्रमात् प्रार्थ्यतांभगवानीशः
पिनाकीसर्वतोमुखः तवमूर्तिप्रदानेनममस्त्वाभीष्टदोभव इंद्रवत्यौतोयमः कालोदंडहस्तः प्रशांतधीः रक्ताक्षःपाशभृ
त्कृष्णोमहिषस्थःशिवंकुरु ॥ पिंगलश्मश्रुकेशांतः पिंगाक्षश्चतुरोरणः छागस्थःसाक्षसूत्रश्चसप्तार्चिः शक्तिधारकः
तवमूर्तिप्रदानेनममपापंव्यपोहतु दंष्ट्राकरालवदनोनीलांजनसमाकृतिः धृतखड्गगदापाणिर्मृत्युर्मांपातुसर्वदा इत्थ
मेवंविधैर्मंत्रैर्यथाविधिसमाहितः गोभूहिरण्यवस्त्रैश्चआचार्यंपूजयेत्सुधीः एवंकुर्यात्प्रदानेनविषदोषःप्रशाम्य
ति इतिविषघटिकाशांतिः अथगंडांतशांतिः गर्गः अश्विनीमघमूलादौत्रिवेदनवनाडिका रेवतीसार्पशाक्रांतेमा
सरुद्ररसाःक्रमात् अश्विनीमघमूलादौनाडिकाद्वितयंतथा अश्विनीमघमूलानांपूर्वार्द्धेवध्यतेपिता पूषादिसर्पपश्चा
र्द्धेजननीवाध्यतेशिशोः पितृघ्नस्तुदिवाजातोरात्रिजातस्तुमातृहा आत्महासंध्ययोर्जातोनास्तिगंडेनिरामयः सर्वे
षांगंडजातानांपरित्यागोविधीयते वर्जयेत्दर्शनंतस्यायावत्षाण्मासिकंभवेत् तस्यशांतिंप्रवक्ष्यामिसोममंत्रेणभक्ति
मान् कांस्यपात्रंप्रकुर्वीतपलैःषोडशभिर्नव अष्टभिश्चचतुर्भिश्चद्वाभ्यांवाशोभनंतथा तन्मध्येपायसंशुभ्रंनवनी
तेनपूरितं राजतंचंद्रमंचैतसितपुष्पसहस्रकैः देवत्तक्षौमवासश्चशुक्लमाल्याम्बरार्चितः सोमोहमितिसंचिंत्यपूजां

कुर्यादतंद्रितः जपेत्सहस्रकं मंत्रं श्रद्दधानः समाहितः आप्यायस्वेति मंत्रेण पूजां कुर्यात्समाहितः दद्याद्दक्षिणामिष्टां गं
डदोषप्रशांतये शुक्लां वा गोश्वेतां चैव ताम्रपात्रसमन्वितां गंडदोषोपशांत्यर्थं दद्याद्द्विजे शुचिः इति भगंडांतशांतिः
अथ दिनक्षयादिशांतिः गर्गः दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृतौ मूले गंडे तिगंडे च परिघे यमघंटके कालदंडे
मृत्युयोगे दुष्टयोगे सुदारुणे तस्मिन्वा दिने प्राप्ते प्रसूतिर्यदि जायते अतिदोषकरी प्रोक्ता तत्र पापयुते सति विचार्य
तत्र दैवज्ञः शांतिं कृत्वा यथाविधि यजमानो देवतानां ग्रहाणां चैव पूजनं दीपं शिवालये भक्त्या घृतेन परिकल्पयेत् अ
भिषेकं शंकरस्य अश्वत्थस्य प्रदक्षिणा आयुर्वृद्धिकरं जाप्यं सर्वारिष्टविनाशनं गुरुदैवतविप्राणां पूजनं गोत्रवर्द्धनं
पुष्ट्यायुस्तुष्टिशांत्यर्थं अभीष्टफलसिद्धये सर्वारिष्टहरं यत्नं समाचरेत् शिवाय विधिवद्भक्त्या दीपदानं करोति यः अखं
डगोघृतेनैव स मृत्युं जयेन्नरः विष्णुमूर्तिं महापुण्यामश्वत्थं श्रीकरं सदा प्रदक्षिणं नरो भक्त्या कृत्वा मृत्युं जयेन्नरः सर्व
संपत्समृध्यर्थं नित्यं कल्याणवृद्धये अभीष्टफलसिध्यर्थं कुर्याद्ब्राह्मणभोजनं अभिषेकं शिवे शांतिः कृत्वा भक्त्या नरो
नमः अकालमृत्युं निर्जित्य दीर्घायुर्जायते नरः गाणं सं पुरुषसूक्तं सौरं मृत्युंजयं शुभं शांतिजाप्यं रुद्रजाप्यं कृत्वा मृत्यु
जयी भवेत् मूले वा सर्पगंडे वा कुर्यादेतानि यत्नतः आयुर्वृद्धिकरार्थाय गंडदोषप्रशांतये इति गर्गोक्तगंडदोषशांतिः॥

अथ त्रिकशांतिः शांतिसर्वस्वे सुतत्रये सुता चेत्स्यात्तत्त्रये वा सुतो यदि मातापित्रोः कुलस्यापि तदारिष्टं महद्भवेत् ज्येष्ठ
नाशो धने हानिर्दुःखं वा सुमहद्भवेत् तत्र शांतिं प्रकुर्वीत शाठ्यविवर्जितः जातस्यैकादशाहे वा द्वादशाहे शुभे दिने आ
चार्यमृत्विजो वृत्वा ग्रहयज्ञपुरःसरं सह वा ग्रहयज्ञः स्यात्तस्य वित्तानुसारतः ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतः कृ
ताः पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्व
शः द्विज एको जपेद्धोमकाले शुचिः समाहितः आचार्यो जुहुयात्तत्र समिदाज्यतिलांश्चरुं अष्टोत्तरसहस्रं वा शतं वा विंशतिं तु
वा देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरःसरं ब्रह्मादिमंत्रैरिंद्रस्य यत इंद्र भयामहे ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः अ
भिषेकं कुटुंबस्य कृत्वाचार्यं प्रपूजयेत् हिरण्यं धेनुरेका च ऋत्विजां दक्षिणा ततः प्रतिमा गुरवे देया उपस्कारसमन्विता कां
स्याज्यवीक्षणं दत्वा शांतिपाठं तु कारयेत् ब्राह्मणान्भोजयेत्पश्चाद्दीनानाथांश्च भोजयेत् एवं शांतिविधानेन सर्वारिष्टं
निरस्यते इति त्रिकशांतिः अथ वैकृतशांतिरुच्यते अकालप्रसवा नार्यः कालातीतप्रजास्तथा विकृतप्रसवाश्चैव यु
ग्मप्रसवनास्तथा अमानुषा अखंडाश्च अजातव्यंजनास्तथा हीनांगा अधिकांगाश्च जायते यदि वा स्त्रियः पशवः पक्षि
णश्चैव तथैव च सरीसृपः विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् निर्वासयेत्तान्नृपतिः स्वराष्ट्राद्द्विजपश्च पूज्याश्च त

तोद्विजेंद्रः विकित्सनैर्ब्राह्मणानर्पूराश्वततोस्यशांतिसमुपैतिपापं इतिवैकृतशांतिः अथयमलशांतिः कात्यायनगृह्ये अ
थातोयमलजननेविधिंव्याख्यास्यामोयस्यभार्यागोर्दासीमहिषीवडवावाविकृतिंप्रसवेत्तस्याःपश्चितिर्भवेत्पूर्णेदशाहेचतु
र्णांक्षीरवृक्षाणांकाषायमुसंहरेत् लक्षवटोदुंवराश्वत्थशमीदेवदारुगौरसर्षपास्तेषामपोहिरण्यदूर्वांकुराश्चपल्लवैरश्वैक
लशान्पूर्यसर्वौषधीनादयतोस्नापयित्वापोहिष्ठेतितिसृभिःकयानश्चित्रइत्याभ्यांपंचेंद्राणींपंचवारुणेनेदमापःप्रवहतेत्यपाद्यु
मितिस्नापयित्वालंकृत्यदर्भेषूपवेश्यतत्रमारुतंस्थालीपाकंश्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोतिपूर्वोक्तैःस्नापनमं
त्रैःस्थालीपाकस्यजुहोत्यग्नयेस्वाहासोमायस्वाहापवमानायस्वाहापावकायस्वाहामरुतायस्वाहामरुद्भ्यःस्वाहायमाय
स्वाहांतकायस्वाहामृत्यवेस्वाहाब्रह्मणेस्वाहाग्नयेस्विष्टकृतेस्वाहेत्येतदेवमहोत्पातेषूलूककपोतगृध्रश्येनोवाष्टहंसविशे
न् स्तंभःप्ररोहेवल्मीकेमधुजालंवाभवेदुदकुंभप्रज्वालनासनशयनयानभंगेषुगृहगोधिकाकृकलासशिरसर्पणादृष्टेषेवं
छत्रध्वजविनाशेष्वन्येष्युत्पातेषुभूकंपोल्कापातकाकसर्पसंगमप्रेक्षणादिष्वेतदेवप्रायश्चित्तंग्रहशांत्युक्तेनविधिनाकृत्वा
आचार्यायवरंदत्वाब्राह्मणान्भोजयित्वास्वस्तिवाच्याशिषःप्रतिगृह्यशांतिर्भवति पंचेंद्राणीयस्मिन्नस्मिन्सामपंचेंद्रो
मंत्र एवंपंचवारुणोपितौचप्रयोगेवक्ष्यति अथप्रयोगः ममभार्यायायमलजननसूचितसर्वारिष्टशांतिद्वारा...

प्रत्युदकंप्रत्युदकंप्रतिवृक्षमथापिवा स्थूलतरं कचितुकूलमित्येवपारः अत्राज्ञायामनुक्तायांप्राक्प्रोक्तानानुसारतः प
त्रवारोचतेतत्रमातृणांवलिमाहरेत् कृत्वानीराजनांतेवलिमितिविधिवद्वालमाहूयतत्रसंस्थश्याद्भिःसमंत्रंशिरसिस
कुसुमैरक्षतैश्चामयित्वा क्षिप्त्वाग्नेदेवतायाविधिवदुपहितेस्तत्रगीतैःसुमंत्रैःकुर्याद्रक्षांसमीक्ष्यप्रणमितविलयंयातिदु
ष्टग्रहार्तिः नीराजनमंत्रोद्धारेनारायणीये ब्राह्मीविष्णुश्चरुद्रश्चसूर्यदीवैश्रवणस्तथा रक्षंतुत्वरितंवालंमुंचमुंचकुमारकं
कालगुणोत्तरे पलाशाश्वत्थकपित्थविल्वोदुंवरपल्लवाः पंचभंगास्मृताह्येतेवालानांहितकारकाः स्नापितेधूपितेवालेतेनै
मुंचंतिसायही प्रयोगसारेपि पलाशोदुंवराश्वत्थविल्वन्यग्रोधपल्लवाः क्वथितेनकषायेनपरिषिंचेत्प्रशांतये परिषिंचेत्त्व
यपेदितिमदनः अत्रमंत्रः ॐ नमश्चामुंडेइत्यादिवलिदानेपूर्वमुक्त रक्षामंत्रःप्रयोगसारे रक्षरक्षमहादेवनीलग्रीवज
टाधर ग्रहैस्तुसहितोरक्षमुंचमुंचकुमारकं अमुंमंत्रंभुजंपत्रेविलिख्यतत्त्वेभुजेवध्नीयादितिमदनः वालकशिखायां
श्रीपूर्वकंजपेन्मंत्रउक्तःप्रयोगसारे सर्वमातरइमंग्रहंसंकरंतुहरोदय २ स्फोटय २ स्वाहागर्ज २ सरदह्र २ आमर्दय २
हिम २ हन २ एवंसिद्धिरुद्रोज्ञापयतिस्वाहा अत्रहोमोपिप्रयोगसारे ॐ कूष्मांडिभगवतिसुरगिणि २ सुमंडितेमुं
च २ दह २ पचसर २ गच्छ २ स्वाहा २ कृत्वाचतुष्पथेकुंडमंत्रेणानेनमंत्रवित् त्रिरात्रंपंचरात्रंवासहस्रंजुहुयात्तिलैः

शांतिदुष्टग्रहाः शांतिबलिना चानुमोदिताः बालरोदनपरिहारार्थं यंत्रमुक्तं प्रयोगसारे षट्दलमध्ये ह्रींकारं दलमध्ये शिरोनं
मविलिख्य षट्सु अस्त्रेषु ॐ ललु वे स्वाहा इति मंत्रस्य षडक्षराणि विलिख्य तद्बहिर्नैर्मिव हृत्तवहं तद्यवि लिख्य तद्ब
हिरघोमुखैर्हं वं ईं रावे स्यपं वो पचारैः संपूज्य बालहस्तैवध्नीयादिति अथ बालग्रहस्तवः प्रयोगसारे प्रणम्य शिरसा
शांतिगणेशानं तमीश्वरं बालग्रहस्तवं वक्ष्ये समस्ताभ्युदयप्रदं तपसा पद्मासादीत्याव पुषादिक्रमेण च निर्दिशेम स
दास्कंदसनोदेवः प्रसीदतु रत्नमालांबरधरो रक्तगंधानुलेपनः रक्तादिसोज्ज्वलः शांतः सनोदेवः प्रसीदतु योनंदनः
पशुपतेर्मातृणां पावकस्य च गंगोमाकृत्तिकानां च सनोदेवः प्र० देवसेनापरिवृतो देवसेनार्चितः सदा देवसेनापतिः
श्रीमान् शांतः शक्तिधरः प्रभुः कुमारः शिखिवाहनः मुरारिहा महासेनः सनोदेवः प्र० प्रकृत्या सुंदरोदांतो देवैश्वर्यादय
न्वितः नानाविनोदसंपन्नः सनोदे० प्रबोधा सुप्रबोधा च बोधना सुप्रबोधना प्रबुद्धा च प्रबोधा च सुप्रीता सुमना स्तथा अ
नोन्मनीति विख्याता योगिन्यः पांतु बालकं सुवर्णा रुक्मिणी चैव मंदवेगा विभीषणा विद्युज्जिह्वा महानासा शातानंदा त
थापरा बालदा प्रमदा चैवेति योगिन्यः पांतु बालकं हारिणी चापवारा हीवानरी क्रोष्टकी तथा कवेरी कोटराक्षी च कुंभकर्णी
च चंडिका बलाह्निकारिणी चेति योगिन्यः पांतु बालकं शुद्धा विशुद्धा श्रद्धा च योगसिद्धा मितंवदा शुभगा सुभदा गौरी च

प्र
ष्वरप्रीत्यर्थं कात्यायनपरिशिष्टोक्तानि सग्रहमखं यमलशांतिं करिष्य इति संकल्प्य गणेशपूजनाचार्यवरणांतं कुर्यात् ततः आ
चार्यो यदत्र संस्थितमिति सर्षपान्विकीर्य पूर्वस्यां पूर्वादिक्रमेणाष्टौ कलशान्महीद्यौरित्यादिनाक्षीरवृक्षश्च कषायप्लक्ष वटउदुंब
राश्वत्थशमीदेवदारुशाखा गौरसर्षप हिरण्य दूर्वांकुर पंचपल्लव सर्वौषधीयुतान्स्थापयित्वा तज्जलेन यजमानं सपत्नीकं स्नाप
यित्वा तत्र मंत्राः आपोहिष्ठेति तिसृणां अंबरीषः सिंधुद्वीप आपो गायत्री अभिषेके वि० कयान श्चित्र इति वामदेवो इं
द्रो गायत्री अभि० त्रातारमिंद्रा गर्ग इंद्रस्त्रिष्टुप् अभि० वरुणस्येति वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्यर्
तसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद अभि० इदमापइत्यस्य सिंधुद्वीप आपोनुष्टुप् अभि० अ
पाघमप किल्विषमप कृत्यामपोरपः अपामार्गत्वमस्मदप दुःस्वप्न्यं सुव अभि० ततो वस्त्राद्यलंकृतो दंपती दर्भे
षु उपवश्याचार्योग्निस्थापनं कुर्यात् तत ईशान्यां ग्रहस्थापनान्तेन्वाधाने अस्मिन्नन्वाहिते ग्नावित्यादौ उक्त्वा अत्र प्रधानं
ग्रहान् समिच्चर्वाज्यैः अपस्तिसृभिः इंद्रेति सृभिः वरुणमेकया आपोहाभ्यामाज्येन अग्निं सोमं पवमानं पावकं मारुतं य
मं अंतकं मृत्युं एकैकया चर्वाहुत्या शेषेण स्विष्टकृतमित्यादि ततोन्वाधानादिक्रमेण होमं समाप्य बलिदान पूर्णाहुति
... रभिषेक दक्षिणादानांतं कृत्वा शतं ब्राह्मणान्भोजयित्वा स्वस्ति भवंतो ब्रुवंतु इति वाचयित्वा तैः स्वस्तीत्युक्ता तेभ्यः अ

धा० क त्रिषोगृहीता यादिति अथब्राह्मणं तदाहुर्य आहिताग्निर्यस्य भार्या गौर्वा यमौ जनयेत्का तत्र प्रायश्चित्तिरिति सोऽग्नये मरुत्व
७१ ते त्रयोदशकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षये पृथ्वि देव रभा अवेह्वेत्साहुतिं वाहवनीये जुहुयाद
ग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिरिति कारिका अथ यस्य वधूर्गौर्वा जनयेद्वे यमौ ततः सम रुद्रास्त्र रुकूयांत्सूणांहु
तिमथापिवे द्रुतियमलशांति अथ प्रथमदिनादिषु देवी गृहीतं वालकं रक्षणं मदनरत्ने योगसारे प्रथमे ह्नि गृह्णा
ति वालकं वालिनी ग्रही यापिनी गृहीतिना रायणीतिपाठः गांधीनीति पुराणांतरे तथा गृहीतमात्रस्य चेष्टितान्युपलक्ष
येत् गात्रोद्वेगो निराहारो लालाग्रीवानुवर्तनं लिंपेत धातकीलोध्रमंजिष्ठातालचंदनैः धूपयेन्महिषाक्षेण ततो मुंचति सा ग्र
हीलेपन धूपनेवालस्य नारायणी येवलिदानानुवृत्तौ मत्स्यमांससुराभक्ष्यगंधास्रक्धूपदीपकैः वलिं दद्यादिति ऋ
षेः वलिमंत्रः प्रयोगसारे ॐ नमो भगवति चामुंडे विद्युज्जिह्वे हीं हीं अवसरं तु ग्रहाहुत यथा गच्छ तु पातान्यतः
स्थाने रुद्रो ज्ञापयति स्वाहा विद्युज्जिह्वे हां हीं हुं हं मुंच मुंच स्वाहा इति वालग्रहाणां विशेषः शालावलिनी वेदने वलि
स्य रवेरुदये सप्तदिनानि देवा देयः वलिस्थानानि प्रयोगसारे कदंवश्चकरंजश्च विभीतो निंवयेव च अश्वत्थो दुंवरश्चैव श्ले
ष्मातकवटौ तथा मानदसाक्ष मेणो का पूर्वादि शांतदिगताः तेषामेकं समाश्रित्य वलिं दद्याद्यथोदितमिति मतिस्थू

विकारिणीति च नानाविज्ञानविख्याता योगिन्यः पांतु वालकं लंवा प्रलंवा च तथा लंवकर्णी च लंविका ज्वालाकराली
कालिंदी कालिकेति यथोदिता स्वछंदाचारसंपन्ना योगिन्यः पांतु वालकं मणीता सुमणीता च मालिनी विश्वमालिनी विम
ला कमला माली लोला रौद्री च विश्रुता विचरंतो यथाकामं योगिन्यः पांतु वालकं वायुवेगा महावेगा सुवेगा वेगवाहिनी श
शिनी हंसिनी स्वस्था पुष्टिः पौष्टिकसिद्धिदा दिव्यानुभावा वाहिन्यो योगिन्यः पां० भ्रमिणी भामिणी नित्या निर्भिन्ना सुभगा
गुहा स्वेदिनी द्राविणी वामा योगिन्यः पांतु० रुद्रशक्तिविनिष्क्रांता मेकाशीतिक्रमोदितं योगिनिवृंदमेतद्धि सिद्धविद्याधरार्चि
तास्कंदग्रहाधिदैवं तद्वालकं पातु सर्वदा शकुनी रेवती देवी शिखा स्वमुखमंडिका प्रलंवा पूतनाख्या च कटपूतनिका पुन
विजया गोमुखी धूम्रा मुंडमाला तथापरा अधोलंवा च पश्चाच्च कुमुदाप्यथ चंडिका भ्रामणी चैककाली च देवी प्रेतमुखी
तथा ऐंद्री मार्जारिकी भूयः कुरंगा च शुभाक्षणा कालरात्रिश्च मायावी होलिका पिलिपिच्छिका भीतारणी चक्रवारा भीष
णा दुर्जया परा तापनी कटकाली च मुक्तकेशा महावला अहंकारी जया तद्वदजमेषा त्रिदंडिका रोदनी सुकुदाभिख्या
ललाटा पिंगला तथा सीतला वालिनी चैव तापसी यापराक्षसी मानसी धनदा देवी वलदावर्तिनी तथा यमुना जातवेदा
च मालिनी कलहंसिनी वालिकादेवदूती च वायसी पक्षिणी तथा स्वछंदा वालिका चैव वासिनी नाचिकेति च पंचाशत्

शां॰म कुलोत्पन्न चतुष्षष्टिसमीरिता योन्योनिस्यसंतुष्टाः स्कंदापस्मारदेवता नानारक्षाधिकारस्थाबालकंपांतुसर्वदा महालक्ष्मी
७३ महातंकामहासेनामहाबला: महाकंपामहाभीमामहासीमामहोत्सवा महासेनामहाचंडामेहिनीवीरनायकी एक
वीराविशालाश्रीसुकेशीसुमनात्तथा सुकेशिनीचसंतुष्टादंडिनीचविलंबिनी भामिनीचाथसौवर्णीसिंहवक्त्राकरा
किनी क्षमराचंचलाचंडालासिद्धदापरा शाकोदरीधृतिः स्वाहास्वधास्थाचसनातनी शावराचतथादेवीनीलभीवातथा
विका विनतागंधिनीवामाक्रीडंतीचैववाहिनी कार्षणीमालतीफुल्लकालकर्णीचचंडिका चित्राननागुहाचेतिपार्व
तीसंगतिंगता पंचाशत्तिवसंपन्नाशकुनीदैवतप्रिया योगिन्यः कामरूपिण्योवालकंपांतुसर्वदा विभ्रंतयाप्रभावन्नाम
वेहासर्वगागुहा दुर्गासरस्वतीज्येष्ठाश्रेष्ठापद्मापरापरा प्रमादारोहिणीसीलाप्रहप्रहारिणीविभा विभूतिर्वितत्तिःप्री
तीःप्रकृतिःप्रमतिर्यथा एताभगवतीस्त्वष्टायोगिन्यो योगसिद्धिदा पंचविंशतिराख्यातावेवतीशक्तिगोचरा जगदाधार्य
कराबालकंपांतुसर्वदा नंदश्चैवोपनंदश्चगोमतिःसुमतिस्तथा विद्युज्जिह्वोमहाकालः कराकालिमिलोचनः तेजहा
डाविरूपाक्षगोमुखोवडवामुखः कालाननः करालश्चशंकुकर्णोविभीषणः शतेसकुंदनोपन्नावीराः षोडषराक्षसाः
पूतनादेवतातुष्टाबालकंपांतुसर्वदा वज्रीणीशक्तिनीचाद्यादंडिनीखड्गिनीतथा पाशिनीध्वजिनीदेवीगदिनीशूलि

नीपरा पद्मिनीचक्रिणीचेतिसर्वाकाराभयप्रदाः येतादिङ्गिनितादेव्योयोगिन्योदेवकीर्तिताः अधिभूतप्रधानापापायास्या
शास्तपूजना प्रसंनामातरः सर्वावालकंपांतुसर्वदा अर्थकोजलकोभूमःउग्रस्कंदश्चकीर्तितः वीरश्चापितृभिः सृष्टानेग
मेषाधिदेवताः पंचशक्तिप्रधानास्तेवालकंपांतुसर्वदा भैरवावीरमाताचक्षेत्रपालाविनायकाः डाकिन्योरुद्रशाकिन्यो
यक्षरक्षासिपन्नगाः वाराश्चावातराभूतामनुष्याःपशवोमृगाः सरीसृपाश्चसंतुष्टावालकंपांतुसर्वदा आदित्यावसवोरु
द्राश्वितरोमरुतस्तथा मुनयोमनवःकालाग्रहयोगाःसनातनाः सिद्धासाध्याश्चगंधर्वादेव्यश्चाप्सरसांवराः विद्याधरा
महादैत्यावाल॰ सहजायागजाश्चैववीरजामंत्रजास्तथा योगिन्योयोगविनियोनानाविभवगोचराः भवानीनामसंतुष्टा
वाल॰ भूर्लोकेचभुवर्लोकेस्वर्लोकेयाश्चमातरः अधश्चोर्ध्वंचतिर्यक्चक्रीडंत्योनंतमूर्तयः प्रसन्नयोगसंपन्नादिव्यै
श्वर्यसमन्विता स्वच्छंदयोगसंभूतैःभैरवैःपरिवारिता रक्षंतुबालकंशांतिं यच्छंतुचेतसासदा दिव्यस्तोत्रमिदंपुण्यंबाल
रक्षाधिकारकं जपेत्संतानरक्षार्थंबालद्रोहोपशांतये इतिबालस्तवः इदंचस्तवांतंकृत्यंआद्यवर्षमासयोः द्वितीयादि
दिनमासवर्षेष्वपिकार्यं विशेषस्तूच्यतेकुमारतंत्रे प्रथमेदिवसेमासेवर्षेवायोगिनीतदा अथवानंदिनीनाम्नापूतना
क्रमतेशिशुं तद्गृहीतस्यबालस्यज्वरःस्यात्प्रथमंततःगात्रशोषश्चवैवर्ण्यंनाहाच्छाप्रशंभवेत् छर्दिर्मूर्छाचकंपश्चही

नज्वरयुतस्तदा विधानंतत्रवक्ष्यामियेनमुंचतिपूतना नदिस्मृतिकपाकुर्याच्छोभनांपुत्तलिकांततः भुक्तौदनंशुक्लगंधस्त
थाशुक्लानुलेपनं शुक्लपुष्पाणिचपंचध्वजाः पंचप्रदीपकाः स्वस्तिकाः पंचपूर्वान्हेपूर्वस्यांदिशिसंयुतः बलिंदद्यादश्वो
शीरश्वेतसर्षपमेवचा शिवनिर्माल्यमार्जारत्वक्शाल्मिवपत्रकं गव्यंघृतंचेत्यनेनधूपयेच्चैववालकं एवंदिनत्रयंकृत्वाच
तुर्थेशांतिवारिणा स्नापयेद्वालकंपश्चाद्भोजयेच्चापिभिक्षुकं क्षीरेणभोजयेद्देवंसुस्थोभवतिवालकः शांतिवारिणेतिश
न्नइंद्राग्नीशंनोवाताइत्यादिकैः स्वस्वशाखापठितैर्मंत्रैरभिमंत्रितंवारिशांतिवारि अथवावक्ष्यमाणमंत्रेणशतंकृत्वोभि
मंत्रितंवारिशांतिवारि द्वितीयदिवसेमासेहायनेवासुनंदनं गृह्णातिपूतनाबालंयोगिनीस्वस्तनापिवा ततोभवेज्ज्वा
रः पूर्वसंकोचोहस्तपादयोः दंतान्खादत्यनिशंनिमीलयतिचक्षुषी आहारंचनगृह्णातिदिवारात्रंचरोदिति अक्षि
रोगस्तुदंनंचभवेद्भीतिः पुनःपुनः कृशत्वंचजायेतइत्येतच्छिशुलक्षणं तंदुलप्रस्थपिष्टेनविनिर्मायाथपुत्रिकां त्रयोदशध्व
जादीपास्वस्तिकायवलोदना प्रस्थप्रमाणपिष्टेनसिद्धापूपाश्चमत्स्यकाः मांसंचेत्येतदखिलंपश्चिमायांदिशिसृजेत् पश्चि
मायांचसंध्यायांएतद्दद्यादिनत्रयं धूपः शांतिःस्नानंब्राह्मणभोजनानिपूर्ववत् तृतीयेदिवसेमासेवर्षेवापूतनाभिधागृह्णा
यायोगिनीबालंततःपूर्वंज्वरोभवेत् प्रस्थप्रमाणपिष्टेनपुत्रिकांकारयेत्ततः रक्तौदनंध्वजोरक्तःस्वस्तिकारक्तएवच। रक्त

पुष्पंरक्तगंधस्तथारक्तानुलेपनं पश्चिमायांचसंध्यायांउदीच्यांनिक्षिपेद्बलिं धूपशांतिस्नान ब्राह्मणभोजनानिपूर्ववत् च
तुर्थेह्निमासेतुवर्षेगृह्णातिबालकं तुषमंडनिकानामपूतनाचाथयोगिनी भीषणाख्याततस्तस्यजायतेप्रथमंज्वरं गा
त्रभंगोस्थितिर्मूर्धावैवर्ण्यंचाक्षिमीलनं वैकल्यंतृष्णामताश्वासःकासोरुचिरतिंगीतं तिलपिष्टमयींकृत्वापुत्तलिकांबिल्व
कंटकैः अंगारचयेत्पुष्पयुक्तंभुक्तध्वजोर्जुनः स्वस्तिकेद्वप्रस्थसिद्धंभक्ततावद्रूपिकाः त्रिसंध्यंपश्चिमायांबलिंदद्या
द्विशेषतः तावद्रूपिकाइतिअर्धप्रस्थपरिमितेनान्नेनकृताइत्यर्थः गोशृंगंसर्पनिर्मोकंलशुनंनिंबपत्रकं मनुष्यके,
शमार्जारलोमान्याज्यंघृतंतथा एतैश्चधूपयेदेकनिशिसंध्यात्रयेपिच एकनिशिएकस्मिन्नेवदिनेबलिरित्यर्थः शां,
तिस्नानमंत्रब्राह्मणभोजनानिच पंचमेदिवसेमासेवर्षेवापूतनाशिशुं बिडालिकाख्यागृह्णीयात्तस्यजायतेज्वरः
हिक्काश्वासश्चासश्चमूर्त्रंचगात्रभंगोरुचिस्तथा तंदुलप्रस्थपिष्टेनविनिर्मायाथपुत्तलिकां भुक्तौदनंध्वजापंचस्वस्तिका
पंचचोज्वला पंचदीपाश्चशुक्लानिकुसुमानिचचंदनं अपराह्णेवृक्षमूलेपश्चिमायांदिशिक्षिपेत् धूपस्तुगोशृंगसर्पलशुन
मित्यादिकंशांतिस्नानमंत्रब्राह्मणभोजनानिच षष्ठेह्नितथामासेहायनेचापिबालकं पूतनाशकुनिनामगृह्णीयात्तद
नंतरं ज्वरमुद्वेजनंगात्रेशोषःश्वासोरुचिस्तथा कासश्चहस्तयादाक्षिसंकोचश्चेतिलक्षणं तंदुलप्रस्थपिष्टेनविनिर्माया,

म. ५५

थपुत्तलिका कृसरौदनं ध्वजाः पंचकृष्णाः स्वस्तिकपंचकं कृष्णमेवाथ मत्स्याश्च पायसं दुग्धमेव च मांसं चापूपकास्तद्वत्प्रस्थपिष्ट
विनिर्मितः पराह्ने पश्चिमायां निक्षिपेद्बलिपुत्तलिकां पुत्तलिकां पूर्ववत्कृत्वा पललं मूलपाचितं मत्स्यापर्पटिकाश्चैव रा
कं च प्रस्थसंमितं उदीच्यां पूर्वसंध्यायां बलिर्देयः प्रशान्तये अत्र बलिदानयोर्विकल्पः तयोरेककालयोर्बालकस्य धूपो देयः गो
शृंगलशुनमित्यादिकः तथा शान्तिस्नानं ब्राह्मणभोजनं च बलिदानपूजामंत्रस्तु ॐ फट् फट् स्वाहा सप्तमे दिवसे मासे वर्षे वा
शुष्करेवती गृह्णाति पूतना वा बालं ततस्तस्य प्रथमं ज्वरः गात्रभंगो यविद्वेष आहारे कंपरोदने इत्येतल्लक्षणं तत्र बलिर्देयः
प्रशान्तये प्रस्थसंमितपिष्टेन सम्यक् कृत्वाथ पुत्तलिका सप्त ध्वजाः सप्त दीपाः स्वस्तिकाः सप्त वै तथा पुष्पाणि मत्स्यमांसं च भ
क्ष्यं चेत्युदग्गाहरेत् धूपस्तु गोशृंगलशुनमित्यादिकः शान्तिस्नानं ब्राह्मणभोजनं च मंत्रस्तु ॐ ह्रीं फट् स्वाहा अष्टमे दिवसे
मासे वर्षे वा क्रमतेऽस्मिंस्तु विडालिकानामध्येयापूतनास्ततो ज्वरः गात्रभेदो रुधिररोदनं नेत्रमीलनं जिह्वाशोषः शि
रस्फोटा आहारद्वेषमेव च अक्षिरोगो भवेदेतद्दिंगितं तत्र गृह्णाति सोः तंदुलप्रस्थपिष्टेन पुत्तलीकारयेत्ततः पायसं मधुसर्पिश्च
क्षीरं लाजाश्च शष्कुली गुग्गुलमेव मांसं च तथा पर्पटिका अपि ध्वजा दीपाश्चत्वारो गंधा नानाविधा अपि सुमनांसि च रक्तानि
सर्वं मंत्रोदितो बलिः अमुं समाहरेत्पूर्वसंध्यायां दक्षिणादिशि कृष्णाष्टम्यां वक्ष्यमाणः मंत्रेणानेन मेधवित् ॐ नमो नारायणा

यत्रैलोक्यविद्रावणाय ॐ ह्रीं फट् स्वाहा अनेनैव च मंत्रेण पूजादिबलिहरणांतं कर्म कुर्यात् धूपस्तु गोशृंगलशुनमित्यादिका
शान्तिस्नानं ब्राह्मणभोजनं च अत्र कृष्णाष्टम्यां बलिहरणमिति न नीयमार्थः किंतु सति संभवे प्राशस्त्यार्थं अन्यथा तत्प्रतीक्ष
पा शिशुनाशः स्यात् नवमे दिवसे मासे हायने वापि बालकं गृह्णाति मृदुवाना नाम्ना पूतना तदनंतरं ज्वरश्छर्दिस्तृष्णा ध्यानं
कासः श्वासश्च तस्य ता गात्रभंगश्च शूलं च चिह्नान्येतानि बालके प्रस्थमात्रेण पिष्टेन विनिर्माय च पुत्तलिकां ओदनं मत्स्य
मांसं च पर्पटी चेक्षुमूलिकां निक्षिपेत्पूर्वसंध्यायामुत्तरस्यां बलिं दिशि अत्र मंत्रः ॐ नमो भगवते वासुदेवाय कृष्णम
ण्डले बलिमावाप हन हन हुं फट् स्वाहा धूपस्तु गोशृंगलशुनमित्यादिकः शान्तिस्नानं ब्राह्मणभोजनं दशमे दिवसे मासे हायने
वापि बालकं पूतना रेवती नाम्नी गृह्णीयात् बालकं ततः ज्वरश्छर्दिः कासश्वासो शूलं चेत्येतदीरितं अन्नद्वेषश्च तत्रापि ब
लिर्देयो विचक्षणैः प्रस्थप्रमाणपिष्टेन पुत्तलिकां तत्र कारयेत् अष्टांगलेखयेत्तत्र बिल्ववृक्षस्य कंटकैः गुडौदनं च सर्पिश्च
ध्वजानां पंचविंशतिः स्वस्तिकानां पंचविंशतिरेव च चत्वारि रक्तपुष्पाणि एतद्दक्षिणादिग्गतः संध्यायामेव वक्ष्यमाणमंत्रेणा
ने निक्षिपेत् ॐ नमो भगवते वासुदेवाय हन हन हुं फट् स्वाहा धूपो गोशृंगलशुनमित्यादिः शान्तिस्नानं ब्राह्मणभोजनं च एकाद
शे दिवसे मासे हायने पूतना चिंचिका गृह्णाति बालकं पश्चात् ज्वरस्तत्र प्रजायते अन्नद्वेषो मुखशोषो गात्रभंगश्च रोदनं ऊर्ध्वद

शां·म शिरःपीतत्वक्षणात्तद्गृहात्क्रिशोः पुत्रिकामाषपिष्टेन रचितां शुक्लमोदनं पुष्पाण्यपि च शुक्लानि ध्वजानां पंचविंशतिः स्वस्ति
७६ कानां प्रदीपानां पंच विंशतिरेव च एतत्सर्वं पश्चिमायां संध्यायां प्रातर्वा हरेत् अत्र मंत्रः ॐ नमो भगवते नारायण चंद्रहासवज्रह
स्ताय ज्वलदुग्रमहाय ॐ फट् स्वाहा धूपस्तु गोघृं० शांतिस्तु० ग्रा० द्वादशे दिवसे मासे वर्षे वा भूतनाशिनी अद्भुता व्याघ्रग
ह्णाति ज्वरः स्यात्प्रथमं ततः रोदनं सर्वदा दंतखादं नरक्तनेत्रता रोमांचितत्वा पद्ध्येतदखिलं तस्य लक्षणं तंदुलप्रस्थपिष्टेन
कृत्वा तत्रापि पुत्रिकां त्रयोदश स्वस्तिकाश्च ध्वजादीपास्तथैव च अपूपा मत्स्यमांसं च तथा पर्पटिका अपि एतत्सर्वं दक्षिणास्यां
दिशि मंत्रेण निक्षिपेत् मंत्रस्तु ॐ नमो नारायणाय प्रज्वलद्वज्रहस्ताय हर २ शोषय २ पातय २ हन २ दुष्टसत्वानां फट् स्वा
हा धूपस्तु गोघृं० शांतिस्तु० ग्रा० इति देवीगृहीतबालकलक्षणं अथ बौधायनोक्तज्वरयुक्ततो शांतयः प्रतिपदि कष्टसंदेहो
वा तिदिनान्यष्टादश अग्निर्देवता अग्निरस्मीति पूजामंत्रः हैमी प्रतिमा घृतधूपो घृतदीपश्च यथासंभवं नैवेद्यं तैरघृतं होमद्रव्यं
शांतिर्भवति अत्र सर्वत्र प्रथमं तत्तद्देवतामंत्रजपः सहस्रादिकः पश्चात्पूजाहोमं दानादि होमसंख्या वाष्टोत्तरशतादि व्याधि
तारतम्येन कल्प्या सहस्रं मृत्युनिर्देशो द्वितीयायां दिवानि षोडश ब्रह्मा देवता ब्रह्मजज्ञानमिति जपपूजाहोममंत्रः अगरुधू
पः घृतदीपः सर्वत्र शर्करा नैवेद्य तिलयवाज्यानि होमद्रव्यं प्रतिमा च हैमी तृतीयायां दिनानि नव पार्वती देवता गौरीर्मिमाय

ति मंत्रः दूर्वाभिः पूजा कुंकुमधूपः गुग्गुलुर्वा धूपः घृतदीपः द्राक्षाक्षीरान्नं नैवेद्यं पायसं त्रिमधुराक्तं दूर्वाश्च होमद्रव्यं प्रतिमा
हैमी चतुर्थ्यां दिनानि षोडश गणपतिर्देवता गणानां त्वेति पूजाहोममंत्रः हैमी प्रतिमा रक्तचंदनं गंधं करवीरादीनि पुष्पाणि
अगरुधूपः लड्डुकान् इक्षुखंडानि नैवेद्यं नारिकेलशकलानि इक्षुशकलानि कदलीफलानि च होमद्रव्यं पंचम्यां दिनान्येक
विंशतिर्नागो देवता हैमी प्रतिमा नमोस्तु सर्पेभ्य इति मंत्रः चंदनं गंधः सुरभिपुष्पाणि घृतधूपः पयो नैवेद्यं तिलयवाज्यपाय
सन्नार्कवाम्रधूनि य वायोगे होमद्रव्यं षष्ठ्यां दिनानि द्वादश स्कंदो देवता द्रप्सश्चस्कंदेति पूजामंत्रः पीतचंदनं रक्तं वा गंधं रक्तानि पुष्पा
णि जातीपुष्पाणि वा जटामांसी धूपः लड्डुकादि नैवेद्यं फलानि वा तिलयवाज्यं होमद्रव्यं हैमी प्रतिमा शांतिर्भवति सप्तम्यां दिना
न्यष्टौ दिननाथो देवता आसत्येन आकृष्णेनेति वा मंत्रः हैमी ताम्रजा वा प्रतिमा कुंकुमगंधः करवीरादिपुष्पाणि धूपो गुग्गुलः
शर्करा घृतसंयुतं पायसं नानाफलानि च नैवेद्यं अर्कसमिधः पायसं होमद्रव्यं अष्टम्यां षोडश दिनानि ईश्वरो देवता तमीशान
मिति पूजामंत्रः राजती प्रतिमा कर्पूरमिश्रचंदनं बिल्वदलानि अर्कपुष्पाणि नीलोत्पलानि वा पुष्पाणि जटामांसी धूपः पायसं
नानाभक्ष्याश्च नैवेद्यं त्रिमधुराक्तास्तिला होमद्रव्यं रोगशांतिर्भवति नवम्यां दिनान्यष्टादश भगवती दुर्गा देवता जातवेदस इति
पूजामंत्रः हैमी प्रतिमा रक्तचंदनं गंधं कुंकुमादिकं वा जपाकुसुमादि पुष्पाणि गुग्गुलधूपः घृतपक्वं नैवेद्यं त्रिमधुराक्तं पायसं हो

ं·म· मद्रव्यंदेव्येदधिभक्तपात्रादानंतद्भक्तायवा दशम्यांदिनानिपंचविंशतिः यमोदेवताहैमीलौहीवाप्रतिमायमायत्वेतिपूजामं
७७ त्रः चंदनंमृगमदश्चगंधः मधूसर्जरसश्चधूपः तिलतैलदीपः बिल्वपत्राणिकृष्णतिलाश्चपूजाद्रव्यंकृशरान्ननैवेद्यंघृतमधु
तिलमुद्राहोमद्रव्यं एकादश्यांदिनानिसप्तविश्वेदेवादेवताविश्वेदेवासइतिमंत्रः हैमीप्रतिमाश्वेतचंदनगंधःकृष्णागुरुधू
पःघृतदीपः तुलसीपत्राणिपूजायांयवमोदकंनैवेद्यंतिलयवमध्वाज्यंहोमद्रव्यं द्वादश्यांदिनानिदशरुद्रोदेवतापात्रेरुद्रेतिमं
त्रः हैमीप्रतिमाचंदनश्रीखंडं अगरुधूपः घृतदीपः पायसनैवेद्यंचंपकपुष्पंकमलंचपूजायांतिलयवाज्यमधूनिव्रीहिहो
मद्रव्यंशांतिर्भवतित्रयोदश्यांदिनान्यष्टौशचीदेवताशैक्षीराजतीवामूर्तिः आप्यायस्वेतिमंत्रः पूजायांश्वेतचंदनंगंधः चं
दनधूपःघृतदीपःदधिशर्करान्नेनैवेद्यंतिलयवाज्यमध्वाक्ताहोमद्रव्यंशांतिर्भवति चतुर्दश्यांदिनानिद्वाविंशतिः शंभुर्देव
तानमः शंभवायेतिमंत्रः रौक्मीराजतीवामूर्तिः श्वेतचंदनंगंधः अर्कपुष्पंबिल्वदलानिवा अगरुधूपः पायसंनैवेद्यंत्रिमं
ध्वक्ताक्तिलाहोमद्रव्यं अमायांदिनान्यष्टादशशचीदेवतायक्षदितिमंत्रः हैमीप्रतीमाकुंकुमादिगंधः नानासुगंधपुष्पाणिकृ
ष्णागरुधूपः फेणिकापूरिकादिनैवेद्यंशर्कराघृतपायसंहोमद्रव्यं पूर्णिमायांदिनानिषोडशचंद्रोदेवतादमनकंपूजादिकम
न्यत्सर्वंत्रयोदशीशांतावुक्तंग्राह्यं इतितिथिदोषशांतिः अथाश्वलायनोक्तावारशांतिः आदित्यवारस्यरुद्रोदेवतापातेरुद्रे

तिमंत्रः हैमीराजतीवाप्रतिमाचंदनगंधः अगरुधूपः घृतदीपः पायसंनैवेद्यंहोमद्रव्यंच सोमवारस्यगौरीदेवतागौरीर्मिमा
येतिमंत्रः हैमीराजतीवाप्रतिमाकुंकुमगंधः सुगंधिपुष्पंअगरुधूपः घृतदीपः नानाभक्ष्याणिनैवेद्यंतिलयवहोमद्रव्यंदेव
भक्तसंतर्पणंच भौमस्यस्कंदोदेवता अन्यत्सर्वंषष्ठीशांतिवत् बुधवारस्यविष्णुर्देवताविष्णोरराटमसीतिमंत्रः हैमंस्वरू
पंपीतचंदनंपीतचंदनंपीतपुष्पंकमलानिच अगरुधूपः घृतदीपः पंचलड्डुकानिनैवेद्यंतिलयवाज्यहोमः गुरुवासरस्यब्र
ह्मादेवताब्रह्मजज्ञानमितिमंत्रः हैमीप्रतिमाकुंकुमगंधः पद्मपुष्पंगुग्गुलधूपः शर्करान्नंनैवेद्यंतिलयवधानाघृतंहोम
द्रव्यंशुक्रवारस्यइंद्रोदेवताआत्तारमिंद्रमितिमंत्रः हैमीप्रतिमाचंदनगंधः चंपकपुष्पंअगरुधूपः घृतपक्वंनैवेद्यंतिलयवा
ज्यमधूनिहोमद्रव्यं शनिवारस्ययमोदेवतायमेननदत्तमितिमंत्रः हैमीलौहीवाप्रतिमाताम्रजेतिकेचित् चंदनगंधः कृष्णपु
ष्पंमधूधूपः तिलतैलदीपः मधुमत्स्याश्चनैवेद्यंतिलामधूनिहोमद्रव्यंशांतिर्भवति इतिवारशांतिः अथनक्षत्रशांतयः वृ
द्धवसिष्ठः देवशांतिंप्रवक्ष्यामिरोगार्तानांशरीरिणां बलिपूजाहोमैश्चजपब्राह्मणभोजनैः यस्मिन्धिष्ण्येयदानृणांरोगाःसंजा
यतेतदा तद्धिष्ण्यपूजांकर्तव्यातत्तदीश्वरतुष्टये सुवर्णेनतदर्धेनतदर्धार्धेनवापुनः धिष्ण्येशप्रतिमांकल्प्ययथावित्तानुसार
तः ईशान्यामथवाप्राच्यामुदीच्यांदिशिसंलिखेत् तंडुलोपरिपष्टदलपद्मंगोमयमंडले पंचामृतैः सलेपेश्चततन्मंत्रैः पृथक्

स्नाप्य कलशेक मंत्रेण प्रतिमां स्थापयेत्पुनः कर्णिकायां तु संस्थाप्य ध्यात्वा देवं समर्चयेत् तद्वर्णवस्त्रगंधाद्यैरक्तधूपोपहा
रकैः आरक्तवर्णं कुंभं च पंचत्वक्पल्लवैर्युतं शुक्लवस्त्रसुवर्णरत्नसर्वौषधिसमन्वितं मृत्सु च गव्यसर्वबीजफलक्षौद्रकु
शान्वितं देवस्य पूर्वे तस्याप्य जलमंत्रैः समर्चयेत् प्रतिच्यां स्थंडिले वन्हिं विधिवत्स्थापयेत्ततः मुखांते जुहुयादुक्तक्रमेण
ष्टसहस्रकं तिलहोमं व्याहृतिभिरष्टोत्तरसहस्रकं पूर्णाहुतिं च जुहुयात्सम्यग्जपादिपूर्वकं ततः शुद्धोपविष्टस्य रोगि
णः प्राङ्मुखस्य च मंत्रपूतैः कुंभजलैरब्लिंगैर्वारिमंत्रकैः मार्जनं कारयेत्तस्य सम्यक्संकल्पपूर्वकं नीराजनं च शुद्धात्मा पूजास्था
ने समागतः देवं हुताशनं भक्त्या प्रणम्य प्रार्थयेदिति अमृतोद्भव धिष्ण्येश पतस्त्वं शंकरात्मजः रोगादस्माच्च तारस्व त्वं व
दयामि धिष्ण्यपः इति प्रार्थ्य ततो दद्यात्प्रतिमां वस्त्रसंयुतां दक्षिणासहितां भक्त्या आचार्याय कुटुंबिने ब्राह्मणाय यथा
शक्त्या ब्राह्मणान्भोजयेत्ततः कृत्वा नक्षत्रपूजां तु तिथिवासरयोरपि सर्वान्कामानवाप्नोति रोगी रोगात्प्रमुच्यते अश्वि
न्यामुत्थितो व्याधिर्नवरात्रेण मुंचति देवस्येति मंत्रस्य गायत्री कश्यपोऽश्विनौ श्वेतवर्णौ सुधापूर्णकुंभांभोजधरौ पृथक् ॥
चंदनासनपुष्पाज्यगुग्गुलौ तु गुडप्रियौ क्षीरवृक्षकभौ कार्यौ समिधः क्षीरवृक्षजाः गुडौदनबलिं दद्याद्दीपैः सार्द्धं निश
मुखे भरण्यामुत्थितो व्याधिस्त्रिपक्षिधनप्रदाः मासेन मुंचत्यथवा दैवस्य कुटिला गतिः त्र्यंबकस्य मंत्रस्य प्रोक्ताश्छंदऋषि

देवताः गंधोऽगरुः करवीरं पुष्पं धूपश्च गुग्गुलः अष्टदीपं च सर्वेषां नैवेद्यं च गुडौदनं पाशदंडधरो रक्तस्त्वाज्यमध्वाक्षतैर्हविः
हिषीनापकारूढः कृशरान्नं बलिं हरेत् वक्ष्यमाणेन मंत्रेण बलिं सम्यक्प्रदापयेत् कृत्तिकास्तुपितो व्याधिर्दशरात्रेण मुं
चति स्रुक्स्रुवाभयवरदसुवर्णो मेषवाहनः मेधातिथिर्जगत्यग्निः पुनंतु मामित्यस्य च चंदनं यूथिकापुष्पं घृतदीपः
सगुग्गुलुः नैवेद्यं तिलमाषान्नं वरकान्नेन संयुतं गुडौदनं हविस्तत्र पायसेन बलिं हरेत् रोहिण्यामुत्थितो व्याधिर्दशरा
त्रेण मुंचति नमो ब्रह्मणे मंत्रस्य गायत्री विधिरीश्वरः शुक्लः कमंडलुस्त्वक्षसूत्राभयवरप्रदः चंदनं कमलपुष्पं सदशां
गं च गुग्गुलुं नैवेद्यं पायसं साज्यं सर्वदा तैर्हविर्भवेत् दधिक्षीरघृतक्षौद्रशाल्यन्नेन बलिं हरेत् चंद्रभे चोत्थितो व्याधिः
